From Śabdādhikāra to the end of Pūrvārdha. This book was copied by Bhaṭṭagiri Raghunātha Śāstri of Tiruvaḷḷūr.

Colophon:

सिद्धान्तकौमुदीव्याख्या या कृता तत्त्वबोधिनी ।
समाप्तस्तस्य पूर्वार्धे तेन तुष्यतु शङ्करः ॥

No 1436. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ TATTVABŌDHINĪ.

Substance, palm-leaf Size. $15\frac{3}{8} \times 1\frac{1}{2}$ inches Pages, 289 Lines, 7 on a page Character, Grantha. Condition slightly injured. Appearance, new.

From Halanta in Śabdādhikāra to the end of Kāraka.

No 1437. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: TATTVABODHĪNĪ.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 334. Lines, 8 on a page Character, Telugu and Grantha. Condition, injured. Appearance, old

From Śabdādhikāra to the end of Kāraka with a small portion of Samāsa.

No. 1438. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: TATTVABŌDHINĪ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 175. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

From Taddhita to the end of Pūrvārdha.

The date of transcription and the name of the copyist is given thus:—

नभस्यशुक्लप्रतिपद्गुरौ सिद्धार्थिवत्सरे ।
आच्यन्वयनृसिंहोऽयमलिखत्तत्त्वबोधिनीम् ॥

No. 1439. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.
SIDDHĀNTAKAUMUDĪVYĀKHYĀ TATTVABŌDHINĪ.

Substance, palm-leaf Size, 16¼ × 1⅛ inches. Pages, 385. Lines, 6 on a page. Character, Telugu Condition, much injured. Appearance, old.

Uttarārdha : Tiṅanta, complete

Beginning :

अज्ञाननाशने दक्षं दीक्षितं भक्तरक्षणे ।
वटमूलाश्रयं त्र्यक्षं दक्षिणामूर्तिमाश्रये ॥

ग्रन्थमध्ये विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—श्रौत्रेत्यादिना । श्रोत्रियस्य भावः श्रौत्रं, हायनान्तयुवादिभ्य इति सूत्रे श्रोत्रियस्य यलोपश्चेति वार्तिकाद्यलोपेऽण्प्रत्यये यस्येति चेति ईकारलोपः ।

End :

हिस्वान्तेषु तिङन्तत्वं यथायथं परस्मैपदात्मनेपदान्तत्वं च सिद्धम् । पुरुषवचनसंज्ञा तु विधानसामर्थ्याद्धिस्वयोर्न स्त इत्युक्तमिति सर्वेष्टसिद्धिः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणारविन्दसेवकज्ञानेन्द्रसरस्वतीकृता(यां) सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां तिङन्तकाण्डं समाप्तम् ॥

No. 1440. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.
SIDDHĀNTAKAUMUDĪVYĀKHYĀ: TATTVABŌDHINĪ

Substance, palm-leaf. Size, 16½ × 1⅞ inches. Pages, 172. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins in the course of Tiṅanta and completes it.

No. 1441. सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪ VYĀKHYĀ : TATTVABŌDHINĪ.

Substance, paper. Size, 12¼ × 8⅜ inches. Pages, 65. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, old. Kṛdanta : complete

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिसेवकज्ञानेन्द्रसरस्वतीकृतायां तत्त्वबोधिन्याख्यायां कृदन्तं समाप्तम् ॥

सिद्धान्तकौमुदीव्याख्या कृतेयं तत्त्वबोधिनी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥

इयं(दं) पुस्तकं वेङ्कटाचलेन लिखित्वा(तं) समाप्तिमगमत् ॥

No. 1442. सिद्धान्तकौमुदीव्याख्या—सुबोधिनी.

SIDDHĀNTAKAUMUDĪ VYĀKHYĀ: SUBODHINĪ.

Substance, palm-leaf. Size, 20⅞ × 1½ inches Pages, 229. Lines, 8 on a page. Character, Telugu Condition, injured. Appearance, old.

Vaidika and Svara in Uttarārdha complete

A commentary on Siddhāntakaumudī by Jayakṛṣṇa, son of Raghunātha, son of Gōvardhanabhaṭṭa of Maunikula.

Beginning :

श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः ।
नत्वा मुनित्रयं हृद्यां टीकां कुर्वे सुबोधिनीम् ॥

इयता प्रबन्धेन लौकिकेषु शब्देष्वन्वाख्यातेष्वपि वैदिकानां व्याख्यानमवशिष्यते । नचेदमप्रयोजनम्; रक्षोहागमलघ्वसन्देहाः प्रयोजन-

मिति वदता भाष्यकारेण वेदरक्षायाः व्याकरणारम्भप्रयोजनत्वेन मुख्यतया-भिधानात् ।

End:

न प्रत्यये; तिङ्ग्रहणे कृते तु यं धातुं प्रति गतित्वं तद्घटिते तिङन्ते उदात्तवति परे इत्यर्थो जायते । तेन यत्प्रकरोतीत्यादौ धातोः शेषनिघातेनानुदात्तत्वेऽपि तिङन्तस्य उप्रत्ययस्वरेण मध्योदात्तत्वात् गतेर्निघातः सिद्ध इत्याहुः । प्रपचतीति । तिङ्ङतिङ इति निघातः ॥

Colophon:

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथाङ्गजेन जय-कृष्णेन कृतायां सिद्धान्तकौमुदीव्याख्यायां सुबोधिन्यां तिङन्तस्वरप्रकरणं समाप्तम् ॥

ईशे इति । ईड स्तुतौ उदात्तमेकवचनम् . . . नब्विषयस्येतीति इसन्तवर्जितस्य नित्यनपुंसकस्य आदिरुदात्तस्यादिति सूत्रार्थः ॥

श्रावणे मासि नक्षत्रे श्रवणे भौमवासरे ।
सिद्धान्तकौमुदीव्याख्या लिख्यते रामसूनुना ॥
विदुषा जयकृष्णपण्डितीयं मातङ्गीमहिमावता नरेण ।
लिखितं शिरसा प्रणम्य देवं गिरिशं गिरिजापतिं गुरूंश्च ॥

No. **1443.** सिद्धान्तकौमुदीव्याख्या—सुबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: SUBŌDHINĪ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 155. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Vaidika and Svara (fol. 19*a*): incomplete

No. 1444. सिद्धान्तकौमुदीव्याख्या—बालमनोरमा.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: BĀLAMANŌRAMĀ.

Substance, paper. Size, 11 × $8\frac{3}{4}$ inches. Pages, 104. Lines, 13 on a page. Character, Dēvanāgari. Condition, good Appearance, new.

From the beginning up to Acsandhi

Transcribed in 1896.

This is a commentary by Vāsudēva on the Siddhāntakaumudī

For remarks and extracts see pages 3 and 72 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1896-97, Madras, No. 1.

No 1445. सिद्धान्तकौमुदीव्याख्या—खण्डबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: KHANDABŌDHINĪ.

Pages, 9. Lines, 9 on a page

Begins on fol 1*a* of the MS. described under No. 1248.

From the beginning to the end of Svarasandhi.

A commentary on Siddhāntakaumudī The author is not known.

Beginning:

मुनित्रयमिति । स्वयंभुवे नमस्कृत्येत्यत्रेव अत्रापि नमस्स्वस्तीत्यादिना चतुर्थी स्यात् मैवम्; उपपदविभक्तेः कारकविभक्तिः बलीयसीति वक्ष्यमाण-त्वात् ।

End:

मैवम्; होतृऋकार इत्यत्र प्रकृतिभावार्थम् अग्रहणस्य आवश्यक-त्वात् । ईदूत्=अद । अदसः किम्? शाम्यत्र, वाम्यत्र ॥

Colophon:

इति खण्डबोधिन्यां स्वरसन्धिस्समाप्तिमगमत् ॥

No. **1446.** सिद्धान्तकौमुदीव्याख्या—विलासः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: VILĀSAH.

Substance, palm-leaf. Size, 18⅛ × 1⅓ inches. Pages, 307. Lines, 7 on a page. Character, Telugu Condition, injured. Appearance, old.

Pūrvārdha, almost complete.

This commentary on the Siddhāntakaumdī called Vilāsa is by Lakṣmīnṛsiṃha, son of Rāmāmbā and pupil of Rāmabhadra.

Beginning:

श्रीमन्नाराय . . . .

(श्रीलक्ष्मीनरसिंहाख्यं) शब्दब्रह्ममयं हरिम् ।

नमामि परमात्मानं सच्चिदानन्दविग्रहम् ॥

यत्पादपांशुप्लवमाश्रयन्तः

पाद(त)ञ्जलाब्धिं तरसा तरन्ति ।

पतञ्जलिं यं प्रवदन्ति सन्त-

स्तं रामभद्रं गुरुमानतोऽस्मि ॥

अस्ति लक्ष्मीनृसिंहाख्यो रामाम्बागर्भसंभवः ।

तेन सिद्धान्तकौमुद्या विलासोऽयं विभाव्यते ॥

इह खलु भगवान् पाणिनिः एकश्शब्दस्स . . . . . चिकीर्षितं प्रतिजानीते—मुनित्रयमिति । मननशीला मुनयः मुनीनां त्रयं मुनित्रयं समुदायस्य तदेकदेशा अवयवा इवेति संख्याया अवयवे तयप् इति सूत्रप्रवृत्त्या तयशब्दनिर्वाहः

End:

क्रियेति । पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इत्याशयेनोदाहरति—लुनीहीति । वार्तिकस्य वैयर्थ्यमाशङ्क्याह—नित्येति । समुच्चित्येति । लोकेषु क्रियासमभिहारस्य द्योततत्वाद्द्विर्वचनं व्यर्थमित्या.

No 1447. सिद्धान्तकौमुदीव्याख्या—ललिता.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: LALITĀ.

Substance, palm-leaf. Size, 15⅜ × 1⅛ inches Pages. 119. Lines, 7 on a page Character, Grantha Condition, injured. Appearance, old.

A commentary on Siddhāntakaumudī by Vaidyanathadīksita. The commentary begins here with Lugvikarana and breaks off in Śavikaraṇa.

Beginning:

महागुरूणां चरणौ नामंनाममहर्दिवम् ।
आदादिकं गणं स्पष्टं व्याख्यास्येऽहं यथामति ॥

एवं शब्भाविनः पठित्वा सम्प्रति तल्लुग्भाविनः पठान्ति अद भक्षण इत्यादि । ईरतेः प्रागनिटः । अदि अदादेः परस्य शप इति सूत्र एव स्पष्टमिति मत्वा ण्यक्षत्रियेत्यतो लुगित्यनुवृत्तमत आह लुक्स्यादिति ।

End:

एषितेत्यादि । आटि वृद्धिः । तीषेति . . . ऐषीदिति ऐषी(षि)ष्टाम् । . . . . श्वैत्ये क्रीडने चेति मैत्रेयः । तदाह श्वैत्यक्रीडनयोरिति

No. 1448. सिद्धान्तकौमुदीव्याख्या.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ.

Substance, palm-leaf Size, 16⅝ × 1⅛ inches. Pages. 227. Lines, 10 on a page. Character, Grantha Condition, injured. Appearance, old.

From Samāsa to the end of Pūrvārdha; complete.

A commentary on Siddhāntakaumudī by Lakṣmīnṛsiṁha, son of Kondubhaṭṭōpādhyāya of Mahīdhara family, and pupil of Nārāyana and Lakṣmīnṛsiṁha

First leaf lost.

Beginning:

अव्ययमित्येवं प्रथमान्ततया निर्दिष्टत्वादुपसर्जनसंज्ञायामुपसर्जनं पूर्वमिति पूर्वनिपाते सुपो धात्व(त्वि)ति सुपो लुकि दिशाशब्दस्यैकविभक्ति चेत्युपसर्जनत्वेन गोस्त्रियोरिति ह्रस्वे अपदिशेत्यस्मादुत्पन्नस्य सुपो नाव्ययीभावादिति लुङ्निषेधेनामादेशे अमि पूर्व इति पूर्वरूपे च रूपमिति भावः । तृतीयेति । न चाव्ययीभावस्य अव्ययत्वेन सङ्ख्याकारकशून्यत्वात् कथं तृतीयाविभक्तिरिति वाच्यम्; एकवचनमुत्सर्ग(त): करिष्यत इति भाष्यानुरोधेन संख्याकारके अनपेक्ष्याप्येकवचनानामुत्पत्तिसंभवात् । असत्त्वार्थकानामव्ययानां संख्याद्ययोगित्वेऽप्युन्मत्तगङ्गं पा[र]चो(रे)गङ्गमित्यादिवत् सत्त्वार्थकानामपदिशादिशब्दानां संख्यादियोगितया विभक्त्युत्पत्तौ न विरोध इत्यप्याहुः ।

End:

द्विर्वचन इति । कृच्छ्रे प्रसक्तिसंपादनपूर्वकम् अकृच्छ्रत्वस्य गम्यत्वं स्फोरयति अतिप्रियम(पीति) । यथास्व इति यथास्वशब्दार्थे यथायथमित्येतत् भवतीति सूत्रार्थन्दर्शयति । यथास्वमिति द्विर्वचने रूपन्दर्शयति । आत्मार्थकः आत्मीयार्थकश्चेति द्विविधोऽपि स्वशब्द इह गृह्यत इत्याशयेनाह ययोरा(योऽयमा)त्मेति । यथायथं ज्ञातेति । अत्र ज्ञातेत्यस्य तृन्नन्तत्वान्न लोकेति षष्ठीनिषेध इति बोध्यम् ॥ इति द्विरुक्तिप्रक्रिया ॥

Colophon:

इति श्रीमन्महीधरकुलजलधिकौस्तुभकोण्डुभट्टमहोपाध्यायतनूभवेन श्रीमन्नारायणेन्द्रगुरुचरणकटाक्षनिक्षेपकोशगृह्यमाणेन लक्ष्मीनृसिंहचरणार-

विन्दचञ्चरीकेण लक्ष्मीनृसिंहेन विरचितायां सिद्धान्तकौमुदीव्याख्यायां पूर्वार्धव्याख्यानं समाप्तम् । ग्रन्थसंख्या - ७५०० ॥

No **1449.** सिद्धान्तकौमुदीव्याख्या—सुमनोरमा.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ · SUMANORAMĀ.

Substance, paper Size, $12\frac{1}{4} \times 4$ inches Pages, 204. Lines, 14 on a page Character, Telugu. Condition, good Appearance, old

Between Tinanta and Kṛdanta, some leaves are lost.

To the end of Kṛdanta in Uttarārdha.

A commentary on Siddhāntakaumudī by Tirumalasudhī.

Beginning:

यद्वक्त्राभिमुखं मखेषु मखिभिर्मन्त्रानुपूर्वं हविः
दत्तं दैत्यवरान्निहत्य विबुधास्सर्वे सदा भुञ्जते ।
यद्ध्यानात्प्रभवन्ति निर्मलधियः के वा महापातका
. . . . अग्निपुरुषं वन्दामहे मानसे ॥

श्रीषड्दर्शनवेङ्कटाध्वरिसुतः षड्दर्शिनीवल्लभः
श्रीसर्वेश्वरसर्वतोमुखगुरोर्विद्यानिधेस्सोदरः ।
विख्याताब्वनपौण्डरीकसहजस्सिद्धान्तकौमुद्यनु-
व्याख्यामातनुते सुधीस्तिरुमलः श्रीद्वादशाहाध्वरी ॥

स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति श्रौत्रेति । श्रोत्रियस्य भावः श्रौत्रम् ; हायनान्तयुवादिभ्य इति सूत्रपठितात् श्रोत्रियस्य यलोपश्चेति वार्तिकादण्यलोपौ, यस्येति चेतीकारलोपः

End:

तृतीयान्ते उपपदे अनुप्रयोगधातुना समानकर्मकाङ्क्षिसार्थाण्णमुल स्यात् । दण्डोपघातं गां कालयति ; दण्डेन उपघातं दण्डताडम् । समानकर्मकाणां किम् ? दण्डेन चोरमाहत्य गाः कालयति । सप्तम्याम् ॥

No. **1450.** सिद्धान्तकौमुदीव्याख्या.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 331. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old

Samāsa to Taddhita in Pūrvārdha.

A commentary on Siddhāntakaumudī. The author is not known. This is, however, mentioned in the Alphabetical Index as Sudhākara. But, as there is neither beginning nor end, no clue can be found to identify the work

Beginning:

जनमिति प्रश्ने सर्पिः कालकमित्यत्र प्रकरणान्तरस्थं षत्वमेवोपन्यस्तं न तु प्रकृतोऽपि समासाभावः । किञ्च वीरः पुरुष इत्यादौ असामर्थ्यात्समासाभावमाशङ्क्य समासमध्ये त्वादिवचनाद्भविष्यतीति तत्रैव भाष्ये उक्तम् । तद्यदि तत्सूत्रमात्रपरम्; तर्हि खञ्जकुब्ज इत्यादौ विशेषणसमासानापत्तिः ।

End:

न हि रामः कोसलस्यापत्यम् । अत्राहुः—इतो मनुष्येति ङीषन्तात् कौशल्यायनिशब्दाद्यूनि ढक् । तस्या ब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानामिति लुकि लुक तद्धितलुकीति ङीषो लुक् इति । कार्तायनिरिति ।

No. 1451. सिद्धान्तकौमुदीव्याख्या.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{4}$ inches Pages, 94. Lines, 7 on a page Character, Telugu Condition, good Appearance, old

Kāraka ; complete.

This commentary on Siddhāntakaumudī is called Sudhākara on fol. 7

Beginning :

स्वौजसमौडिति सूत्रविहितानां स्वादीनामर्थव्यवस्थां सूत्रकारादिकृत दर्शयितुमाह—प्रातिपदिकार्थ (इति) । षष्ठीतत्पुरुषगर्भद्वन्द्वगर्भावधारणार्थकमात्रशब्देन मयूरव्यंसकादिसमासः । प्रातिपदिकार्थशब्दस्य यौगिकत्वे त्रिकादिपक्षे लिङ्गग्रहणमनर्थकं स्यादतो योगरूढस्स इत्याह—नियतेति । अयमेवांशो रूढिशक्तिलभ्य इति भावः । यत्प्रातिपदिकजन्योपस्थितौ यस्यार्थस्याव्यभिचारेणोपस्थितिस्स तदर्थ इत्यर्थः । प्रत्येकमिति । द्वन्द्वान्ते श्रूयमाणत्वादिति भावः । अस्ति हि द्वन्द्वघटितसमासान्तता मात्रशब्दे । लिङ्गमात्राधिक्य इति । निरुक्तप्रातिपदिकार्थापेक्षयेति भावः ।

End :

तिङ्ङतिङ इति निघातस्तु नात्र निपातैर्यद्यदि हन्तेत्यादिना यस्मादित्यर्थकनिपातयच्छब्दयोगे तन्निषेधादिति शिवम् ॥

इति कारकप्रकरणम् ॥

No. 1452. सिद्धान्तकौमुदीव्याख्या.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 120. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Śabdādhikāra and Strīpratyaya, without beginning or end. The author and the name of the commentary are not known

---

No. 1453. सिद्धान्तकौमुदीव्याख्या.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ

Substance, palm-leaf. Size, 19⅜ × 1⅜ inches. Pages, 316. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins in the course of Kāraka and breaks off in Taddhita.

A commentary on Siddhāntakaumudī.

Beginning:

लृदेशाभावस्तत्र न द्वितीया किन्तु षष्ठ्येव तसिलभावस्तु तसेश्चेत्यत्र किंसर्वनामबहुभ्यः इत्यनुवर्तनादिति । धिक्कृष्णाभक्तमिति तस्य निन्द्यतेत्यर्थः । षष्ठ्यर्थे द्वितीया न निन्द्य इत्यर्थः । प्रथमार्थे द्वितीयेत्यके । कथं धिङ्मूर्खेति संबोधनपदस्य क्रियान्वय इति प्रागेवोक्ततया धिक्शब्दयोगाभावाद्द्वितीया न प्रवर्तत इति सम्बाधेने चेति प्रथमैव भवति.

End:

भारद्वाजशब्दोऽत्र देशवचनः स च न प्रत्ययार्थः ।
किन्तु प्रकृतिविशेषणमित्याह—भारद्वाजदेशेत्यादिना ॥

इति द्वितीयः पादः ॥

No. 1454. मध्यसिद्धान्तकौमुदी.

MADHYASIDDHĀNTAKAUMUDĪ.

Substance, palm-leaf. Size, 16⅛ × 1⅛ inches. Pages, 290. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Śabdādhikāra, Tiṅanta, Samāsaprakarana and Vaidikaprakriyā.

This is an abridgment of Bhaṭṭōji's Siddhāntakaumudī by Varadarājadīkṣita.

Beginning:

नत्वा वरदराजा(ख्यो) गुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥

अइउण् । . . . हल् । इति सूत्राण्यणादिसंज्ञार्थानि । हकारादिष्वकार उच्चारणार्थः । हलन्त्यम्—उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम्.

End:

धातोरन्त उदात्तस्स्यात् । अनुदात्तं पदमेकवर्जम्—परिभाषेयम् । स्वरविधिविषयः यस्मिन्पदे यस्योदात्तः.

* * * *

Colophon:

एषा वरदराजेन बालानामुपकारिणा ।
अकारि पाणिनीयानां मध्यसिद्धान्तकौमुदी ॥
इति वरदराजकृता मध्यसिद्धान्तकौमुदी समाप्ता ॥

No. 1455. लघुसिद्धान्तकौमुदी.

LAGHUSIDDHĀNTAKAUMUDĪ.

Substance, paper. Size, $10\frac{1}{4} \times 4\frac{3}{8}$ inches. Pages, 57. Lines, 8 on a page. Character, Dēvanāgari. Condition, good. Appearance, old.

From the beginning to Kṛdanta.

A still smaller abridgment of Bhaṭṭōji's work by Varadarāja.

Beginning:

नत्वा सरस्वतीन्देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनयिप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥
अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् ।
ञमङणनम् । झभञ् । घढधश(ष्) । जबगडदश् ।
खफछठथचटतव् । कपय् । शषसर् । हल् ।
इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । हकारादि-
ष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः । हलन्त्यम्—
उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् ।
सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।

End:

यजयाचयतविछप्रछरक्षो नङ् । यज्ञः, य(ा)च्ञा, यत्नः, विश्नः, प्रश्नः, रक्ष्णः । स्वपो नन् । स्वप्नः । उपसर्गे घोः किः । प्रधिः, उपाधिः । स्त्रियां क्तिन्—स्त्रीलिङ्गे भावादौ क्तिन् । घञोऽ ।

No. **1456.** लघुसिद्धान्तकौमुदी.

LAGHUSIDDHĀNTAKAUMUDĪ.

Substance, paper. Size, 10⅝ × 5¼ inches. Pages, 109. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Tiṅanta in the Uttarārdha; complete.

Same as the last.

Colophon:

इति श्रीवरदराजभट्टाचार्यकृतौ लघुसिद्धान्तकौमुद्यां तिङन्तं समाप्ति-मागात ॥

अदृष्टदोषान्मतिविभ्रमाद्वा यत्किञ्चिदूनं लिखितं मयात्र[:] ।
तत्सर्वमार्यैं(:) परिशोधनीयं प्रायेण मुह्यन्ति हि ये लिखन्ति ॥

लिखितं व्रजेन्द्रवलमन्तसिंहराज्येभरथपुरमध्ये ।
लिप्पिकृतं ब्राह्मणगीरधर शुभं भूयात्
आषाडमासे शुक्लपक्षे १२रविवासरे संवत् । १९०६

No. 1457. लघुसिद्धान्तकौमुदी.

LAGHUSIDDHĀNTAKAUMUDĪ

Substance, palm-leaf Size, 11½ × 1¾ inches Pages, 40. Lines, 5 on a page Character, Kanarese. Condition, injured Appearance, old.

From the beginning to Strīśabda in Śabdādhikāra.

Same as the last.

No. 1458. परिभाषासूत्रम्.

PARIBHĀṢĀSŪTRAM.

Pages, 4. Lines, 10 on a page.

Begins on fol. 35*b* of the MSS. described under No. 1267.

Complete.

Gives a number of the acknowledged rules of interpretation bearing upon the Sūtras of Pāṇini.

Beginning :

अर्थवद्ग्रहणे नानर्थकस्य, न वर्णग्रहणेषु, अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ।

End :

उभयनिर्देशे पञ्चमीनिर्देशो बलवान्, द्विबद्धं सुबद्धं भवति ॥

Colophon :

इति शब्दानुशासने परिभाषासूत्राणि समाप्तानि ॥

No. 1459. परिभाषापाठः.

PARIBHĀṢĀPĀṬHAḤ.

Pages, 3 Lines, 9 on a page. Character, Telugu. Condition, fair. Appearance, old

Begins on fol 1*a* of the MS. described under No. 1263.

Complete

Same as the last.

No. 1460. परिभाषावृत्तिः.

PARIBHĀSAVṚTTIḤ.

Substance, paper. Size, 13½ × 8½ inches Pages, 43. Lines, 28 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Paribhāṣēndu-śēkharakaṇṭakōddhāraḥ 27*a*

Incomplete.

A commentary on the Paribhāṣāsūtrās, apparently by one Sīradēva.

Beginning:

असिद्धं बहिरङ्गमन्तरङ्गे—अन्तरङ्गे कार्ये कर्तव्ये बाहिरङ्गं कार्यम-सिद्धं भवति । तेन पचावेदमित्यत्र बाहिरङ्गस्याद्गुणस्यासिद्धत्वात् एत ऐ इत्यैकारो न भवति । अथ ग्रामणि ब्राह्मणकुलमित्यत्र ह्रस्वस्य पिति कृति तुङ्न भवति, नार्कुटः, नार्पत्यमित्यत्र खरवसानयोरिति न भवति, राजन्येत्यत्र संयोगान्तलोपो न भवति । ज्ञापकञ्चास्या वाह ऊठिति ऊठो विधानम् । तत्र ह्युच्यते—प्रकृतस्संप्रसारणमेव वकारस्य विधीयतां ततः पूर्वरूपत्वं (ण्वि)प्रत्ययमपेक्ष्य प्रत्ययलक्षणेनोकारस्य ओकारो गुणः ततो वृद्धिरेचीति वृद्ध्या सिद्धं पष्ठौह इत्यादि ।

* * * *

Colophon:

इति परिभाषावृत्तौ अष्टमस्य रषाभ्यामिति चतुर्थः पादः ॥

अतः परं न्यायमूलाः परिभाषाः—गौणमुख्ययोर्मध्ये मुख्ये कार्यसंप्रत्ययः । प्रयत्नोपपादितार्थो गौणः । शब्दश्रुतिमात्रेण प्रतीयमानस्तु मुख्यः । एतयोर्मध्ये मुख्य एव कार्यं भवति । तद्यथा—अग्नेर्ढगिति ढक् मुख्यादग्निशब्दाद्भवति न त्वग्निर्माणवक इत्यादौ उपचरितात् गौणात् ॥

End:

अग्निसे(सो)मौ माणवकावित्यत्र षत्वन्न भवतीत्युक्तम् । पुरुषोत्त(म)देवेन व्याख्यातम् । ज्ञापकमप्यत्र वर्णयन्ति—द्यावापृथिव्याविति सूत्रे अग्नीषोमाविति षत्वार्थन्निपातनम् । षत्वं ह्यत्राग्नेस्स्तुत्स्तोमसोमा इति षत्वन्न भवति ॥

No. 1461. परिभाषावृत्तिः.

PARIBHĀṢĀVṚTTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol 12*a* of the MS. described under No. 1409.

Contains the first two Padas. Same as the last work.

No 1462. परिभाषावृत्तिः

PARIBHĀṢĀVṚTTIḤ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 42. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 168*a*. The other work herein is Paribhāsārthasaṅgrahavyākhyā fol. 1*a*.

Complete. Same as the last.

No 1463. परिभाषेन्दुशेखरः.

PARIBHĀṢĒNDUŚĒKHARAH.

Substance, paper Size, 11⅝ × 4½ inches. Pages, 77. Lines, 12 on a page. Character, Telugu. Condition, good Appearance, old.

Begins on fol 1*a* The other works herein are Paribhāṣārthamañjarī fol. 40*a* Paribhāṣārthasangrahavyākhyā 83*a*.

Complete

A commentary on the Paribhāṣās by Nāgōśabhaṭṭa

Beginning:

नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥

प्राचीनवैयाकरणतन्त्रे वाच(नि)कान्यत्र पाणिनीये तन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोर्निबद्धानि(यानि) परिभाषारूपाणि तानि व्याख्यायन्ते—

End:

तत्रायमर्थः—ष्टि(ष्ठि)वुक्रमु इति सूत्रे शितीति न वक्तव्यं भवतीति भाष्ये । न केवलं मात्रालाघवं, यावदयमप्यर्थ इति कैयटोक्तेः प्राचेणेति शिवम् ॥

Colophon:

इति श्रीमदुपाध्यायोपनाम(क)शिवभट्टतनूजसतीगर्भजनागोजिभट्टविरचितः परिभाषेन्दुशेखरस्समाप्तः ॥

No. 1464. परिभाषेन्दुशेखरः.

PARIBHĀṢĒNDUŚĒKHARAH.

Substance, paper. Size, 10⅛ × 4¼ inches. Pages, 17. Lines, 12 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old.

Incomplete.

Same as the last.

No. 1465. परिभाषेन्दुशेखरः.

PARIBHĀṢĒNDUŚĒKHARAḤ.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 161. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a* The other work herein is Paribhāṣēnduśēkharavyākhyā: called also Triśikhā 81*a*.

Complete

Same as the last.

The scribe adds at the end.

विजयरघूद्वहविदुषा वत्सान्वयजनुषा करेण सुलिखितः ।
प्रीत्यै भूयाद्विदुषां परिभाषेन्दुशेखरस्सदा रम्यः ॥

No. 1466. परिभाषेन्दुशेखरकण्टकोद्धारः.

PARIBHĀṢĒNDUŚĒKHARAKAṆṬAKŌDDHĀRAḤ.

Pages, 103. Lines, 25 on a page.

Begins on fol. 27*a* of the MS. described under No 1460.

Incomplete.

This is a commentary on the Paribhāṣēnduśēkhara of Nāgēśabhaṭṭa; by Manudēva.

Beginning :

नत्वा गणपतिन्देवं नृसिंहं कमलायुतम् ।
तातं शम्भु प्रसून्दुर्गां कृष्णदेवं तथाग्रजम् ॥
शास्त्रप्रवर्तकाचार्यान्पाणिनिप्रभृतीन्मुनीन् ।
बालम्भट्टाभिधं बायिगुसोपाख्यापरं गुरुम् ॥
दोषा ये पण्डितंमन्यैः परिभाषेन्दुशेखरे ।
दत्तास्तान् सम्यगुद्धर्तुं मनुदेवेन तन्यते ॥

शिष्यशिक्षायै प्रसङ्गतोऽन्येषां मङ्गलाय च स्वोपास्यदेवतानतिम् उपनिबध्नन् चिकीर्षितं प्रतिजानीते नत्वेति । अम्बया मायया सहितं, शेते यस्मिन् जगदिति व्युत्पत्त्या जगल्लयाधिकरणं,बृंहते वर्धयति पशा(प्रजा)मिमामित्यन्तर्भावितण्यर्थात् प्रजावर्धकमिति पदत्रयेण सृष्ट्यादिकर्तृत्वं बोधितम् । यद्वा निराकारस्य ब्रह्मणो नत्याद्यसंभवेन साम्बशिवमिति । तथा च सृष्ट्याद्यर्थं तेन साम्बशिवाकारत्वमेव कल्पितम् । तेन च कल्पितेन च शिवकारणेन स्वोपयोगाय विष्ण्वाद्यकारणकल्पनमिति शिवस्वरूपेण प्राधान्यं बोधितम् । नागेश इति । यद्यप्यात्मनामेत्युक्तेः स्वनामग्रहणं स्वस्य निषिद्धम्; तथापि प्रत्याभिवादसूत्रस्थभाष्यकैयटप्रामाण्येन धर्मशास्त्रप्रामाण्येन च सामान्यनिषेधस्य वैधनामग्रहणातिरिक्तविषयकत्वकल्पनात्, यागीयहिंसाविधिना न हिंस्यादिति सामान्यनिषेधस्य वेदबोधितस्मृत्यनुभवद्वारा यागातिरिक्तविषयकल्पनवत्, स्वकीर्त्यनुवृत्तये स्वनामग्रहणस्य शिष्टाचारानुगृहीतस्य तद्बोधकस्मृत्यनुभवद्वारा वैधत्वं प्रकृतेऽप्यस्त्येवेति न दोषः । यद्वा उक्तनिषेधस्य पारिभाषिकनामविषयकत्वं, न यौगिकनामविषयकत्वं, रूढेर्बलवत्वात् । अत एव गोनर्दीय आहेति भाष्यकारस्य यौगिकस्वनामग्रहणं सङ्गच्छते । प्रकृते नागः ईशः प्रवर्तको यस्य स नागेश इति न निषेधप्रवृत्तिः । तेन भाष्यस्थितसिद्धान्तानां विषयि(य)ता तज्जिज्ञासूनामधिकारितेति सूचितम् । यद्वा मया क्रियत इति अनुवृत्त्या नागेशः कुरुत इति तटस्थेनोक्त्याहङ्कृतिनिरासः । एवञ्च सप्रयोजनं नामग्रहणमिति न निषेधप्रवृत्तिः । अहङ्कृतिनिरासरूपफलस्यात्मगामित्वात् कुरुत इत्यात्मनेपदोपपत्तिरिति सम्यक् ।

End :

अजादिसंज्ञाबोध्यलक्ष्यस्थि(त)ऊनशब्दापेक्षयण आर्धधातुकसंज्ञाशब्दबोध्यनशब्दसापेक्षगुणादन्तरङ्गत्वाभावात्तद्घटकनशब्दमात्रापेक्षत्वेन गुणस्यैवान्तरङ्गत्वाच्च गुणापेक्षया ऊठोऽन्तरङ्गत्वप्रतिपादकः कैयटश्चिन्त्य

एव । वकारान्तमङ्गमनुनासिकादिश्च प्रत्ययमपेक्षमाणस्य उक्तसंज्ञाबोध्य-लक्ष्यस्थितनप्रत्ययनिमित्तकतया गुणादन्तरङ्गत्वाभावादङ्गसंबन्ध.

No 1467. परिभाषेन्दुशेखरकण्टकोद्धारः.

PARIBHĀṢĒNDUŚĒKHARAKAṆṬAKŌDDHĀRAḤ.

Substance, palm-leaf Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 96 Lines, 9 on a page Character, Grantha. Condition, good Appearance, old.

Begins on fol. 1*a*. The other work herein is Cātuślōkasangrahaḥ fol. 49*a*.

Incomplete.

Same as the last.

No. 1468. परिभाषेन्दुशेखरव्याख्या—परिभाषार्थमञ्जरी.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : PARIBHĀṢĀRTHAMAÑJARĪ.

Pages, 85. Lines, 12 on a page.

Begins on fol. 40*a* of the MS. described under No. 1463.

Complete

This commentary is by Bhīmācārya, son of Alagalōka Mādhavācārya.

Beginning :

विनायकपदाम्भोजं विनायकपदाम्बुजम् ।
नत्वा करोति भीमाख्यः परिभाषार्थमञ्जरीम् ॥
गुरोः कटाक्षविक्षेपसमुज्ज्वलधिया मया ।
यदुक्तं क्षम्यतां क्षान्तिनिक्षेपणाविचक्षणाः ॥

आर्या मात्सर्यमुत्सृज्य समर्यादमिमां कृतिम् ।
पश्यतां पश्यताह्लादजननीं जननीं धियः ॥

हंसस्सारं यथाध(द)त्ते सारासारविवेकतः ।
त्यक्त्वासारं तथा सारमङ्गीकुरुत धीजनाः ॥

ग्रन्थसमाप्त्यादिप्रतिबन्धकविघ्नौघप्रशमनाय प्रकृतग्रन्थादौ नमस्कार्यस्येष्टदेवतानमस्काररूपं मङ्गलादीनि हि शास्त्राणि प्रथन्ते इत्यादिवृद्धिसंज्ञासूत्रादिस्थभाष्यात्, ग्रन्थादौ ग्रन्थमध्ये च ग्रन्थान्ते च पुनः पुनरिति शिष्टाचारबोधितस्मृतेश्चावश्यकर्तव्यतासूचितं मङ्गलमाचरन् शिष्यशिक्षार्थं निबध्नाति साम्बशिवमिति । अम्बा जगन्माता पार्वती । तत्सहितं, शिवम्—शेते अस्मिन् जगदिति अधिकरणव्युत्पत्त्या जगदाधारमित्यर्थः । सर्वनिघृष्वरिष्वलष्वाशिवपद्वप्रह्वेष्वा अतन्त्रे इत्युणादिसूत्रेण शीङो ह्रस्वत्वं वनिप्रत्ययो निपातनात् । यद्वा शिवं मङ्गलमस्यास्तीति शिवः । अर्श आद्यच् । साम्बेति विशेषणन्तु तदवियोगसूचनाय । ननु गुणशून्यनमने किं फलमित्याशङ्क्याह ब्रह्मेति ।

End :

तच्च न युक्तम् । अर्धमात्रालाघवेन पुत्रोत्सवतुल्यहर्षोत्पादात् इत्यपि सूचनं ग्रन्थकृदाकूतं विद्वन्मान्या विदांकुर्वन्त्वि(ति) सकलार्थसिद्धिः ।

परिभाषारसास्वादबद्धाध(द)रधियामुना ।
भीमेन रचिता सेयं परिभाषार्थमञ्जरी ॥

Colophon :

श्रीमदलगलेकोपनामकमाधवाचार्यतनयभीमाचार्यप्रणीता परिभाषार्थमञ्जरी समाप्ता ॥

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥

बार्हस्पत्यमानेन शोभकृन्नामसंवत्सरे चैत्रबहुलतृतीयायामिन्दुवासरे काशीवासिवेङ्कटाचललिखिता परिभाषार्थमञ्जरी समाप्ता ॥

No. **1469.** परिभाषेन्दुशेखरव्याख्या—परिभाषार्थमञ्जरी.

PARIBHĀSĒNDUŚĒKHARAVYĀKHYĀ : PARIBHĀṢĀRTHAMAÑJARĪ.

Substance, palm-leaf. Size, 17 × $1\frac{5}{8}$ inches. Pages, 72 Lines, 9 on a page. Character, Grantha Condition, good. Appearance, new.

Incomplete.

Same as the last.

No **1470.** परिभाषेन्दुशेखरव्याख्या—परिभाषार्थमञ्जरी.

PARIBHĀSĒNDUŚĒKHARAVYĀKHYĀ : PARIBHĀSĀRTHAMAÑJARĪ.

Substance, palm-leaf. Size, $15\frac{7}{8}$ × $1\frac{1}{2}$ inches Pages, 147 Lines, 9 on a page Character, Grantha, Condition, injured. Appearrance, new.

Complete

Same as the last.

The MS. is said to have belonged to Pillaipākkam V. Śrīnivāsarāghavan.

The reading herein is somewhat different in regard to the name of the author's father.

इति गलगलेकरोपनामक . . . . मञ्जरी समाप्ता ॥

No. **1471.** परिभाषेन्दुशेखरव्याख्या—त्रिशिखा.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ · TRIŚIKHĀ.

Pages, 9. Lines, 8 on a page. Character, Grantha. Conditon, good. Appearance, old.

Fragmentary. Begins on fol. 81*a* of the MS. described under No. 1465.

This commentary is by Lakṣmīnṛsiṁha.

Beginning:

प्रत्यूहाम्बुधिसीमा यत्पदपांसुर्बभूव देवस(स्स)ः ।
शुण्डालोज्ज्वलतुण्डः श्रेयो भूयो विधत्तान्नः ॥

अव्याजकरुणासिन्धुर्वटशाखितटाश्रयः ।
अस्मिन्निबन्धनिर्माणे साहाय्यं कुरुतां मम ॥

यश्शैषिकं वचोऽशेषं प्रेम्णा मामध्यजीगपत् ।
प्राणनाथाभिधायाथ तस्मै सद्गुरवे नमः ॥

बहवः कृतयो महत्प्रणीताः प्रचरन्त्येव कृतिर्ममापि काचित् ।
समुदञ्चतु शारदे विधावुदिते नोदयते न तारकापि ॥

कुत्सर(त्सित)मलिनमनोभिर्यदि कृतिरेषा मनो न नीयेत ।
श्रेयस्तत्कुरु जायापरजायालोलुपोन्धेव(?) ॥

लक्ष्मीनृसिंहनामाहं परिभाषेन्दुशेखरे ।
करिष्ये त्रिशिखाभिख्यां व्याख्यां संख्यावतां मुदे ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—नत्वेति । स्वावधिकोत्कृष्टत्वप्रकारकज्ञानजनककरशिरस्संयोगव्यापारो हि नतिः । तत्रोत्कृष्टत्वप्रकारकज्ञानं गुणवत्त्वपूरकज्ञानाधीनमिति गुणवत्त्वेन प्रस्तौति । बृहन्ते वर्धन्ते आनन्दादयो यत्रेति बाहुलकादधिकरणे मन् । साम्बत्वं पतिकात्मक(?)विजातीयानन्दप्रतिपादनाय । तेन च वन्दारुवाञ्छासमधिकफलप्रदातृता सूचिता । कृत्याश्रयत्वव्यावहारिकत्वरूपोपाधिकृतात्मभेदमाश्रित्य नागेश इति नामग्रहणम् । आत्मनाम गुरोर्नामेति निषेधावतारः(न) स्मृतौ नामग्रहणस्य नामोच्चारणरूपत्वेन प्रकृते तदुल्लेखेन तद्ग्रहणाद्या(द्वा) । कुरुत इति । यद्यपीह सुखबोधरूपक्रियाफलस्य परगामितया

परस्मैपदमुचितम्; तथापि स्वकीर्त्यनुवृत्तिरूपफलस्य कर्तृगामितया आत्मनेपदम्.

End:

परैवेति। एवेन विप्रतिषेधशास्त्रे पूर्वत्रासिद्धमित्यत्र च पक्षे पदपदार्थोपस्थितौ वाक्यार्थबोधे प्रतिबन्धकाभावेऽपि परपूर्वशब्दाभ्यां गृह्यमाणपाठकृतपूर्वं व्यवच्छिद्यते। अनुनासिकप्रवृत्तिप्रतिबन्धेन चरितार्था प्रगृह्यसंज्ञा प्लुतप्रगृह्येत्यत्रोपास्थिता सती विप्रतिषेधशास्त्रप्रवृत्तिं प्रयोजयतीत्याशयः॥

No 1472. परिभाषेन्दुशेखरव्याख्या.

PARIBHĀSENDUŚEKHARAVYĀKHYĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches Pages, 176 Lines, 8 on a page. Character, Grantha Condition, much injured. Appearance, new.

Beginning and end wanting.

This commentary cannot be identified in respect of its authorship

Beginning:

वत इत्यर्थः। ततश्च गुणादिविषयकज्ञानजनकज्ञानविषयत्वरूपनिमित्तत्वस्य स्थानिन्यप्यक्षतत्वेन दोषः स्यादिति भावः। ज्ञापक इति अन्यथा शियितरीति स्यादिति भावः। ननु किञ्चिन्निष्ठविधेयतानिरूपितोद्देश्यतारूपकार्यित्वस्य शयित इत्यादाविगन्ताङ्ग इव ऊर्णुनविषतीत्यादौ सन्नन्तेऽपि संभवात्सनो निमित्तत्वाभावापत्तिरत आह ऊर्णुनविषतीति। नन्वेवं साक्षादुद्देश्यत्वमिति फलितम्; तच्च सनन्तस्येगन्ताङ्गस्यापि न संभवति; अलोन्त्यपरिभाषयान्त्यस्यैव साक्षादुद्देश्यत्वात् समुदायस्य निमित्तत्वाक्षत्या ङित्त्वात् ज्ञापकभूम्युच्छेदप्रसङ्गः। न च धर्मिग्राहक-

मानबलेन साक्षादुद्देश्यस्यैव तदवयवकसमुदायस्यापि कार्यित्वं विवक्ष्यते, ऊर्णुनविषतीत्यादौ तु सनन्तस्य तथात्वेऽपि केवलस्य (स)नः अतथात्वान्न दोष इति वाच्यम्; मारयतीत्यादौ णिजन्तस्य कार्यित्वेऽपि णिच्प्रकृतिभूतमृङ्धातोरतथात्वान्निषेधापत्तेरिति चेन्न; द्वित्वविधौ सन्ग्रहणेन तस्य द्वित्वप्रयोजकत्वेऽपि मृङ्धातोर्णिचो गुणं प्रति निमित्तत्वे मानाभावेनादोषात्

End:

न चानुकार्यानुकरणयोरभेदपक्षे पदत्वाभावाज्जश्त्वाप्रसक्त्या अवसाने चर्त्वस्य चारितार्थ्यान्नापवादत्वमिति वाच्यम्; यरोऽनुनासिके वा पदान्तेति पूर्वोत्तरसाहचर्येण एतस्य अपदान्ते अप्रवृत्तेः ॥

No 1473. परिभाषेन्दुशेखरव्याख्या—सर्वमङ्गला.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ: SARVAMANGALĀ.

Substance, paper. Size, 9⅜ × 7⅞ inches. Pages, 471. Lines, 23 on a page. Character, Grantha. Condition, good. Appearance, new.

In two volumes. Transcribed for the Library in 1894, 1896 and 1897.

This commentary on the Paribhāsēndhuśēkhara is by Śēṣaśarman, a pandit. who belonged to the court of king Kṛṣṇa of Mysore.

Beginning:

विश्वेश्वरं गुरुं नत्वा ध्यात्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥
प्रवृत्तिमेतां दृष्ट्वा मे हसत्यात्मापि लज्जया ।
तथापि देशिकदया वाचालयति साम्प्रतम् ॥

दोषान्वितोऽपि तनुतां मत्प्रबन्धः सतां मुदम् ।
सद्युक्तिभिरनुश्लिष्टकलङ्कोऽपि विधुर्यथा ॥

नमन्महीपमण्डलीकिरीटरत्नभाझरी-
विराजिताङ्घ्रिकृष्णभूपतीन्द्रकॢप्तसम्मितिः ।
तनोतु सर्वमङ्गला सदा परां मुदं सता-
महीनवाग्विभूषिता मनीषिशेषशर्मणः ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये एतच्छास्त्रस्य मूल-भूतचतुर्दशसूत्रोपदेष्टृत्वेन प्राचार्यत्वात् साम्बशिवस्यैतद्ग्रन्थादौ समुचितं नत्यात्मकं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते नत्वेत्यादिना । यशसः शिष्याणामनायासज्ञानजन्यसुकृतस्य च आत्मगामित्वादात्मनेपदम् । बालानामिति ।

End:

एवमादौ प्राचीनवैयाकरणतन्त्रे वाचनिकानीत्युक्तं तन्नोचितम् अर्धमात्रालाघवेनापि पुत्रोत्सवं मन्यते ; किम्पुनर्बहूनां वचनानां ज्ञापकेन सङ्ग्रहे सिद्धे तेषामानुपूर्वीरूपेण अपाठेऽपि लाघवमिति च सूचितमिति शिवम् ॥

Colophon:

इति महीसूरपुराधीशकृष्णराजेन्द्रभूपालसभापण्डिताध्यक्षभूतस्य समस्तव्याकरणविद्यासर्वङ्कषज्ञाननिधेः काव्यनाटकालङ्कारविद्याद्यनेकशास्त्रविदः सर्वश्लाघ्यकवित्वधुरीणस्य काशीशेषशास्त्रिणः कृतिः सैषा परिभाषेन्दुशेखरव्याख्या सर्वमङ्गलाख्या कृतिः समाप्तिमगमत् ॥

मन्मथेऽब्दे चैत्रकृष्णत्रयोदश्यां भृगोर्दिने ।
लिखिता श्रीनिवासेन सर्वमङ्गलसंज्ञिका ॥

No. 1474. परिभाषार्थसङ्ग्रहः.

PARIBHĀSĀRTHASANGRAHAḤ.

Substance, paper Size, $13\frac{1}{8} \times 8\frac{1}{4}$ inches Pages, 117 Lines, 26 on a page Character, Grantha Condition, good. Appearance, new

Begins on fol 1*a* The other work herein is Paribhāsārthasangrahavyākhyā fol. 61*a*.

Complete.

A treatise on certain grammatical technicalities in Sanskrit by Vaidyanātha, son of Ratnagiridīksita.

Beginning:

विजेज्यानस्सदा शम्भुर्जङ्गच्छद्गिरिजां मुदा ।
सञ्चश्रुराणः पशुना तन्तन्ताद्वाग्गतिं मम ॥
मूर्तिर्यस्य हि पाणिनिः पदमहाभाष्यप्रबन्धास्तथा
वाक्यानां कृदपि स्वयं वितनुते वाग्यस्य दास्यं सदा ।
शिष्या यस्य विरोधिवादिमकुटीकुट्टाकवाग्धाटिका-
स्तस्मै मातुलरामभद्रमखिने भूयो नमो मे भवेत् ॥
प्रणम्य परमन्देवं भवानीपतिमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसङ्ग्रहः ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्—

व्याख्यानतः व्याख्यानात् हेतुपञ्चम्यन्तादाद्यादित्वात्तसिः ।

प्रतिपत्तिशब्दोऽवगमवाची तथा चायमर्थः—व्याख्यानादाचार्यपारम्पर्योपदेशात् विशेषनिश्चयो भवति ।

End:

इदन्तु ध्येयम्—इमौ पक्षौ लक्ष्यानुरोधात्तत्र तत्राश्रियेते इत्युभयथा भाष्ये व्यवहारो दृश्यत इति ॥

Colophon:

इति श्रीमद्रत्नगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिणः कृतिषु परिभाषार्थ-
सङ्ग्रहे न्यायमूलपरिभाषा समाप्ता ॥

परिभाषार्थसङ्ग्रहः समाप्तः ॥

No 1475. परिभाषार्थसङ्ग्रहः.

PARIBHĀṢĀRTHASAṄGRAHAḤ.

Substance, palm-leaf. Size, 14⅛ × 1⅜ inches Pages, 173. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

The MS. is said to have belonged to one Pillaipākkam Śrīnivāsarāghavan.

Complete

Same as the last.

No. 1476. परिभाषार्थसङ्ग्रहः.

PARIBHĀSĀRTHASAṄGRAHAH

Substance, palm-leaf. Size, 17⅞ × 1⅛ inches. Pages, 85. Lines, 8 on a page Character, Grantha Condition, injured. Appearance, old.

Contains the first six Adhyāyas and one Pada in the seventh Adhyāya.

Same as the above

No. 1477. परिभाषार्थसङ्ग्रहः.

PARIBHĀSĀRTHASAṄGRAHAH.

Pages, 27. Lines, 12 on a page.

Begins on fol. 34*a* of the MS. described under No. 1364.

About 50 Paribhāsās are dealt with.

No 1478. परिभाषार्थसङ्ग्रहव्याख्या.

PARIBHĀSĀRTHASAṄGRAHAVYĀKHYĀ.

Pages, 330. Lines, 25 on a page.

Begins on fol. 61*a* of the MS. described under No 1474

Complete.

This is a commentary on the last described work by Svayamprakāśayati, and is called Candrikā

Beginning:

नत्वा गुरुपदद्वन्द्वं संसारजलधिप्लवम् ।
व्याकरोमि यथाबुद्धि परिभाषार्थसङ्ग्रहम् ॥

ग्रन्थादौ शिष्टाः मङ्गलमाचरन्ति । तस्य च भगवता भाष्यकारेण मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति प्रचयगमनं प्रयोजनमुक्तम्; वीरपुरुषाणि आयुष्मत्पुरुषाणि चेति तद्ग्रन्थाभ्यासकर्तॄणां सामर्थ्याद्यतिशयः आयुर्वृद्धिश्चेति प्रयोजनद्वयमुक्तम्; अतो मङ्गलाचरणस्यावश्यकत्वात् परमेश्वरप्रार्थनारूपं मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—विजेज्यान इति । विपूर्वात् जि जये इत्यस्माद्धातोः (धातो)रेकाच इति यङ्; तस्य यङोऽचि च इति शब्दा-(सूत्रा)दनैमित्तिके लुकि प्रत्ययलक्षणेन यङन्तत्वात्सन्यङोरिति द्वित्वे गुणो यङ्लुकोरित्यभ्यासस्य गुणे पूर्वप्रवृत्तां धातुसंज्ञामादाय वर्तमाने लडिति कर्तरि लटि अटोरित्त्वाल्लोपे तस्य लटश्शतृशानचाविति आत्मनेपदं शानजादेशः.

*　　*　　*　　*

इति श्रीपरमहंसपरिव्राजकसर्वतन्त्रस्वतन्त्रश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमान(ण)स्य श्रीमत्स्वयंप्रकाशस्य कृतौ परिभाषार्थसङ्ग्रह-

व्याख्यायाश्चन्द्रिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥ समाप्तश्चा-
ध्यायः ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। अत्र लिङ्गविशिष्टस्ये
त्युच्यते टाबादीनाञ्च ग्रहणेन भाव्यम्।

End:

पुंसि संज्ञायां घः प्रायेणेत्यत्र संज्ञाशब्दस्य प्रायेणेत्यस्य च परस्प-
रान्वयः; ततश्च संज्ञायामित्यर्थो लभ्यत इत्याशङ्क्य घप्रत्ययस्य विधेयत्वेन
प्राधान्यं प्रायेण संज्ञायामित्युभयमपि तदन्वय्येव; ततश्च प्रायेण घो
भवति, संज्ञायां न तु प्रायेण सज्ञायामित्यन्वय इति सकलेष्टसिद्धिः ॥

Colophon:

परिभाषार्थसङ्ग्रहव्याख्या समाप्ता ॥

No 1479. परिभाषार्थसङ्ग्रहव्याख्या.

PARIBHĀSĀRTHASANGRHAVYĀKHYĀ

Pages. 88. Lines, 16 on a page.

Begins on fol. 83*a* of the MS. described under No 1463.

Incomplete.

No. 1480. परिभाषार्थसङ्ग्रहव्याख्या.

PARIBHĀṢĀRTHASANGRAHAVYĀKHYĀ.

Pages, 334. Lines 8 on a page

Begins on fol. 1*a* of the MS described under No. 1462.

The book is said to have belonged to Pillaipākkam Śrīnivāsa-rāghavan.

Complete.

Same as the above.

No 1481. परिभाषाभास्करः.

PARIBHĀSĀBHĀSKARAḤ.

Substance, paper. Size, 13¾ × 8½ inches. Pages, 208. Lines, 20 on a page. Character, Grantha Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śabdatāṇḍava 105*a*

Complete.

This is a treatise on Paribhāsās by Śōsādrisudhī.

Beginning :

नत्वा गुरुचरणयुगं[लं] स्मृत्वा ब्रह्माखिलात्मकं विमलम् ।
रचयति शेषाद्रिसुधीः परिभाषाभास्करं स्वशिष्यकृते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्—व्याख्यानतोऽभिमतार्थबोधकाभियुक्तवचनात् विशेषस्याभिमतार्थस्य निर्णयो भवति । अत्र सन्देहपदेन कोटिद्वयावगाहिज्ञानमभिमतानभिमतसाधारणज्ञानमनभिमतमात्राविषयज्ञानश्चोच्यते; तस्माच्छास्त्रमलक्षणमाभिमतार्थ(ा)बोधकन्न भवतीत्यर्थः । तत्र ङेर्यः, ङेराम्नद्याम्नीभ्यः, इत्यादौ कोटिद्वयावगाहिज्ञाने प्राप्ते ङेर्य इत्यत्र चतुर्थ्येकवचनस्य, ङेरा(रा)मित्यत्र सप्तम्येकवचनस्य, ग्रहणमिति व्याख्यानादभिमतस्य निर्णयः । प्रातिपदिकान्तनुम्विभक्तिषु चेत्यादौ उत्तरपदतदितरप्रातिपदिकान्तमात्रग्रहणे प्राप्ते उत्तरपदं यत्प्रातिपदिकं तदन्त यैव णत्वमिति व्याख्यानादभिमतस्य निर्णयः ।

End :

किञ्च माषवपनीयमित्यत्र सति स्थानिवत्त्वे णत्वं प्राप्नोति णत्वे स्थानिवत्त्वात् न भवति णत्वमिति ज्ञाप्यते, ज्ञापकासिद्धं न सर्वत्रेति वा उक्तस्थले स्थानिवत्त्वमिति कैयट इति दिक् ॥

Colophon :

इति शेषाद्रिसुधीविरचितपरिभाषाभास्करस्समाप्तः ॥

No 1482. परिभाषाभास्करः.

PARIBHĀṢĀBHĀSKARAḤ.

Substance, palm-leaf Size, $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 120 Lines, 9 on a page Character, Grantha. Condition, good Appearance, old.

Complete.

Same as the above.

This book is said to have belonged to one Pillaipākkam Śrīnivāsācarya.

No. 1483. वाक्यपदीयम्.

VĀKYAPADĪYAM.

Substance, paper Size, $10 \times 7\frac{5}{8}$ inches Pages, 111. Lines, 7 on a page Character, Dēvanāgari. Condition, good Appearance, new

Transcribed in 1894

To the end of the 14th Samuddēśa.

A work on the meaning and the logic of sentences and words by Bhartṛhari Vṛṣabha

Beginning :

अनादिनिधनं ब्रह्म य(श)ब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वोह(क्त्वेऽपि)शक्तिभ्यः पृथत्वे(क्त्वे)नेव वर्तते ॥
अध्या(व्या)हत(ताः)कलां(ला)यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराष्षट् भावभेदस्य योनयः ॥
एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥
प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एका(कोऽ)प्यनेकवर्त्मेव समाम्नाता(तः) पृथक् पृथक् ॥

भेदानां बहुमार्गत्वं कर्मण्ये(ण्ये)कत्र चाङ्गता ।
शब्दानां यतशक्तित्वः(त्वं)तस्य शाखासु दृश्यते ॥
स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ॥
तस्याऽर्थवादरूपाणि निश्रिता(त्य)स्वविकल्पजाम्(:) ।
एकार्थि(कत्वि)नां द्वैतिनाश्च प्रवादा बहुधा गताः ॥
सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्वपा(वा)दाविरोधिना(नी) ॥
विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ॥
आसन्नं ब्र[ा]ह्मणस्तस्य तपसामुत्तमन्तपः ।
प्रथमञ्छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥
प्राप्तरूपविभागा या यो वाचः परमो रसा(सः) ।
यत्तत्पुण्यतमज्योतिस्तस्य[ा] मार्गोऽयम(ा)ञ्जसः ॥
अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धन[ा]म् ।
तत्त्वावबोधश्शब्दानां नास्ति व्याकरणादृते ॥
तद्द्वारमपवर्गस्य वाङ्मलानाञ्चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥
यथार्थजातयस्सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्ष(मा)णानामजिह्मा राजपद्धतिः ॥
अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यः छन्दसां योनिमात्मा छन्दोमयीन्तनुम् ॥

* * * *

यदेयं(कं) प्रक्रियाभेदैः बहुधा प्रविभज्यते ।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥
नित्याश्शब्दार्थसंबन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥

End:

इत्थंभावेऽपि सादृश्यं बुद्ध्यवस्थानिबन्धनम् ।
ग्रहणे भेदमात्रस्य तत्रान्यैवाभिधीयते ॥

गौर्वाहीक इति द्वित्वे सादृश्यं प्रत्युदाहृतम् ।
शुक्लादौ सति निष्पन्ने वाहीको न द्विरुच्यते ॥

Colophon:

इति श्रीभगवद्भर्तृहरिवृषभमहावैयाकरणपादविरचिते वाक्यपद(दी)[वी]ये प्रकीर्णकनामनि पदकाण्डे समुद्देशश्चतुर्दशः ॥

No 1484. वैयाकरणभूषणसारः.

VAIYĀKARANABHŪSANASĀRAH.

Substance, paper. Size, $10\frac{1}{4} \times 4\frac{7}{8}$ inches Pages, 76. Lines, 17 on a page Character, Telugu. Condition, good Appearance, old

Complete.

This is a commentary on Bhattōjidīksitā's Kārikā by Kaunda bhatta, son of Rangōjibhaṭṭa The Kārikās themselves are wrongly attributed to Kaundabhatta in the India Office Library Catalogue.

The MS. is said to have been copied by Medidrissayya for Naraharisōmayājulu, and to have been completed on Friday, the 2nd Bahula of Nija Bhadrapada in the Bhava year.

Beginning:

लक्ष्मीनारायणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतस्सर्वं जगदेतद्विवर्तते ॥

अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥

पाणिन्यादिमुनीन्प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिभवि(फलि)कां पुंभाववाग्देवताम् ।
डुण्डिङ्गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥

प्रारिप्सितप्रतिबन्धकोपशमनाय श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ।

फणिभाषितभाष्याब्धेश्शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थस्संक्षेपेणेह कथ्यते ॥

उद्धृत इति । अस्माभिरिति शेषः ।

End:

निर्विघ्नप्रचयाय अन्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णात्मन इत्यादिना ।

अशेषभूतदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणरङ्गोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादस्समाप्तः ॥

No. 1485. वैयाकरणभूषणसारः.

VAIYĀKARAṆABHŪṢAṆASĀRAḤ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 60. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

To the end of Nāmārthanirnaya.

This is a commentary on Hari-Dīksita's *Kārikās* by Kaunḍubhatta, son of Rangōjibhaṭta.

Begins on fol. 83.

The date of transcription is given at the end thus:

अङ्गीरसाह्वये वर्षे फाल्गुने मासि
वैयाकरणसारं तमलिखद्वेङ्कटो बुधः ॥

No. 1486. वैयाकरणकारिकाटीका—वैयाकरणमतोन्मज्जिनी.

VAIYĀKARANAKĀRIKATĪKĀ VAIYĀKARAṆAMATŌNMAJJINĪ.

Substance, paper. Size, $12\frac{3}{4} \times 4\frac{3}{8}$ inches Pages, 27. Lines, 13 on a page Character, Telugu Condition, good. Appearance, old.

Begins on fol. 1*a* The other works herein are: Vrttidīpikā fol. 15*b*, Sphōtavādaḥ fol 30*b*, Ākānksāvāda 51*b*.

Incomplete

Another commentary on the Kārikās of Bhaṭṭōji by a disciple of his.

Beginning:

जगतः पितरौ नत्वा पार्वतीपरमेश्वरौ ।
गुरुभिर्ये कृताः श्लोकाः टीका तेषां वितन्यते ॥

इह शास्त्रार्थे ज्ञातेऽप्यधिकविजिज्ञासुभिः अ मत्कृताच्छब्दकौस्तुभात् ज्ञेय इति ध्वनयन्तो मङ्गलार्थं व्याकरणशास्त्रनिर्मातृभ्यार्हितत्वात् स्त्री(श्री)पतञ्जलिं स्मरन्ति फणिभाषित . . . . . . कथ्यते । पदार्थसंसर्गरूपत्वाद्वाक्यार्थस्य वाक्यस्य च सुप्तिङन्तसमुदायत्वात् सुबन्तानाञ्च प्रायः क्रियाविशेषणत्वात् धातोश्च क्रियावाचकत्वात् धातुस्वरूपं वदन्ति ।

* * * *

Colophon :

इति वैयाकरणमतोन्मज्जिन्यां सुबुल्लासस्तृतीयः ॥

* * * *

इति वैयाकरणमतोन्मज्जिन्यां वृत्त्युल्लासे समासोल्लासः पञ्चमः ॥

* * * *

इति वैयाकरणमतोन्मज्जिन्यां निपातानां द्योतकत्वस्थापनोल्लासः ॥

वृत्तिभेदं निरूपयति—

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।

भेदस्संसर्ग उभयं नेति वाच्यव्यवस्थितिः ॥

End :

पाचकः, दण्डी, सुवासाः, इत्यादौ विक्लित्त्यनुकूलक्रियासंबन्धाश्रयः, दण्डसंबन्धाश्रयः, शोभनवस्त्रसंबन्धाश्रयः, इत्यादिशाब्दबोधात्संबन्धोऽपि कृत्तद्धितसमासार्थः ; ततश्चामीभ्यस्त्वतलादीनां तस्यैव प्रवृत्तिनिवृत्ति· (मित्त)त्वात् तस्यैव त्वतलाद्यर्थत्वात् तद्विशेष्यक एव बोधः पक्तृत्वं दण्डित्वं सुवासस्त्वं पाक दण्ड.

No. 1487. वैयाकरणसिद्धान्तमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪSĀ.

Substance, palm-leaf Size, 16 × 1¼ inches. Pages, 180. Lines, 5 on a page. Character, Telugu. Condition, injured Appearance, old

Incomplete.

A treatise on the structure, import and power of words by Nāgēśabhaṭṭōpadhyāya, son of Śivadhaṭṭa and Satī

Beginning :

. . . . . साम्बं सदाशिवम् ।

वैयाकरणसिद्धान्तमञ्जूषेयन्निरूप्यते ॥

तत्र अष्टौ स्फोटा इति सि(द्धान्तः तत्र वर्णस्फोटः, पदस्फोटः, वा)क्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, एते पञ्च व्यक्ति-स्फोटाः । व्यक्तिस्फोटत्वं च

End:

एवञ्च कार्यतावच्छेदकधर्मवत्वरूपकार्यतावच्छेद . . . .

विधेस्तथा शक्तिस्वीकारात् उपपन्नः स्थितः एतदर्थमे(व) वैजात्य-कल्पना ॥

No. 1488. वैयाकरणसिद्धान्तमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪṢĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 160. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, new.

From Dhātvartha to Avyayībhāvanirūpaṇa.

Same as the last.

No 1489. वैयाकरणसिद्धान्तमञ्जूषा—लघुमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪṢĀ : LAGHUMAÑJŪṢĀ

Substance, paper. Size, $10\frac{7}{8} \times 4\frac{1}{2}$ inches. Pages, 786. Lines, 12 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

The Kāraka portion of Subarthavicāra is herein found at the end of the work instead of in its right place, that is, between Prātipadikārthanirṇaya and Vṛttivicāra.

An abridgment of the work described under the last number by Nāgēśabhaṭṭōpādhyāya.

Beginning:

नागेशभट्टविदुषा नत्वा साम्बशिवं लघुः ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥

तत्र वाक्यस्फोटो मुख्यः । लोके तस्यैवार्थबोधकत्वात्, तेनैवार्थसमाप्तेश्च । तदुक्तं न्यायभाष्यकृता—पदसमूहो वाक्यमर्थसमासा(सा)विति । अत्र च पदं सुबन्तं तिङन्तश्च तेन तत्समूह इत्यर्थः ।

End:

शृङ्गबेरपुराधीशरामतो लब्धजीविकः
सर्वतन्त्रार्थतत्त्वज्ञः सर्वत्र च निबन्धकृत् ॥
वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतामुमया शिवः ॥
ईदृक्तर्केऽस्य नाभ्यास इति चिन्त्यं न पण्डितैः ।
दृषदोऽपि हि सन्तीर्णाः पयोधौ रामयोगतः ॥
शब्देन्दुशेखरं पुत्रं मञ्जूषां मम कन्यकाम् ।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया ॥

Colophon:

इति श्रीमदुपाध्यायोपनामकसतीगर्भजशिवभट्टसुतनागेशभट्टकृतौ वैयाकरणसिद्धान्तमञ्जूषाख्यस्फोटवादः ॥

No. **1490.** वैयाकरणसिद्धान्तमञ्जूषा—परमलघुमञ्जूषा.

VAIYĀKARAṆASIDDĀNTAMAÑJŪṢĀ:
PARAMALAGHUMAÑJŪṢĀ.

Substance, palm-leaf (Śrītāla). Size, $8\frac{1}{2} \times 2\frac{3}{8}$ inches. Pages, 73. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

An abridgment of the last described brief work by Nāgēśa.

Beginning:

शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥

तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा । तत्रापि, जातिव्यक्तिभेदेन पुनः षोढा । अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेति संकलनया अष्टौ स्फोटाः । तत्र वाक्यस्फोटो मुख्यः । तस्यैव लोके अर्थबोधकत्वात्ते-नैवार्थसमाप्तेश्च । तदाह न्यायभाष्यकारः—पदसमूहो वाक्यमर्थसमाप्ता-विति । अस्य समर्थमिति शेषः । तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवात् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभावान्प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यान्तत्तदर्थ-विभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः । तत्र शास्त्रप्रक्रिया-निर्वाहको वर्णस्फोटः ।

End :

नामार्थप्रकारकशाब्दबुद्धिं प्रति विभक्त्यर्थोपस्थितिः कारणमिति व्युत्पत्त्यन्तरं तद्भङ्गनञ्च । मम तु पृथक्शक्त्यनङ्गीकारात् विशिष्टस्यैव विशिष्टार्थवाचित्वान्नामार्थद्वयाभावान्न काप्यनुपपत्तिरित्यलम् ॥

Colophon :

इति शिवभट्टसुतसतीगर्भजनागेशकृता परममलघुमञ्जूषा समाप्ता ॥

अब्दे क्रोधननामके दिनकरे राशिं गते कर्कटं
सर्पर्क्षे सितपक्षके हिमरुचेर्वारे द्वितीया(ये)तिथौ ।
श्रीमत्कौशिकवंशजस्समलिखद्गोपालदासः पुरा
नागेशेन कृतामिमां परमलघ्वाद्यां तु मञ्जूषिकाम् ॥

No. 1491. वैयाकरणसिद्धान्तमञ्जूषा—परमलघुमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪṢĀ · PARAMALAGHUMAÑJŪṢĀ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 19. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 56*a*. The other work herein is Śaktivādārtha-dīpikā 1*a*

Incomplete.

Same as the last.

No **1492.** शब्दताण्डवम्.

ŚABDATĀṆḌAVAM.

Pages, 252. Lines, 20 on a page

Begins on fol. 105*a* of the MS. described under No. 1481.

A treatise on grammar like the Siddhāntakaumudī.

Beginning :

नत्वा गुरुचरणाम्बुजमम्बां वागीश्वरीश्च वाक्सिद्ध्यै ।
अतुलकलाधरशेखरसन्तुष्ट्यै शब्दताण्डवं रचये ॥

प्रत्याहारेष्वितान्न ग्रहणम्; अनुनासिक इत्यादिनिर्देशसामर्थ्यात् । न खल ककारे परेऽच्कार्यं दृश्यत इति यत्कौमुद्यामुक्तम्; तत्र विचार्यते— अत्र यदि णसधातोर्ण्वुलि नासिकाशब्दो व्युत्पाद्यते तदा अच्कार्य-शब्देन यदि अण्विवक्षितः । तर्हि प्रत्ययस्थादितीत्वविधिसामर्थ्यादेव यण् परिहर्तुं शक्यः; यस्येति चेतीकारलोपस्तु न शङ्कितुं योग्यः, ककारस्याच्त्वेऽपि प्रत्ययस्य तदादित्वाभावेन स्वादित्वाभावेन भत्वस्यै-वाभावात् ।

End :

कृताधिपत्यामिव साधु बन्धुतां
करेणुरारोहयते निषादिनम् ।

इत्यादिमहाकविप्रयोगानुकूलमनुसरतः कैयटस्योपरि प्रमादोद्भाव-नमेव प्रमाद इति सर्वमनवद्यम् । इति णेरणाविति सूत्रस्थकैयटोद्धारः ॥

No. 1493. प्रबोधचन्द्रिका.
PRABŌDHACANDRIKĀ.

Substance, paper. Size, 8½ × 6½ inches. Pages, 61. Lines, 15 on a page Character, Telugu. Condition, good Appearance, old.

Begins on fol. 14*a*. The other work herein is Bhartṛhari-Śataka 1*a*.

A treatise on grammar in easy stanzas by a Vaisalabhūpati.

Beginning:

हरिहरगुरुभक्तः सर्वलोकानुरक्तः
त्रिभुवनततकीर्तिः कान्तिकन्दर्पमूर्तिः ।
रणरिपुगणकामो वैसलक्षोणिपालो
जयति जगति दाता सर्वकर्माविधाता ॥

चन्द्रावतीवदनचन्द्रचकोरविक्रमादित्यभूपतनयो नयतन्त्रवेत्ता ।
चौघाणवंशतिलकः पटगा(नगरा)धिनाथो राजा परञ्जयति वैसलभूपदेवः ॥

* * *

श्रीमद्वैसलदेवेन रामभक्तिरतात्मना ।
इति चिन्तितमेकान्ते कदाचित्तिष्ठता सता ॥

* * * *

संसाराम्भोधितरणे रामनामानुकीर्तनम् ।
रामनामान्विता तस्मात्प्रक्रिया क्रियते मया ॥

बालकानां प्रबोधाय तोषाय विदुषामपि ।
आकल्पमतिसंसारे कीर्तिसंस्थापनाय च ॥

चिन्तयन्निति निर्यातः क्रीडन्तं श्रीहिराध(र)म् ।
श्रीमान्वैसलभूपालश्श्रीहिराधरमब्रवीत् ॥

* * * *

दानेन दयया चैव युद्धेन निजकर्मणा ।
दानवीरो दयावीरो युद्धवीर इति स्मृतः ॥
दधीचिर्दानवीरोऽभूद्दयावीरश्शिबिर्नृपः ।
हि(ह)म्मीरो युद्धवीरोऽभून्निदर्शनममी त्रयः ॥
स्वकर्मणैव पुरुषः प्रतिष्ठाधिष्ठितो भवेत् ।
यथा रामश्च कृष्णः परशुरामश्च पौरुषात् ॥
इह राजा च रङ्कुश्च प्राक्तनेन स्वकर्मणा ।
इह दुःखं सुखं वापि भुङ्क्ते प्राक्तनकर्मणा ॥
स्वकामकर्मपाशोऽयं सर्वेषां सुदुरत्ययः ।
स्वर्गश्च नरकश्चापि भजते निजकर्मणा ॥
स्वीकृतः कर्मपाशोऽयं सर्वेषां सुदुरत्ययः ।
कृताञ्जलिपुटो भूत्वा सव्रीडमिदमब्रवीत् ॥
मातापितृभ्यां विरसं परिणामे सुखावहम् ।
तिक्तं कटु कषायं वा भेषजं पीयते सुतः ॥
श्रवणाञ्जलिना पीतमुपदेशामृतं मया ।
आज्ञाप्यतां महादेव किमिदानीमधीयताम् ॥
श्रीमान्वैसलभूपालः श्रीहिराधरबालकम् ।
स्वकीयमातितुष्टात्मा सुतामित्यवदत्पुनः ॥
नीतिविद्यास्त्रविद्या च द्वे राज्ञोऽभिहिते सदा ।
तयोरप्यधिका नीतिः राज्यं हि ध्रियते यया ॥
क्रियाकारकविज्ञानान्नीतिस्सम्यग्विविच्यते ।
स्वादी(दि)त्यादिपरिज्ञानाच्छाब्दी बुद्धिः प्रवर्तते ॥
विना व्याकरणं वाणी रमणी रमणं विना ।
विवेकं च विना लक्ष्मीर्न सुखाय कदाचन ।
तस्माद्व्याकरणं पूर्वं पठ त्वं बुद्धिवृद्धये ॥

पश्चान्नीतिं पाठित्वा त्वं राज्यं भज यथासुखम् ।
शक्तिराज्याङ्गसेनाङ्गत्रिवर्गोपायषड्गुणान् ॥
यथाकालं प्रयुञ्जानो राजा राज्यं हि रक्षति ।
क्रियाकारकसंबन्धज्ञानमुत्पाद्यते यया ॥
उत्सृष्टा प्रक्रिया सेयं त्वया संप्रति पठ्यताम् ।
प्रबोधचन्द्रिका नाम रामचन्द्रसमाश्रिता ॥
अज्ञानतिमिरध्वंसकारिणी चित्तहारिणी ।
बहवः प्रक्रियाग्रन्थास्सन्ति चेत्सन्तु का क्षतिः ॥
मालतीमधुनः क्वापि मधुपानो मधुव्रतः(?) ।
विभक्तिज्ञानतो यस्मात्प्रबोधस्समजायते (त)॥
तस्मादिह प्रथमतो विभक्तिः प्रणिगद्यते ।
स्वादी(दि)त्यादिविभक्ती द्वे स्वादौ सप्त विभक्तयः ॥
एकद्विबहुसंज्ञानि वचनानि च सप्तसु ।
प्रथमा च द्वितीया च तृतीया च यथाक्रमम् ॥
चतुर्थी पञ्चमी षष्ठी सप्तमी चेति ताः क्रमात् ।
प्रथमैव विभक्तिस्स्यादुक्ते कर्तरि कर्मणि ॥
अनुक्ते कर्मकर्त्रादौ द्वितीयाद्या विभक्तयः ।
तत्रोक्ते कर्तरि यथा रामो जयति वैरिणः ।
रणे रामौ च रामाश्च जयतश्च जयन्ति च ॥

End:

प्रबोधचन्द्रिकायाश्च कृतौ वैसलभूपतेः ।
एषा विशेषतस्सुष्ठु समाप्ता सन्धिचन्द्रिका ॥
अयोध्यानगरे रम्ये रामकोण्डा(टा)द्वहिस्थितः ।
सरयूजन्मभूमध्ये हर्म्यस्थानसमाश्रितः ॥
रामनामसुधीः श्रीमद्रामपादाब्जषट्पदः ।
लिलेख रामसन्तुष्ट्यै रूपबोधनचै(च)न्द्रिकाम् ॥

Colophon:

प्रबोधचन्द्रिका संपूर्णा ॥

रामाट्टहिकुले जन्मभाग्रामकरुणावशः ।
नेत्रर्तुगजचन्द्राणां विक्रमार्कमहीपतेः ॥
संवच्छ्रीशालिवाहस्य शके तु गतवत्सराः ।
ऋषिनेत्राद्रिधरणीमिता (स्त) त्र तु धातरि ।
वर्षे चैत्राख्यमासेऽब्जवासरे दशमी(मे)तिथौ ।
कृष्णपक्षे विश्वऋक्षे शिवयोगेऽभिजित्क्षणे ॥
शिवाय च नमस्तुभ्यं रामाय च पुनः पुनः ।
शिवरामौ मम हृदि सदा निवसतां विभू ॥

समाप्ता बालबोधिनी चन्द्रिका ॥

No. 1494. पदार्थदीपिका.

PADĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 23. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 23*a*. The other work herein is Prayōgavivēka 1*a*.

Contains 5 Prakāśas.

This is a treatise by Gauraṇārya, nephew of Pōtarāja, the minister of Siṅgaya Mādhava of the Rēcalla family, on the appropriate and auspicious choice of the letters, words and metres to be used in poetic composition.

Beginning:

जानकीमुखपद्मार्कं जानकीकुचभूषणम् ।
जानकीरमणं वन्दे जगतां मङ्गलप्रदम् ॥
वन्दे वामस्तनन्यस्तवल्लकीवादनोत्सुकाम् ।
वक्त्राब्जवासनालोलभृङ्गीसङ्गीतमातृकाम् ॥

अस्ति प्रशस्तावनिपालमौलि-
रत्नावलीरञ्जितपादपीठः ।
रेचेल्लवंशार्णवपूर्णचन्द्रः
महाबलस्सिङ्गयमाधवेन्द्रः ॥

आसीत्तस्य महामात्यः स्वामिकार्यधुरन्धरः ।
पोतराज इति ख्यातो राजनीतियुगन्धरः ॥

मन्त्रिचूडामणेस्तस्य सोदरस्यायमप्रभोः ।
गौरनार्य इति ख्यातः तनयो नयकोविदः ॥

सोऽहं सोमकलामौलेः प्रसादाद्धतकल्मषः ।
प्रणम्य पिङ्गलंनाम कविपुङ्गवसम्मतम् ॥

उदाहरणरत्नानि लक्षणग्रन्थिसान्धिषु ।
समाकृष्य सतां भूत्यै वक्ष्ये लक्षणदीपिकाम् ॥

पात्रस्नेहदशालोकप्रदोषतिमिरापहं(हा) ।
पदार्थदीपिका सेयं भाति लक्षणदीपिका ॥

वर्णानामुद्भवः पश्चाद्व्यक्तिसङ्ख्या ततः परम् ।
भूतबीजविचारश्च ततो वर्णग्रहावपि ॥

अनर्हानर्हवेधश्च रूक्षस्निग्धविचारणा ।
प्रयोगनिर्णयस्तेषां शुभाशुभफलानि च ॥

वर्णाना चाभिधानानि स्वरूपाण्यधिदेवताः ।
वर्णभेदग्रहस्तल शुभाशुभफलानि च ॥

मित्रामित्रविचारश्च नक्षत्राणि च राशयः ।

End:

अत्र एकं बहवो भिदादि (इ)त्यनेन प्रथमाद्येकैकविभक्तिक्रमेण निबध्यमाना उदाहरणभेदाः कैश्चिदुत्कलिका सूचिता ।

अन्तेऽनुष्टुभमार्यां वा कविकृत्याख्ययान्विताम् ।
कुर्याच्चाटुप्रबन्धानामयं साधारणो विधिः ॥

Colophon:

इति प्रबन्धदीपिकायामुदाहरणभेदनिरूपणं नाम पञ्चमः प्रकाशः ॥

No. 1495. लिङ्गानुशासनम्.

LIṄGĀNUŚĀSANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 1265.

Incomplete.

A work by Pāṇini on gender in Sanskrit.

Beginning:

लिङ्गम्। स्त्री। अधिकारसूत्रे एते ; ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः—ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः स्वस्रादिसप्तकस्यैव ङीब्निषेधेन कर्त्रीत्यादेः ङीपा ईकारान्तत्वात् ।

End:

रभसोऽप्याह—

मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः ।

चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति। एवमेवंविधेऽन्यत्रापि बोध्यम् । तलन्तः—अयं स्त्रियां स्यात् ॥

No. 1496. लिङ्गानुशासनवृत्तिः

LIṄGĀNUŚĀSANAVṚTTIḤ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 20. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The Liṅgānuśāsana portion. A Vṛtti on the Sūtras of Pāṇini by Bhattōjidīkṣita.

Beginning:

लिङ्गम् । स्त्री। मातृदुहितृस्वसृयातृननान्दरः । ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्रादिसप्तकस्यैव ङीब्निषेधेन कर्त्रीत्यादेर्ङीपा ईकारान्तत्वात्.

End:

गुणवचनं च । शुक्लः पटः, शुक्ला पटी, शुक्लं वस्त्रम् । कृत्याश्च । करणाधिकरणयोर्ल्युट् । सर्वादीनि सर्वनामानि । स्फष्टेयं त्रिसूत्री ॥

Colophon:

इति भट्टोजिदीक्षितविरचितपाणिनीय[विरचित]लिङ्गानुशासनसूत्रवृत्तिः॥

No. 1497. लिङ्गानुशासनम्—सविवृति.

LIṄGĀNUŚĀSANAM WITH A COMMENTARY.

Pages, 22. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1408.

Complete The commentary is not by Bhaṭṭōji.

Beginning:

अथ लिङ्गम्—अथशब्दोऽयं मङ्गलार्थः । लिङ्गमित्यधिक्रियते आ शास्त्रसमाप्तेः। स्त्री—स्त्री इत्यधिकृतं वेदितव्यम्। ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः—ऋकारान्ता मात्रादयश्शब्दाः पञ्च स्त्रीलिङ्गा भवन्ति। इयं माता, मातॄः पश्य; एवमियन्दुहिता दुहितॄः पश्येत्यादि । ऋकारान्ता इति किम्? द्वैमातुरो जरासन्धः, बहुमातृक इत्यादौ मा भूत् । मात्रादीनिति किम्? पिता पितॄन् इत्यादौ मा भूत्। मात्रादिनियमात्तिसृचतस्रोरतिप्रसङ्ग इति चेत् स्त्रियामेव तिसृ-चतसृ-इत्येतयोरादेशयोर्विधानाददोषः ।

End:

सर्वादीनि सर्वनामानि—सर्वनामानि सर्वादीनि यानि तानि प्राग्वत्। सर्वे पुरुषाः, सर्वाः स्त्रियः, सर्वाणि कुलानि ॥

Colophon:

इति पाणिनीयलिङ्गानुशासनविवृतौ परवल्लिङ्गाधिकारः समाप्तः ॥ शास्त्रं समाप्तम् ॥

No **1498.** लिङ्गानुशासनम्—सव्याख्यानम्.

LIṄGĀNUŚĀSANAM · SAVYĀKHYĀNAM.

Substance, palm-leaf. Size, 8⅜ × 1 inches. Pages, 186. Lines, 4 on a page. Character, Nandināgarī. Condition, injured Appearance, new.

Begins on fol. 1*a*. The other work herein is Nāyikānāyaka-bhāvaḥ 94*a*.

Another work on gender in Sanskrit by Harsavardhana, son of Śrīvardhana, with a commentary by Pṛthivīśvara, son of Bhaṭṭi-bhāradvāja (?)

Beginning:

अरूपं विश्वरूपाख्य (मव्या) ख्यातमकारकम् ।
प्रपद्ये प्रणवात्मानमलिङ्गासंख्यमव्ययम् ॥

नमस्यामि जगद्वन्द्यां कृत्स्नभद्राय मातृकाम् ।
स्थूलां सूक्ष्मां शिवां घोरां सत्त्वाकारां सरस्वतीम् ॥

* * *

प्रार्थितश्शास्त्रकारेण पादग्रहणपूर्वकम् ।
लिङ्गानुशासनव्याख्यां करोति पृथिवीश्वरः ॥

इह हि शास्त्राणि विशिष्टदेवतानमस्कारपूर्वाणि समारभ्यन्त इति हि शिष्टाचारः । तदर्थमेव कविर्भगवन्तं सर्वभूतावासं वासुदेवं विष्णुं विश्वव्यापिनं रक्षिणं नमस्कुर्वन् प्रथमश्लोकमेकं चकार.

नमो मथितदुर्वारदैत्यचक्राय चक्रिणे ।
सर्वभूमिवनागारस्तम्भीभूतैकबाहवे ॥

भगवते चक्रिणे नमः । कीदृशाय मथितदुर्वारदैत्यचक्राय

* * * *

मनोरमतमैर्वृत्तैः सज्जनानन्दवर्धनम् ।
लिङ्गानुशासनं स्पष्टं यथाबुद्धि विधीयते ॥

* * * *

आदीदूतस्स्त्रियां प्रायो गङ्गा लक्ष्मीश्चमूर्यथा ।
पर्यायसहिता भूमिर्वल्ली विद्युन्नदी दिशः ॥

End:

व्यालेश्शङ्करचन्द्रयोर्वररुचेर्विद्यानिधेः पाणिनेः
सूक्ता (न्) लिङ्गविधीन्विचार्य सुगमं श्रीवर्धनस्यात्मजः ।

श्राव्यं व्यापि च हर्षवर्धनमिदं स्पष्टीकृतप्रत्ययं
लिङ्गानामनुशासनं रचितवानन्यार्थसंसिद्धये ॥

सूक्ता (न्) लिङ्गविधीन् विचार्य पर्यालोच्य सारं सङ्गृह्य तेभ्यः सुगमं श्राव्यं श्रोत्रसुखकरं व्यापि च स लिङ्गानुशासनं रचितवान् ॥

Colophon :

इति भट्टिभारद्वाजसूनोः पृथिवीश्वरस्य कृतौ हर्षवर्धनलिङ्गानुशासनटीकायां सर्वलक्षणायां लिङ्गप्रकरणं समाप्तम् ॥

रूपेणाप्रतिमः श्रुतेन नसमो वीर्येण पाण्डोः सुतः
काव्ये चातिमनोरमः स्वकृतिना सम्पन्नकल्पद्रुमः ।

जातः सम्प्रति हर्षवर्धन इति प्रख्यातकीर्तिः सतां
तेनेयं रचिता मनोरमकृतिः लिङ्गान्विशिष्टीकृतः ॥

लिङ्गानुशासनं समाप्तम् ॥

No. 1499. लिङ्गानुशासनवृत्तिः—लिङ्गनिर्णयभूषणम्.

LIṄGĀNUŚĀSANAVṚTTIḤ : LIṄGANIRṆAYABHŪṢAṆAM

Substance, palm-leaf Size, 11¾ × 1½ inches. Pages, 35. Lines, 8 on a page Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

A commentary on the Liṅgānuśāsana of Pāṇini by Rāmasūri, son of Tōnūri (Tōvūri in the next number) Viṣṇu Sūri.

Beginning:

वाणीं प्रणम्य शिरसा बालानां ज्ञानसिद्धये ।
स्त्रीपुंनपुंसकं स्वल्पं वक्ष्यते शास्त्रनिश्चितम् ॥

तोनूरिविष्णुविदुषस्सूनुना रामसूरिणा ।
विरच्यते बुधश्लाघ्यं लिङ्गनिर्णयभूषणम् ।

आदौ तावत् स्त्रीलिङ्गा उच्यन्ते । सर्वजातिषु स्त्रीवाचकाः स्त्रियाम् । दारशब्दो बहुत्वे पुंस्येव

End:

सर्वादीनि परवल्लिङ्गमा (ग) ता(नि) । सर्वे पुरुषाः सर्वाः स्त्रियः सर्वं कुण्डलमित्यादि । इति सर्वमवगन्तव्यम् ।

Colophon:

पाणिनीयलिङ्गानुशासनवृत्तौ अवशिष्टलिङ्गाधिकारः । समाप्ता च लिङ्गानुशासनवृत्तिः

No. 1500. लिङ्गानुशासनवृत्तिः—लिङ्गनिर्णयभूषणम्.

LIṄGĀNUŚĀSANAVṚTTIḤ : LIṄGANIRṆAYA-BHŪṢAṆAM.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 16. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are . Prasaṅgaratnāvaliḥ 9*a*, Śivāstōttaraśatanāmāni 68*a*, Śivāsṭōttaraśatanāmāni 71*a*, Vīrēśāstōttaraśatanāmāni 72*a*, Jangamāsṭōttaraśatanāmāni 73*a*, Basavēśvarāsṭōttaraśatanāmāvalih 74*a*, Vināyakāsṭōttaraśatanāmāvaliḥ 75*a*, Dēvyastōttaraśatanāmāni 76*a*, Śivāstōttaraśatanāmāvaliḥ 77*a*, Vīrēśāstōttaraśatanāmāvalih 78*a*, Jaṅgamāsṭōttaraśatanāmāvalih 79*b*, Basavēśāstōttaraśatanāmāvaliḥ 81*b*, Vināyakāsṭōttaraśatanāmāvalih 83*a*, Śivarahasyāstōttaraśatanāmāvalih 84*a*, Dēvyasṭōttaraśatanāmāvaliḥ 85*b*, Karivīrasiddhadēśikastōtram 88*a*, Vivāhakalpah 90*a*, Astabandhanaprakāraḥ 100*a*, Cātuślōkāh 101*a*.

Complete.

Copying was finished on the 20th of Caitra in the Vikrama year.

Same as the last.

Beginning:

वाणीं प्रणम्य शिरसा बालानां ज्ञानसिद्धये ।
स्त्रीपुंनपुंसकं स्वल्पं वक्ष्यते शास्त्रनिश्चितम् ॥

तोवूरिविष्णुविदुषस्सूनुना रामसूरिणा ।
विरच्यते बुधश्लाघ्यं लिङ्गनिर्णयभूषणम् ॥

आदौ तावत् स्त्रीलिङ्गा उच्यन्ते—सर्वजातिषु स्त्रीवाचकाः स्त्रियाम् । दारशब्दो बहुत्वे पुंस्येव ।

End:

अवशिष्टानि हकारान्तशब्दरूपाण्यपि विशेष्यवशान्नपुंसकानि भवन्ति । अपदिशमित्यव्ययं वा नपुंसकम् । क्रियाव्ययविशेषणानां कर्म[क]त्वं नपुंसकत्वं च वक्तव्यम् । विशेषणाविशेष्यलिङ्गं वक्तव्यम् ॥

विक्रम सं ॥ चित्रनेल १२ तेदिवरकु लिङ्गनिर्णयभूषणं संपूर्णम् ॥

No. 1501. लिङ्गानुशासनवृत्तिः—लिङ्गनिर्णयभूषणम्.

LIṄGĀNUŚĀSANAVṚTTIH : LIṄGANIRṆAYA-BHŪṢAṆAM.

Substance, palm-leaf (Śrītāla). Size, 17 × 2 inches. Pages, 16. Lines, 7 on a page. Character, Malayalam Condition, injured. Appearance, old

The beginning and the end are wanting. First leaf lost. This work is said to be by Rāmasūri.

No. 1502. लिङ्गानुशासनवृत्तिः—लिङ्गनिर्णयभूषणम्.

LIṄGĀNUŚĀSANAVṚTTIḤ : LIṄGANIRṆAYA-BHŪṢAṆAM.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 21 Lines, 7 on a page Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

चक्रवर्त्यंशजातेन श्रीनिवासार्यसूनुना ।
श्रीवासराघवार्येण लिखितं लिङ्गनिर्णयम् ॥

No. 1503. लिङ्गनिर्णयः.

LIṄGANIRṆAYAḤ.

Substance, paper. Size, 7½ × 6½ inches. Pages, 16 Lines, 21 on a page. Character, Telugu Condition, slightly injured, Appearance, old.

Begins on fol. 1*a*. The other work herein is Avyayaprakaraṇa of the Nāmaliṅgānuśāsana fol. 9*a*.

Complete.

Beginning:

कारु-करेणु - चञ्चु - स्नायु-कङ्गु-प्रियङ्गु-रज्जवः स्त्रियाम् । करेणुः पुंयोगे पुमान् । भू - वधू - यवाग्या(ग्वृजू)कण्डू - सरयू - चमू-तन्वश्च । ऊरुशब्दः स्त्रियामुपमितबहुव्रीहिसमासश्चेदूकारान्तः । यथा रम्भोरूः करभोरूः ।

End:

अपदिशमित्यव्ययं वा नपुंसकम् । क्रियाव्ययविशेषणानां क
त्वं नपुंसकत्वञ्च वक्तव्यम् । विशेषणस्य विशेष्यलिङ्गं वक्तव्यम् ॥

Colophon:

नपुंसकलिङ्गाः(ङ्गानि) समासाः(सानि) ॥

No. 1504. प्रयोगविवेकसङ्ग्रहः.

PRAYŌGAVIVĒKASANGRAHAḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 43. Lines, on a page. Character, Telugu. Condition, injured Appearance, old.

Begins on fol. 1*a*. The other work herein is Padārthadīpikā 23*a*. Contains 3 Patalas

This is a brief work on certain points in Sanskrit grammar; and is intended for beginners The author is Vararuci. It treats in a general way of syntax, of compounds, of primary and secondary derivatives and of verbal formations.

Beginning:

. . . कारकं सर्वं तत्स्वातन्त्र्यविवक्षया ।
तत्कारकं कर्तृसंज्ञं कलितं शब्दपारगैः ॥
तत्र कर्तर्यभिप्रेते प्रथमैव विधीयते ।
तृतीया वाथवा षष्ठी स्मृतावभिप ॥

Colophon:

इति वररुचिकृते प्रयोगसङ्ग्रहे प्रथमः पटलः ॥

* * * *

अभिहितं कर्म यथा—कटः क्रियते देवदत्तेन ।
अनभिहितं कर्म यथा—कटङ्करोति देवदत्तः ॥
द्विविधं करणम्—बाह्यमाभ्यन्तरश्चेति ।

शरीरावयवादन्यत् बाह्यं यथा—दात्रेण लुनाति व्रीहीन्नरः, परशुना छिनत्ति वृक्षं देवदत्तः। आभ्यन्तरं यथा—शरीरावयवाश्रितं यत्तदाभ्यन्तरम्। यथा—मनसा पाटलीपुत्रं व्रजति देवदत्तः।

End:

किं शतृशानचोस्समासस्सिध्यतीत्यत आह—द्रव्यसत्तापरत्वाभ्यां समासो न तु सिध्यतीति। उत्तरपदाश्रितेन शतृप्रत्ययेन समासो न भवतीति कथमवगम्यते? सत्तापरत्वाभ्यां सर्वसमासो न भवति। कटं कुर्वन्पच्यमान ओदन इत्यदोषः॥

ग्रन्थनाशभयेनाहं श्लोकानां पञ्चविंशतेः।
परार्थभारं निर्वोढुं प्रभवेयं भवे भवे॥

अयमभिप्रायः—लाभसत्कारवयोऽभिलाषिणां कारुण्यविलसितचेतसां प्रवृत्तिरिति प्रदर्शनार्थः॥

Colophon:

इति वररुचेः प्रयोगविवेकसङ्ग्रहे तृतीयः पटलः॥
कारकसङ्ग्रहस्समाप्तः॥
शोभकृद्वत्सरे ज्येष्ठशुद्धसप्तम्यां भौमवासरे लिखित्वा(तं) समाप्तम्॥
दीर्घव्यञ्जनशृङ्गादिदोषो लोपो भवेद्यदि।
लिपौ विपश्चितो वीक्ष्य तां सम्यक्कर्तुमर्हथ॥

No. 1505. शब्दार्थप्रकाशिका.

ŚABDĀRTHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 238. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 48*a*. The other work herein is Kārakārthaprakāśikā 1*a*.

An incomplete work discussing questions connected with Sanskrit grammar as propounded by Pāṇini; it deals with the Kārakas and with the Samāsa portion up to Tatpuruṣa

Beginning :

वन्देऽहं गिरिजानन्दनन्दनं नन्दजस्तुतम् ।
सदानन्दकरं शैवं भक्तानां गणनायकम् ॥

तदेवं ङ्याप्प्रातिपदिकादित्यधिकृत्य विहिताः स्वादिप्रत्ययास्सप्रपञ्चन्निरूपिताः । तत्र प्रथमादिसप्तविभक्तीनामर्थविशेषे व्यवस्थां दर्शयितुमुपक्रमते—प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । ननु प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गञ्चेति त्रिकं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं संख्या चेति चतुष्कं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं संख्या कारकञ्चेति पञ्चकं प्रातिपदिकार्थ ; इत्येते पक्षाः सरूपाणामिति सूत्रे स्त्रियामिति सूत्रे च भाष्ये स्थिताः मञ्जूषायां प्रपञ्चिताश्च ।

End :

अशाला च—अशालार्थकेत्यर्थः । सभाशब्दश्शालायां सङ्घाते च वर्तते । तत्र राजामनुष्यपूर्वकस्य शालावाचिनः सभाशब्दस्य क्लीबत्वमुक्तं पूर्वसूत्रे । संप्रति संघातवाचिनस्सभाशब्दस्य क्लीबत्वं स्यादित्यत आह—सङ्घातार्था या सभा एतदन्तस्तत्पुरुष इति । विभाषा सेनासुराच्छायाशालानिशानाम्—तत्पुरुष इत्यनुवृत्तं सेनादिभिर्विशेष्यते तदन्तविधिः तदाह—एतदन्तस्तत्पुरुष इति । प्रत्येकाभिप्रायमेकवचनम् । श्वनिशमिति । शुनो निशेति विग्रहः । कृष्णचतुर्दशीत्याहुः । शुनश्चतुर्दश्यामुपवसतः पश्याम इति तिर्यगधिकरणे शाबरभाष्ये स्थितम् । दृढसेन इति । दृढा सेना यस्येति बहुव्रीहिः । तत्पुरुषत्वाभवान्न क्लीबत्वविकल्पः । असेनेति । तत्पुरुषत्वेऽपि नञ्समासत्वात् न क्लीबत्वविकल्पः । परमसेनेति । कर्मधारयत्वान्न क्लीबत्वम् । तत्पुरुषोऽनञ्-

कर्मधारयः इत्यधिकारस्यात्रैव प्रयोजनमिति कैयटे प्रपञ्चितम् । इति तत्पुरुषः ॥ शेषो बहुव्रीहिः ।

No 1506. शब्दार्थप्रकाशिका.

ŚABDĀRTHAPRAKĀŚIKĀ.

Substance, paper Size, 13¼ × 8¼ inches. Pages, 112 Lines, 24 on a page. Character, Grantha Condition, good. Appearance, new.

This seems to be a transcript of the last described work

Begins on fol 38*b* The other work herein is Kārakārthaprakāśikā 1*a*.

No. 1507. कारकार्थप्रकाशिका.

KĀRAKĀRTHAPRAKĀŚIKĀ.

Pages, 94 Lines, 6 on a page

Begins on fol. 1*a* of the MS described under No. 1505.

The name here given to the work is conjectural; and it deals with the Kāraka portion of Sanskrit grammar.

Incomplete.

Beginning:

प्रातिपदिकार्थेत्यत्र शेषः । तदुक्तं प्रकृतसूत्रे कैयटीये—ङ्याप्रातिपदिकाद्विहितानां प्रकरणमिदं नियमार्थमिति । बहुषु बहुवचनमित्यत्र मञ्जर्य्यामपि यदि पुनरेकवाक्यतया विशिष्टविधिस्स्यात् तदा इतरेतराश्रयत्वं प्राप्नोति विहितानाञ्जसादीनां बहुवचनादिसंज्ञा संज्ञया च विधानमिति ततो भिन्नवाक्यत्वमेव युक्तमित्युक्तम् । अर्थवत्सूत्रभाष्ये च अविशेषेणोत्पद्यन्ते सुपः, उत्पन्नानां नियमः क्रियत इति ।

नियमश्च बहुष्वेव बहुवचनं कर्मत्वादियोग्यप्रातिपदिकार्थे एव प्रथमा, कर्मण्येव द्वितीयेत्यादिक्रमेण प्रत्ययानियमः ।

End:

अन्यथा यस्य शब्दस्य वाच्यं द्योत्यं वा वस्तु न संभवति तस्य वाक्यार्थे अनुपयोगात् प्रयोगानुपपत्तिरिति अधिपरी इति सूत्रे कैयटोक्तेरित्यभिप्रेत्याह—एष्वर्थेषु विषयभूतेष्विति । प्रत्यादिघटित-वाक्यजन्यबोधं प्रतीति भावः ॥

No 1508. कारकार्थप्रकाशिका.

KĀRAKĀRTHAPRAKĀŚIKĀ.

Pages, 191 Lines, 24 on a page

Begins on fol 1*a* of the MS. described under No. 1506.
Complete.

No. 1509. कारकप्रक्रिया.

KĀRAKAPRAKRIYĀ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{3}{8}$ inches Pages, 48. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

A treatise on the government of words in Sanskrit syntax.

Beginning:

(भ)गवानस्माकं पापशासनः । पादादाविति किम् ?
पान्तु वः पार्वतीनाथमौलिचन्द्रमरीचयः ।
तव ये शत्रवो राजन् मम तेऽप्यतिशत्रवः ॥
सम्बोधनपदादग्रे न भवन्ति वसादयः ।
चादिभिश्च । चादिभिरपि योगे नैते आदेशा भवन्ति ।
चादिर्निपातः । च वा ह अह एव एवं नूनं पृथक्

End:

छन्दांसि स्यादि सर्वत्र दध्ना जुहोति। पुनन्तु ब्राह्मणस्य ते . . . ट्व्रजतीति विरेजुः ॥

इति .कारकप्राक्रिया ॥

No **1510.** विदग्धबोधः.

VIDAGDHABŌDHAH

Substance, paper. Size, $12\frac{3}{8} \times 4\frac{7}{8}$ inches Pages, 20. Lines, 10 on a page Character, Dēvanāgarī Condition, good Appearance, old.

Complete.

This is a treatise in 155 stanzas about Kāraka by Śrīmisrabhūpa.

Beginning:

अथावधेहि कञ्जाक्षि संसिद्धे शब्दसाधने।
विभक्त्यर्थो विभाव्यन्ते पदार्थप्रतिपत्तये ॥

नामार्थमात्रे प्रथमा विभक्तिः संबोधनेऽपीन्दुसमानवक्त्रे।
तद्ब्रह्म कृष्णः स च राधिका सा एकस्तथा द्वौ बहवस्त्रयश्च ॥

हे चन्द्रमः कुरु करैर्मम देहदाहं
हे पञ्चसायक वधूषु विधत्त(त्स्व) माधिम्।
हे कोकिलाः कलरवैः कुरुतात्र बाधां
राधा गृहं श्रयति किं हरिमन्तरेण ॥

End:

को हेतुस्सखि नागतो मधुरिपुः केनाप्यसौ हेतुना
रुष्टस्तुष्यति हेतवे सखि पुनः कस्मै च हेतोः कुतः।
आनीये सखि केलिकुञ्जमधुना तत्कस्ये हतोः प्रियः
सङ्केतेऽपि विलम्बते तव धूर्तैर्हेतुष्वपे(ने)केषु मे ॥

श्रीकृष्णचन्द्रजगतीपतिकल्पितार्थे
श्रीमिश्रभूपतिवचोरचनाप्रपञ्चे ।
कान्ते विभक्त्यभिमतार्थविधानयुञ्जि
षट्कारकाण्यभिहितानि विदग्धबोधे ॥

Colophon :

इति श्रीविदग्धबोधस्समाप्तः । सं० १८०६ फाल्गुनशुद्ध ३ शनिवारे शुभमस्तु ॥

No. **1511.** बालबोधिनी—रूपमाला.

BĀLABŌDHINĪ : RŪPAMĀLĀ.

Substance, palm-leaf Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 77. Lines, 7 on a page Character, Grantha Condition, good Appearance, new.

Complete.

This is a work on the conjugation of certain verbs by Svāminātha.

Beginning :

लड्वर्तमाने नित्यं स्याद्भूते लङ्लुङ्लिटस्तथा ।
विध्याशिषोस्तु लिङ्लोटौ लुड्लङ्लृट् च भविष्यति ॥
प्रणम्य शिवशर्मा(र्वा)णीपुत्रौ विघ्नेशषण्मुखौ ।
संसाराज्ञानतिमिरभास्करौ स्वप्रकाशकौ ॥
प्रणम्य शिरसा देवीं बालानां हितकारिणीम् ।
यथासारं प्रवक्ष्यामि धातुप्रत्ययपञ्चिकाम् ॥

धातवः पुनरर्थवशाद्द्विविधा भवन्ति—सकर्मका अकर्मकाश्चेति । तत्र ये कर्मापेक्षां क्रियामाहुः—ते सकर्मकाः; यथा घटं करोति, ग्रामं गच्छति, ओदनं पचति, इत्येवमादि ।

End :

चुरस्तेये पालरक्षणे अर्चपूजायाम् ॥

Colophon :

इति स्वामिनाथविरचितायां बालबोधिन्यां रूपमालायां तिङन्तपरिच्छेदः समाप्तः ॥

रूपमाला समाप्ता ॥

अनन्तरमत्र शब्दविवरणं लेखनीयम् ॥

No. **1512.** धातुप्रयोगकारिका.

DHĀTUPRAYŌGAKĀRIKĀ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 19 Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol 56*a* The other works herein are : Vṛttaratnākara 1*a*, Vṛttaratnākaravyākhyā 11*a*, Dvādaśakūtabhēdah 66*a*, Tārakanighaṇṭu 97*b*, Kālavidhānam 76*a*, Nyāyabōdhinī 83*a*, Prapannāmṛta 101*a*

Incomplete.

By Vīrapāṇḍya A metrical treatise on Sanskrit verbs. The third person, singular, present tense form of certain verbs are given here in synonymous groups.

Beginning :

धातुप्रयोगाः पठ्या ये केचित्काव्योपयोगिनः ।
वीरपाण्ड्यक्षितीशेन वक्ष्यन्ते शिक्षितुं शिशून् ॥
विद्यतेऽस्ति भवत्यत्र स्यादस्तु स्ताद्भवेदपि ।
भूयाद्भवतु भविता विद्यतां श्रीर्जगत्त्रये ॥
संपद्यते जायते च जजत्युत्पद्यते जगत् ।
संभवत्याविर्भवति प्रादुर्भवति सर्वदा ॥
तिष्ठत्यास्ते वर्तते च वसत्यत्र गृहे रमा ।
प्राणिति श्वसिति श्रेयान्यः परार्थाय जीवति ॥

End:

धूनोत्याप्नोति शक्नोति तक्षे(क्ष्णो)ति(च) मिनोति च ।
सुनोत्याद्या इमे तु श्नुविकरण्यभिधाः स्मृताः ॥

No. **1513.** धातुप्रयोगकारिका.

DHĀTUPRAYŌGAKĀRIKĀ.

Substance, palm leaf. Size, $15\frac{3}{4} \times 1\frac{5}{8}$ inches Pages, 12. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kriyānighaṇṭu 7*a*.

Incomplete. Same as the last.

No. **1514.** आख्यातचन्द्रिका.

ĀKHYĀTACANDRIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 27. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 7*a*. The other works herein are: Avyayārṇava 1*a*, Nānārtharatnapadapētikā 21*a*, Nānārthaśabdaratnam 34*a*, Paryāyapadamañjarī 60*a*, Nāmalingānuśāsana 76*a*, Śabdaśabdārthamañjūṣāvyākhyā 157*a*, Nānārthaśabdaratnavyākhyā 190*a*.

Complete.

A metrical work on Sanskrit verbs by Bhaṭṭamalla.

For extracts see pages 178 to 182 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., No. 2.

No. **1515.** आख्यातचन्द्रिका.

ĀKHYĀTACANDRIKĀ.

Substance, paper. Size, $11\frac{1}{4} \times 7\frac{3}{4}$ inches. Pages, 24. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol 6*a*. The other works herein are: Avyayārnavam 1*a*, Nānārthapadapēṭika fol. 18*a*, Nānārthaśabdaratnam fol. 30*a*, Paryāyapadamañjarī 53*b*, Śabdaśabdārthamañjūśāvyākhyānam 70*a*, Nānārthaśabdaratnavyākhyānam 92*b*, Paryāyasabdaratnam 119*a*, Śabdalingārthacandrikā 156*a*, Śabdalingārthacandrikāvyākhyā 185*a*, Śabdalingārcanacandrikāvyākhyānavyākhyānam 222*a*, Nānārtharatnamālā 235*a*, Dvirūpakōśaḥ 283*a*.

Same as the last.

No. 1516. आख्यातचन्द्रिका.

ĀKHYATACANDRIKĀ.

Substance, paper. Size, 6½ × 8 inches Pages, 54. Lines, 28 on a page. Character, Dēvanāgarī Condition, good Appearance, new

Copied by C. Rāmasvāmi Ayya in 1893.

Complete.

Same as the last.

No. 1517. पदस्मृतिः

PADASMṚTIḤ.

Substance, palm-leaf. Size, 15⅛ × 1¼ inches Pages, 276. Lines, 7 on a page. Character, Grantha Condition, injured Appearance, old.

Incomplete.

This is a treatise on verbal roots and their derivatives like the Dhātuvṛtti of Mādhavācārya. The author is not known.

Beginning:

अथ धातुपदोपदेशः—

धातवो दशधा भिन्नाः पाठे विकरणैस्तु ते ।

शब्लुक्श्लश्यन्श्नुशश्नश्च श्नाणिर्विकरणा दश ।

गणादीन् गणसामान्यन्यायगत्यै प्रदर्श्य तु ।
आद्याद्या अज्झलन्ताश्च लक्ष्यन्तेऽशेषधातवः ॥

सरूपार्थातिशयिनस्त्वेकवाक्यास्सजातयः ।
अशब्विकरणोपेता गणद्योत्यनुबन्धिनः ॥

स्वरितेदनुदात्तेतावपि स्तौ(स्तो)ञिन्ङितौ त्विह ।
ऐ(ऋ)दिद्धल्नेट् कुटाद्येदित् ऌदित् स्यात् द्युत्पुषादि च ॥
कित्फणादिर्गिद्यजादिः जिज्वलादी रथादिझित् ।
तिच्चुराद्यन्निन्मुचादिः पित्प्वादिल्वादिरप्यपू(पु)ः ॥

बिच्छमादिर्मित्त्रतिज्ञो मिन्नाण्यं रित्तु वैदिकः ।
अजन्तोऽनिट्त्वदूदृत्सेट्श्विश्रिडीङ्शीङ्युणावपि ॥
रुस्नुक्षुक्ष्ण्णूर्ण्वादिवृङ्वृञ्हलन्ताश्शबला अपि ।
आइआद्यनुबन्धार्थौ यथाशास्त्रं प्रवर्तते ॥
लड्लोटौ लङ्लिङावाशीः लिङ्लुङ्लृङ्लट्लुटोऽथ लिट् ।
इति क्रमेण भूवादिधातूनां रूपमुच्यते ॥

भू सत्तायाम्; भू इत्ययं शब्दः अस्तिक्रियायां वर्तते। एवं करोतिविलासा शेषधातुवृत्तिः । भूवादयो धातवः । गणपठितभूवादिशब्दा धातुसंज्ञाः । वकारस्तु उञो वो विधि[:] रुवर्णमात्रादभक्तोऽप्यस्तीति ज्ञापनार्थः । तेन स उवेकविंशवर्तनिः, उवाश्यमित्यादिसिद्धिः । ध(ा)तोरित्यधिकृत्य, लः कर्मणि च भावे चाकर्मकेभ्यः ।

* * * *

Colophon:

इति श्रीमत्पदस्मृतौ कर्तृलकारोपदेशस्समाप्तः ॥
भ्वदह्वौ दिवि सूतुद्रुत्तन् क्री चुर इमे दश ।
नीता (:) कर्तरि कर्मादौ नीयन्ते ससनादय ॥

* * * *

इति श्रीमत्पदस्मृतौ गणादिदशधातूपदेशस्समाप्तः ॥

*   *   *

इति काला(र्थे)प्रत्ययविधिः समाप्तः ॥

End:

इदित्त्वात् न नलोपः । आञ्छीत्, आञ्छ, आञ्छिछि(चिच्छि)षति, आञ्छयति, आञ्चिछत् । क्विप्—आन् ॥

No **1518.** कविकल्पद्रुमः सव्याख्यः.

KAVIKALPADRUMA WITH COMMENTARY.

Substance, paper. Size, 13⅛ × 5⅛ inches. Pages, 23. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Incomplete.

This is a treatise on verbs by Bōpadēva, with the commentary called Dhātudīpikā by Durgādāsa Śarman

Beginning of the text :

शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥
मतानि तेषामालोक्य सर्वसाधारणस्स्फुटः ।
धातुपाठः स्वदाद्याद्यक्रमादन्तादिकक्रमः ॥
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च ।
धातवः पठिताः पाठसूत्रलोकागमस्थिताः ॥

Beginning of the commentary

नत्वा श्रीशगिरीशौ श्रीदुर्गादासशर्मणा क्रियते ।
कविकल्पद्रुमटीका [वि]शुद्धतरा धातुदीपिका नाम ॥
कति कति सन्त्यपि सन्तः सन्तोषं न(नो) भजन्त इतरगुणे ।
ये परगुणलवलुब्धाः दुर्गादासश्रमो भवेत्तेभ्यः ॥
सुखाय छात्रवर्गाणामत्रेति परिभाष्यते ।
अन्तस्स्थास्स्युर्यरलवा अ आ इत्यादयस्स्वराः ।
ऊष्माणः स्युः शषसहा अन्त्यात्प्रागुपधा भवेत् ॥

श्रीबोपदेवो धातुपाठं चिकीर्षुः प्रारिप्सितपरिसमाप्तये शिष्टाचारप्राप्त-मङ्गलमाचरति शब्दाकरेत्यादि ।

End of the text:

शिनञ्निशाने ह्रौ ओश्वीर्गतिवृद्ध्योः ष्मिङस्स्मिते ।
षिन् अगृबन्धे स्मिकङनादरे हिन् वर्धने गतौ ॥
एकोनविंशतिरमी इकारान्तास्तु धातवः ।
इति इकारान्तवर्गः ॥

End of the commentary:

हिन् वर्धने गतौ गतिरिहान्तर्भूतण्यर्थत्वात् गतिः प्रेरणं, न प्रहिणु स्वसूनुमिति भट्टिः. वर्धने विरलप्रयोगः ।

एकोनविंशतिरमी इकारान्तास्तु धातवः ।
इति इकारान्ताः ॥

No. 1519. गजसूत्रार्थः.
GAJASŪTRĀRTHAḤ.

Pages, 32. Lines, 11 on a page. Character, Dēvanāgarī.

Begins on fol. 1*a* of the MS. described under No. 1270.

Complete.

This deals with the meaning of the 57th Sūtra of the 3rd Pāda of the I Adhyāya in Pānini's Aṣṭadhyāyī and refers to the

Ātmanēpada of verbs in certain significations. This Sūtra is, in view of the number and size of the comments on it, called Gajasūtra.

Beginning:

शिवं शिवप्रदं नित्यं रामं रमयतां वरम् ।
इन्द्रप्रमुखदेवेशं सरस्वत्याश्रयं भजे ॥
सूत्रवार्तिकभाष्याणामाशयं बोद्धुमक्षमाः ।
वृत्तिकृत्प्रमुखास्सर्वे वि(ब)भ्रमुर्गजसूत्रके ॥
अतो भाष्यमवष्टभ्य सूत्रव्याख्यापुरस्सरम् ।
वृत्तिकृत्प्रमुखग्रन्थान्दूषये पङ्क्तिपूर्वकम् ॥

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने—ण्यन्तादात्मने(पदं)स्यादनाध्याने; अणौ यत्कर्म णौ चेत्स कर्ता स्यात् ।

End:

इत्थं भाष्यादिग्रन्थान् वृत्त्यादिग्रन्थांश्चालोच्य को वा भाष्यकारानुमतोऽर्थ इति मात्सर्यमुत्सार्य सुधियो विदाङ्कुर्वन्तु ॥

समाप्ता ॥

संवत् । १८८८. चैत्रकृष्णनवमीं

No. **1520.** गजसूत्रार्थः.

GAJASŪTRĀRTHAḤ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 58. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

This is also called Gajasūtravādārtha. The author is Vēṅkaṭadāsa.

First and second Paricchēdas complete; third incomplete.

Beginning:

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरस्थ . . . . वस्तु स्वस्तिकृदस्तु नः ॥

इह खलु णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने इत्यनेनाण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकानाध्यानार्थकण्यन्ताव्यवहितोत्तरवर्तिलत्वमुद्देश्यतावच्छेदकीकृत्यात्मनेपदं विधीयत इति सैद्धान्तिकी पद्धतिः । तथा हि—प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषाबलाण्णेरित्यनेन ण्यन्तादिति लब्धमात्मनेपदाक्षिप्तलकारेण सम्बध्यते ।

* * * *

Colophon:

इति श्रीशठमर्षणकुलतिलकस्य सकलवेदान्तविद्यानिषद्यायितहृदयकमलस्य श्रीनिवासतातार्यनन्दनस्य भरतगान्धर्वकळानुबन्धबन्धुराष्टभाषाभूषितचतुर्विधकवितानिर्वहणधूर्वहस्य पूर्वोत्तरमीमांसापारावारपारीणस्य आन्वीक्षकीव्याकरणशिक्षणदक्षिणस्य श्रीमदण्णयाचार्यदीक्षितस्य नन्दनेन तदनुजसर्वतन्त्रस्वतन्त्रश्रीनिवासार्यकरुणाकटाक्षलब्धविद्याविकासेन वेङ्कटदासेन कृते गजसूत्रवादार्थे स्वसिद्धान्तसमन्वयो नाम प्रथमपरिच्छेदः ॥

* * * *

इति श्रीशठमर्षणकुलतिलकस्य . . . . वेङ्कटदासेन कृते गजसूत्रवादार्थे भट्टोजिदीक्षितमतनिरसनं नाम द्वितीयः परिच्छेदः ॥

No. **1521.** धात्वर्थवादः.

DHĀTVARTHAVĀDAḤ.

Substance, paper. Size, 10 × 4⅜ inches. Pages, 7. Lines, 12 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

This is a small work on the relative importance of Prathamāntārtha and Dhātvartha, that is, of the subject and the predicate in a sentence : by Acalōpādhyāya.

Beginning:

धात्वर्थः प्रथमान्तार्थः प्रधानमिति संशये ।
श्रीमानचलशर्मासौ वक्तुं किञ्चिद्व्यवस्थितः ॥

घटो भवतीति वाक्यात् प्रथमान्तार्थमुख्यविशेष्यकबोधसमर्थमिदं वाक्यमित्याकाङ्क्षां प्रतिसन्दधानो मुख्यविशेष्यं प्रथमान्तार्थं प्रत्येति, क्रियामुख्यविशेष्यकबोधसमर्थमिदं वाक्यं यः प्रतिसन्धत्ते स तु प्रधानभूतां क्रियामेवावगच्छतीति सिद्धान्तः । अत्र वैयाकरणाः सर्वत्र क्रियाया एव प्रधान्यं न तु प्रथमान्तार्थमुख्यविशेष्य(स्य) ।

End:

तथा हि कर्तृप्रत्ययस्थले फलस्य व्यापारविशेषणत्वं प्रथमान्तार्थस्य विशेष्यतोपपत्तिः नान्यथा, कर्मप्रत्य(य)स्थलेषु व्यापारस्य फलविशेषणत्वमेव प्रथमान्तार्थो मुख्यविशेष्यो न तु फलस्य व्यापारविशेषणत्व इति पुत्र इष्यते, पुत्रम् इच्छाति इत्यनयोरर्थभेद इति भवति गौडमतानामपि परिष्कार इति सङ्क्षेपः ॥

Colophon:

इति श्रीमदचलोपाध्यायकृतो धात्वर्थवादार्थस्समाप्तः ॥

No. 1522. वृत्तिदीपिका.
VṚTTIDĪPIKĀ.

Pages, 30. Lines, 16 on a page.

Begins on fol. 15*b* of the MS. described under No. 1486.

Incomplete.

A work on the relation of words to their import, by Śrīkṛṣṇabhaṭṭa of Kūni family.

Fifteen leaves from fol. 15, and twelve leaves from fol. 38 contain the work.

Beginning :

सजलजलदकालं सर्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाभ्यक्तफालम् ।
विहि(ह)तदुरितजालं विकचराजीवनालं
विलसितवनमालं नौमि गोपालबालम् ॥
ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
कुनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

इह सकलजनाभिलषितमोक्षमु(सु)खोपायात्मतत्त्वज्ञानस्य तत्त्वमस्यादिमहावाक्यार्थबोधजन्यव(त्वा)च्छाब्दबोधे वृत्तिग्रहजन्योपस्थितेर्हेतुत्वाद्वृत्तिर्निरूप्यते ।

End :

अनन्तप्रागभावध्वंसकल्पने विपरीतगौरवापत्तेः । तस्मात् "आत्मन आकाशस्संभूतः" इत्यादिश्रुत्या आकाशस्याप्युत्पत्तिप्रलयश्रुत्या आकाशस्याप्यनित्यत्वप्रसङ्गः ॥

No. 1523. आकाङ्क्षावादः.

ĀKĀṄKṢĀVĀDAḤ.

Pages, 72. Lines, 11 on a page.

Begins on fol 51*b* of the MS. described under No. 1486.

Incomplete.

This work deals with the desiderata of a complete sentence.

Beginning :

वाक्यसमयग्राहिका या आकाङ्क्षा सा चैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यद्ज्ञानं तद्विषयेच्छा अस्यान्वय्यर्थः क इत्येवंरूपा पुरुषनिष्ठैव ; तथापि तस्याः आकाङ्क्षाविषयेऽर्थे आरोपः एतदेवाभिधा[ना] पर्यवसानमित्युच्यते । अयमर्थोऽर्थान्तरमाकाङ्क्षते इति व्यवहारात् । पदे तु नारोपः मानाभावात् ।

End:

एवञ्च ऋष्यनुभवसिद्धाभेदान्वयादाख्यातप्रत्ययस्यापि धर्मिवाचकत्व सिद्धिः । किञ्च कर्माख्याते तव कृतेराख्यातार्थत्वाभावेन तृतीयान्ता

No 1524. स्फोटवादः.

SPHŌṬAVĀDAḤ.

Pages, 15 Lines, 15 on a page

Begins on fol 30*b* of the MS described under No. 1486 These 8 leaves are introduced in the middle of Vṛttidīpikā.

This work discusses the nature of what constitutes a complete. vocal expression.

Incomplete

Beginning:

ननु कः स्फोटो नामेति चेत्? शृणु वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जाति-स्फोटा इति वैयाकरणसिद्धान्तः । तत्र स्फुटत्यर्थोऽस्मादिति स्फोटो वाचक इति यावत् । एवञ्च वर्णस्फोटादिपदानां वर्णादयो वाचका इत्यर्थः ।

End:

अन्यान्वयाकाङ्क्षाणां श्वेतत्वादीनां मिथोऽन्वयं विना अनुपपन्नत्वधी-सहकृतमाकाङ्क्षाज्ञानादिसहकृतञ्च ज्ञानं तेषां मिथोऽन्वयशाब्दबोधे करणमिति । अ

No 1525. व्याकरणक्रोडपत्रम्.

VYĀKARAṆAKRŌḌAPATRAM

Substance, palm-leaf. Size, 13½ × 1½ inches. Pages, 40. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Some controversial jottings on certain disputed points in Pāṇini's Vyākaraṇa.

No 1526. औणादिकपदार्णवः.

AUNĀDIKAPADĀRNAVAH.

Substance, palm-leaf. Size, 17⅛ × 1¼ inches Pages, 180 Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

3 Pādas complete; 4th incomplete

This is a work in five Pādas by Pērusūri, son of Vēṅkatēśvarī and Vēṅkaṭēśvara, pupil of Vāsudēvādhvarin and a descendant of Śrīdhara It gives in verse the meaning and derivation of all such words as are dealt with in the Uṇādisūtras.

Beginning:

आदिव्याकरणादीनां प्रमाणं यन्निबन्धनम् ।
तस्मै विश्वात्मने वृद्धप्रयोगब्रह्मणे नमः ॥

श्रीकाञ्चीनगरावासामाकाङ्क्षितफलप्रदाम् ।
कामारिप्रेयसीं शश्वत्कामाक्षीं कलयामहे ॥

जरत्कारू इवान्योन्यमाख्ययानन्ययोत्सुकौ ।
श्रीवेङ्कटेश्वरौ मातापितरौ संश्रये श्रियै ॥

स्वशय्यापक्षपातेन तदुक्तिव्याचिकीर्षया ।
अवतीर्णं हरिं वन्दे वासुदेवाध्वरिच्छलात् ॥

तच्छिष्योऽहं पेरुसूरिः मयौणादिपदार्णवः ।
क्रियते बालबोधाय वृद्धप्रामाण्यशासनात् ॥

पञ्चपादीप्रकारेण सिद्धान् शब्दानुणादिषु ।
सङ्गृह्य पद्यैः क्रमशः तत्तदर्थो निरूप्यते ॥

प्रसङ्गात्क्वचिदन्येषामपि संस्पर्शशालिनाम् ।
व्युत्पादनमिह प्रायः क्रियते धीविविक्तये ॥

कोशान् विश्वप्रकाशादीन् पर्यालोच्य विशेषतः ।
वृत्तीश्चोणादिसूत्राणां प्रयोगाणामपि स्थितिम् ॥

असन्देहाय लिङ्गानां नाम्नामपि सविस्तरम् ।
कृतः सतां मुदे भूयादौणादिकपदार्णवः ॥

स्त्रीपुंनपुंसकाख्यानां लिङ्गानामिह निर्णयः ।
अन्यकोशेष्विव प्रायो ज्ञेयः प्रकरणादिना ॥

प्रक्षिप्तसूत्रत्यागश्च क्षिप्तसूत्रार्थवर्णनम् ।
तत्पाठभेदकथनं सन्दिग्धप्रक्रिया कथा ॥

एका(षा) चतुष्टयी कोशादन्यस्मादिह भाति का ।
उणादयो बहुलमित्युक्तिराचार्यदर्शिता ॥

सर्वेषामप्युपाधीनामन्यथात्वस्य साधिका ।
ते तु लोपागमादेशप्रकृतिप्रत्ययस्वराः ॥

यथाकामं विभिद्यन्ते स्याच्च वर्णविपर्ययः ।
संज्ञासु धातुरूपाणीत्यादिवार्तिकशासनात् ॥

अनुशिष्टाः सूत्रकृता संज्ञाः साधयितुं क्षमाः ।
संज्ञायां वर्तमाने च कालेऽर्थे स्युरुणादयः ॥

* * * *

Colophon:

पादेऽस्मिन्नुक्तश्लोकास्त्विन्दुबाणवसुसङ्ख्यया ।
अर्थेनापि समायुक्ताः श्रीमता पेरुसूरिणा ॥

इत्युणादिषु प्रथमः पादः ॥

* * * *

इति श्रीधरवंश्येन रचिते पेरुशास्त्रिणा ।
द्वितीयपादः पूर्णोऽभूदौणादिकपदार्णवे ॥

* * * *

इति श्री . . . . ।
तृतीयपादः . . . . ॥

सम्भूय पादत्रयश्लोकाः ४३६.

End :

भवेत्कबरपुच्छीति पुच्छान्तात्कबरादिकात् ।
नित्यं कबरमण्यादिवार्तिके ङीष्विधानतः ॥ ६० ॥ ४६० ॥

१५१ ॥ ग्र उडच् ।

तार्क्षिर्ना गरुडः कैश्चिदेतत्सूत्रं न पठ्यते ।
गरुता डयते यातीत्यर्थे डच्प्रत्यये सति ॥ ६२ ॥

लोपं पृषोदरादित्वात् तकारस्य तथोचिरे ॥ १५२ ॥
इन्देः कमिर्नलोपश्च । इद . . . ब्दः स्त्रीलिङ्गोऽयम् ॥

No. **1527.** शब्दानुशासनम्.

ŚABDĀNUŚĀSANAM.

Pages, 53. Lines, 11 on a page.

Begins on fol. 53*b* of the MS. described under No. 1267. Six leaves immediately before the last leaf are lost; hence this MS. does not contain Sūtras IV. 1. 212 to IV. 4. 81.

A work, in Sūtra style, on Sanskrit Grammar, consisting of four Adhyāyas, by Śākaṭāyana, a Jaina priest. The system adopted here is somewhat different from that of Pāṇini and is in some respects an improvement upon his system.

Beginning :

नमः श्रीवर्धमानाय प्रबुद्धाशेषवस्तवे ।
येन शब्दार्थसम्बन्धाः सर्वे च सुनिरूपिताः ॥

अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । ञमङणनम् । जबगडदश् । झभघढद(ध)ष् । खफद(छ)ठथट् । चटतव् । कपय् । शषसंः‿क‿पर् । हल् ।

सात्मेतेत् । उता स्वः । तेयान् । भाव्योऽग् । अप्रयोगीत् ।

End:

क्रियायां तदर्थायां वुण् लट् च । कर्मणोऽण् । १५५ लिङ् तुमिच्छार्थे तुल्यकर्तृके ॥ १५६ ॥

Colophon:

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समासोऽध्यायश्चतुर्थः ॥

गणनेयं सूत्राणामनुष्टुभामर्धसप्तमशतीह ।
त्रीणि सहस्राणि शते द्विषट् त्रिंशच्च योगानाम् ॥

No. 1528. धातुपाठः.
DHĀTUPĀṬHAḤ.

Pages, 28. Lines, 11 on a page.

Begins on fol. 41*a* of the MS. described under No. 1267.

Complete.

The roots of the Sanskrit language arranged according to Śākaṭāyana. This list of roots differs in some respects from that of Pāṇini

Beginning:

श्रीविद्याप्रकृतिं नत्वा जिनं शब्दानुशासने ।
मूलप्रकृतिपाठोऽयं क्रियार्थेङ्गणसिद्धये ॥

एधि-वृद्धौ । स्पर्धि-सङ्घर्षे । गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । बाधृङ्-रो(लो)डने ।

End:

प्रस्थानप्रस्मृतिपदे विरुद्धार्थस्य दर्शनात् ।
संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत् ॥

उपसर्गवशाद्धातुरनेकार्थप्रकाशकृत् ।
प्रहाराहारसंहाराविहारपरिहारवत् ॥

Colophon:

इति शाकटायनीये महाव्याकरणे धातुपाठस्समाप्तः ॥

No. 1529. धातुपाठः.
DHĀTUPĀṬHAḤ.

Substance, palm-leaf Size, 12½ × 1⅝ inches Pages, 23. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 47*a*. The other works herein are Vṛttisiddha-rūpasaṅgraha 1*a*, Prakriyāsaṅgraha 39*a*.

Complete.

Same as the last.

No. 1530. शब्दानुशासनव्याख्या - रूपसिद्धिः.
ŚABDĀNUŚĀSANAVYĀKHYĀ: RŪPASIDDHIḤ.

Substance, palm-leaf (Śrītāla). Size, 22¼ × 2¼ inches. Pages, 51. Lines, 15 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śabdānuśāsana-vṛtti 27*a*.

Pūrvārdha, complete : Uttarārdha, incomplete

A commentary on Śākaṭāyana's Śabdānuśasana The author is not known.

Beginning:

श्रीवीरममलं पूर्णधीदृग्वीर्यसुखात्मकम् ।
नत्वा देवमबाधोक्ति रूपसिद्धिं हितां ब्रुवे ॥

तत्र प्रथमं शास्त्रे सम्प्रयोगार्थं संज्ञासिद्धिरुच्यते—अ इ उ ण् । ऋक् । ए ओङ् । ऐ औच् . . . . रल्, जल्, शल्, इत्यष्टात्रिंशत्प्रत्याहारार्थः । तथा चोक्तम्—

एको णङटवाद्ग्राह्यो द्वौ ञशात् कयतस्त्रयः ।
चत्वारश्चमरात् षट् स्युर्यथायोगं षलाद्बुधैः ॥

तत्राणित्येतत्प्रत्याहारविधिरुच्यते—

अ इ उणित्यत्र णकारस्य । अप्रयोगीत् । इहोपदिश्यमानो वर्ण-स्समुदायो वा यो लैकिके.

End:

अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत इत्यादि । गाङ्भा(ङ्भा)वे — अध्यैष्ट अध्यैषाताम्, अध्यैषत इत्यादि । कर्मणि—अध्यगायि, अध्य-गायिषाताम्, अध्यगायिषत, इत्यादि । गाङ्भा(ङ्भा)वे - अध्यायि, अध्यैषा-ताम्, अध्यैषत, इत्यादि । ञिटि—अध्यायिष्ट अध्यायिषाताम्, अध्या-यिषत, इत्यादि । ऌङि -अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त, इत्यादि । गाङ्भा(ङ्भा)वे —अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त, इत्यादि । लुटि—अध्येता, अध्येतारौ, अध्येतारः, इत्यादि । अध्येष्यते, अध्येष्येते अध्येष्यन्ते, इत्यादि । ञिटि—अध्यायिष्यते, अध्यायिष्येते, अध्यायिष्यन्ते, इत्यादि । णौ सनि —अधिजिगापयिषति, अध्यापिपयिषति । णौ ङे ॥

No. 1531. शब्दानुशासनवृत्तिः—चिन्तामणिः.

SABDĀNUŚĀSANAVṚTTIḤ: CINTĀMAṆIḤ.

Pages, 30. Lines, 16 on a page.

Begins on fol. 27*a* of the MS. described under No. 1530.

Breaks off in the 3rd Pāda of Adhyāya I.

A commentary on the Śabdānuśāsana of Śākaṭāyana by Yakṣavarman. The Śākaṭāyanasūtras are, in the introduction here, very favourably compared in general terms with Pāṇini's grammar. The extent of the commentary is mentioned to be 6,000 *granthas*, and it is said by the author to be so easy as to enable a beginner or even a woman to master the grammar in one year.

Beginning:

श्रियं क्रियाद्वस्सर्वज्ञज्ञानज्योतिरनश्वरीम् ।
विश्वं प्रकाशय(ये)च्चिन्तामणिश्चिन्तार्थसाधनः ॥ १ ॥
नमस्तम(:)प्रभावाभिभूतभूद्योतहेतवे ।
लोकोपकारिणे शब्दब्रह्मणे द्वादशात्मने ॥ २ ॥
स्वस्ति श्रीसकलज्ञानसाम्राज्यपदमाप्तवान् ।
महाश्रमणसङ्घाधिपतिर्यः शाकटायनः ॥ ३ ॥
एकः शब्दाम्बुधिं बुद्धिमन्दरेण प्रमथ्य यः ।
सयशश्श्रि(श्रीः)समुद्दध्रे विश्वं व्याकरणामृतम् ॥ ४ ॥
स्वल्पग्रन्थं सुखोपायं सम्पूर्णं यदुपक्रमम् ।
शब्दानुशासनं सर्वमर्हच्छासनवत्परम् ॥ ५ ॥
इष्टिर्नेष्टा न वक्तव्यं वक्तव्यं सूत्रतः पृथक् ।
सङ्ख्यातं नोपसङ्ख्यानं यस्य शब्दानुशासने ॥ ६ ॥
तस्यातिमहतीं वृत्तिं संहृत्येयं लघीयसी ।
सम्पूर्णलक्षणा वृत्तिर्वक्ष्यते यक्षवर्मणा ॥ ७ ॥
ग्रन्थविस्तरभीरूणां सुकुमारधियामयम् ।
शुश्रूषादिगुणात्कर्तुं शास्त्रे संहरणोद्यमः ॥ ८ ॥
शब्दानुशासनस्यान्वर्थायाश्चिन्तामणेरिदम् ।
वृत्तेर्ग्रन्थप्रमाणं तु षट्सहस्रं निरूपितम् ॥ ९ ॥
इन्द्रचन्द्रादिभिश्शाब्दैर्यदुक्तं शब्दलक्षणम् ।
तदिहास्ति समस्तं च यन्नेहास्ति न तत्क्वचित् ॥ १० ॥
गणधातुपाठयोर्गणधातूल्लिङ्गानुशासने लिङ्गगतम् ।
औणादिकानुणादौ शेषं निश्शेषमत्र वृत्तौ विद्यात् ॥ ११ ॥

बालाबलाजनोऽप्यस्या वृत्तेरभ्यासवृत्तितः ।
समस्तं वाङ्मयं वेत्ति वर्षेणैकेन निश्चयात् ॥ १२ ॥

तत्र सूत्रस्यादावयं मङ्गलश्लोकः—नमः श्रीवर्धमानायेत्यादि । शब्दार्थसम्बन्धा वाचकवाच्ययोग्यताः ; अथ वा आगमप्रयोजनोपायोपेयभावास्ते येन सर्वसत्त्वाहितेन तत्त्वतः प्रज्ञापिताः तस्मै श्रीमते महावीराय साक्षात्कृतसकलद्रव्याय नमस्करोमीत्यध्याहारः । इति विघ्नप्रशमनार्थमर्हद्देवतानमस्कारं परममङ्गलमारभ्य भगवानाचार्यश्शाकटायनश्शब्दानुशासनं शास्त्रमिदं प्रारभते—

धर्मार्थकाममोक्षेषु तत्त्वार्थावगतिर्यतः ।
शब्दार्थज्ञानपूर्वेति वेद्यं व्याकरणं बुधैः ॥

अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । ञम(ङ)णनम् । जबगडदश् । झभघढधष् । खफछठथट् । चटतव् । कपय् । शषसं अः ✕क ✕पर् । हल् ॥ १३ ॥ इति वर्णसमाम्नायः । क्रमानुबन्धोपादानः प्रत्याहारयन् शास्त्रस्य लाघवार्थः । सामान्याश्रयणाद्दीर्घप्लुतानुनासिकग्रहणम् ।

ह्रस्वदीर्घप्लुतहलो ह्येकद्वित्र्यर्धमात्रिकाः ।
नासिकामनुयातश्च वर्णस्स्यादनुनासिकः ॥

ऋ इत्यनेन लृवर्णस्यापि ग्रहणं भवति ॥

* * * *

Colophon:

इति शब्दानुशासने चिन्तामणौ वृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

काण्डादक्षेत्रे ॥ ३८.—काण्डान्तात् द्विगोर्लुचि सत्यां तदन्तात् स्त्रियां वर्तमानात् अक्षेत्रे विषये ङी भवति । द्वे काण्डे प्रमाणं यस्यास्सा

द्वाभ्यां काण्डाभ्यां क्रीता वा द्विकाण्डी, त्रिकाण्डी । अन्यत्र द्विकाण्डा त्रिकाण्डा क्षेत्रभक्तिः । पुरुषात्प्रमाणाद्वा ॥ ३९. आयामः प्रमाणम् । प्रमाणवाची यः पुरुषशब्दस्तदन्ताद्विगोर्लुचि सत्यां स्त्रियां ङी वा भवति, द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी द्विपुरुषा परिखा । नः पत्यन्तस्य ॥ ४०.— पतिशब्दान्तस्य स्त्रियां नकारादेशो वा भवति । दृढपत्नी दृढपतिः । सपत्न्यादौ ॥ ४१.—सपत्न्यादिषु स्त्रियां नित्यं नादेशः । समानस्य सभावः, पुम्भावाभावश्च निपात्यते ॥

No. 1532. शब्दानुशासनव्याख्या—अमोघवृत्तिः.

ŚABDĀNUŚĀSANAVYĀKHYĀ: AMŌGHAVṚTTIḤ.

Substance, paper. Size, 12½ × 8¼ inches. Pages, 501. Lines, 19 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new

Copying finished in 1891.

Contains the first two Adhyāyas.

This is a commentary on the Śabdānuśāsana of Śakātāyana.

For extracts see page 169 of Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1893—94.

No. 1533. अमोघवृत्तिः.

AMŌGHAVṚTTIḤ.

Substance, paper. Size, 12½ × 8¼ inches. Pages, 461. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the Adhyāyas III and IV.

Same work as the above.

No. 1534. प्रक्रियासङ्ग्रहः.

PRAKRIYĀSANGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 18⅜ × 2 inches Pages, 242. Lines, 10 on a page Character, Kanarese. Condition, good. Appearance, old.

Complete.

This was copied by Dēvarasa, son of Candu Indra.

This is a work on grammar according to Śākaṭāyana's Śabdānuśāsana by Abhayacandrasiddhāntasūri The aphorisms are herein taken up in the synthetical order of the logic of grammar.

Beginning:

मुनीन्द्रमभिवन्द्याहं पाल्यकीर्तिं जिनेश्वरम् ।
मन्दबुद्ध्यनुरोधेन प्रक्रियासङ्ग्रहं ब्रुवे ॥

तत्रादौ शास्त्रे संव्यवहारार्थं संज्ञासङ्ग्रहः कथ्यते । अ इ उण् । ऋक् । ए ओङ् । ऐ औच् । हयवरलञ् । ञमङणनम् । जबगडदश् । झभघढधष् । खफछठथट् । चटतव् । कपय् । शषस(ं)अः≍क≍पर् । हल् । इति वर्णसमाम्नायः अणादिप्रत्याहारार्थः । तत्राणित्येतत्प्रत्याहारविधिरुच्यते । अप्रयोगीत् ॥ २ ॥

इहोपदिष्टो वर्णः समुदायो वा यो लौकिकशब्दप्रयोगे न दृश्यते स इत्संज्ञो भवति ।

End:

इच्छार्थे तुल्यकर्तृकतदर्थे क्रियान्तरे उपपदे धातोर्लिङ्तुमौ भवतः । भुञ्जीयेतीच्छति भोक्तुमिच्छति कामयते इत्याद्यनुक्तं सर्वशास्त्रे ज्ञेयम् ॥

इतिकृत्सङ्ग्रहस्समाप्तः ॥ (Total) 2731.

वन्दारुबृन्दपरिघट्टिविलोलिताक्ष-
बृन्दारकेश्वरकिरीटतटावकीर्णैः ।
मन्दारपुष्पनिकरैर्विहितोपहारं
वन्दामहे जिनपतेः पदपद्मयुग्मम् ॥

यो जानाति समं समस्तमनिशं यं सूरयस्संश्रिताः
येनादार्शि विमुक्तिवर्त्म सुधियो यस्मै स्पृहां कुर्वते ।
यस्मात्तत्त्वविनिश्चयोऽप्रतिहतं यस्यैव शास्त्रं जयो
यस्मिन्विस्मयनीयपुण्यमहिमा भूयात्स वः श्रेयसे ॥

सुविवेचितपदरूपा प्रकरणचरणा प्रवेशमुखशुद्धा ।
वाङ्मयमूर्तिस्सौरी कृतिरियमधिवसतु बुधहृदयम् ॥

श्रीचतुर्विंशतितीर्थकरपरमदेवेभ्यो नमः ॥

बिन्दुदुर्लिपिविसर्गवीथिकाश्रृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजडबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥

श्रीजिनेश्वराय नमः ॥

* * * *

गहनं व्याकरणं स्यात्
तत्रापि प्रक्रिया महागहना ।
लिङ् लुङ् सन्यङ् कष्टं
तस्मादपि चेङ्गुरं कष्टम् ॥

* * * *

Colophon :

श्रीमदभयचन्द्रसिद्धान्तसूरिविरचिते शाकटायनमहाव्याकरणे कृत्सङ्ग्रहस्समाप्तः ॥

No 1535. प्रक्रियासङ्ग्रहः.

PRAKRIYĀSAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla) Size, 15 × 2¼ inches Pages, 276. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Pūrvārdha complete.

Same as the above.

No. 1536. प्रक्रियासङ्ग्रहः.

PRAKRIYĀSAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 17 × 2½ inches. Pages, 226. Lines, 8 on a page Character, Grantha. Appearance, old.

Uttarārdha complete.

Same as the above.

Copied by Pārśvanātha and completed on the 2nd of the Kārtikaśuddha of Virōdhi, Śālivāhanaśaka 1751.

No. 1537. प्रक्रियासङ्ग्रहः.

PRAKRIYĀSAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 18¾ × 1¾ inches. Pages, 44. Lines, 8 on a page. Character, Kanarese. Condition, Injured. Appearance, old.

Incomplete. Same as the above.

No. 1538. प्रक्रियासङ्ग्रहः.

PRAKRIYĀSAṄGRAHAḤ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 39*a* of the MS. described under No 1529.

Sandhi ; complete.

No. 1539. लिङ्गानुशासनम्.

LINGĀNUŚĀSANAM.

Pages, 7. Lines, 10 on a page.

Begins on fol 37*a* of the MS described under No. 1267

Complete.

A work on the gender of Sanskrit words by Śākatāyana

Beginning :

श्रीवृक्षलिङ्गमङ्गं यस्य चतुस्त्रिंशदतिशया लिङ्गम् ।
तस्मै नमः स्त्रि(लि)लिङ्गालिङ्गाक्षरभावलिङ्गाय ॥

नब्ध्यङ् सन्तमवेदो जरं तथामं न कर्तरि त्रान्तम् ॥
त्वाद्यात्त्वड्वहुलं प्युपुक्ता नखभावोऽव्ययीभावः ॥

End :

लिङ्गेसुत्र धात्वव्ययवाक्यमवचनं च बहुलमिदम् इति त्रिलिङ्गम् ॥

वाग्विषयस्य तु महतः संक्षेपत एष लिङ्गविधिरुक्तः ।
यन्नोक्तमत्र सद्भिस्तल्लोकत एव विज्ञेयम् ॥

No 1540. कातन्त्ररूपमाला.

KĀTANTRARŪPAMĀLĀ.

Substance, palm-leaf (Śrītāla). Size, 21½ × 2 inches. Pages, 136. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Breaks off in Kṛtprakaraṇa.

A commentary by Bhāvasēna on the Kātantra of Sarvavarman of the Kaumāra school. The peculiarity of the work is that metrical stanzas containing the meaning of the aphorisms are also given in addition to the aphorisms.

Beginning:

वीरं प्रणम्य सर्वज्ञं विनष्टाशेषदोषकम् ।
कातन्त्ररूपमालेयं बालबोधाय कथ्यते ॥

नमस्तस्यै सरस्वत्यै विमन(ल)ज्ञानमूर्तये ।
विचित्रा लोकयात्रेयं यत्प्रसादात्प्रवर्तते ॥

सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः । ते के? । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व श ष स ह । तत्र चतुर्दशादौ स्वराः । तस्मिन् वर्णसमाम्नाये आदौ चतुर्दश वर्णाः स्वरसंज्ञा भवन्ति । ते के? अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । दश समानाः । तस्मिन् वर्णसमाम्नाये आदौ दश वर्णाः समान-संज्ञा भवन्ति । ते के? अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ । तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ ।—तेषां समानानां मध्ये द्वौ द्वौ वर्णौ अन्योऽन्यस्य सवर्णसंज्ञौ भवतः । तौ कौ? अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ । तेषां ग्रहणं किमर्थम्? तेन ह्रस्वयोर्द्वयोर्द्वयोर्दीर्घ-योश्च सवर्णसंज्ञार्थम् ।

क्रमेण वैपरीत्येन लघूनां लघुभिस्सह ।
गुरूणां गुरुभिस्सार्द्धं चतुर्द्धेति सवर्णता ॥

No 1541. कातन्त्ररूपमाला.

KĀTANTRARŪPAMĀLĀ.

Substance, palm-leaf (Śrītāla). Size, 21 × 1¾ inches. Pages, 76. Lines, 10 on a page. Character, Kanarese Condition, injured. Appearance, old.

Same as the above. Incomplete and imperfect. The first fol. is numbered 19 and the last 56.

This MS. is said to have beencopied by Śāntinātha, son of Ādappagaḍa and the transcription was completed on Thursday, the 15th of Mārgaśira-Suddha of Visu year.

End:

निमूलकाषं कषति -- निमूलं कषतीत्यर्थः । समूलं कषणं कषति—समूलकाषं कषति—समूलं कषतीत्यर्थः, इत्यादिप्रयोगानुसर्यैनुसर्तव्यम् ॥

Colophon:

इति कृदन्तस्समाप्तः ॥

भावसेनस्त्रिविद्यार्यो वादिपर्वतवज्रभृत् ।
कातन्त्ररूपमालाख्यां वृत्तिं व्यररचत् सुधीः ॥

मन्दबुद्धिप्रबोधार्थं भावसेनो मुनीश्वरः ।
कातन्त्ररूपमालाख्यां वृत्तिं व्यररचत्सुधीः ॥

क्षीणेऽनुग्रहकारिता समजने सौजन्यमात्मादिके
सन्मानं नुतभावसेनमुनिपे त्रैविद्यदेवे गुरौ ।
सिद्धान्तोऽयमथापि यः स्वधिषणागर्वोद्धतः केवलं
संस्पर्धेत तदीयगर्वमदरे(थने) वज्रायते मद्वचः ॥

कवयः के वादिनः के मृदुमधुरवचोवाग्मिनः के नराणां
परमत्रैविद्यचक्रेश्वर तव चरणे भावसेन व्रतीन्द्र ।
स्मरणज्ञा ये विशुध्द्या प्रणमनसहिता विप्रपूजान्विता ये
कवयस्तें वादिनस्ते मृदुमधुरवचोवाग्मिनस्ते धरित्र्याम् ॥
मा बौद्ध प्रचुरं प्रजल्प किमिदं चार्वाक ते चापलं
किं वैशेषिक गर्वितोऽसि किमिदं साङ्ख्य प्रगल्भायसे ।
किं मीमांसक मस्तकेन बिभृषे सा(स)ध्वः प्रणामाञ्जलिं
प्रोद्भूतो भुवि भावसेनमुनिपस्त्रैविद्यचक्रेश्वरः ॥

No **1542.** कातन्त्ररूपमाला.

KĀTANTRARŪPAMĀLĀ.

Substance, plam-leaf (Śrītāla). Size, 8¼ × 2¼ inches. Pages, 142. Lines, 10 on a page. Character, Kanarese. Condition, injured. Appearance, old

Written in ink on palm-leaves

Incomplete.

Same as the above.

End:

एवं पुष्येण चन्द्रयुक्तेन युक्तः मासः पौषो मासः । पुष्येण चन्द्रयुक्तेन युक्तमहः पौषमहः । पुष्येण चन्द्रयुक्तेन युक्ता रात्रिः पौषी रात्रिः । चित्रया चन्द्रयुक्तया युक्तः कालश्चैत्रः । एवं वै सा(शा)खः, कार्त्तिकः इत्यादि । युवतीनां समूहः यौवतम् । एवं हांसम्, काकम् इत्यादि । शिवो देवतास्येति शैवः । एवं जिनो देवतास्येति जैनः ॥

No. 1543. जैनेन्द्रव्याकरणसूत्रम्.

JAINĒNDRAVYĀKARAṆASŪTRAM

Substance, palm-leaf (Śrītāla). Size, 14¼ × 2⅛ inches. Pages, 40. Lines, 12 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 104*a*. The other works herein are Prakriyāvatāra 1*a*, Jainēndradhātupāṭha 124*a*.

Contains the Sūtras of the Jainēndra school, consisting of 5 Adhyāyas of 3,568 Sūtras. The author is mentioned as Pūjyapāda, who is apparently the same person as Jainēndra.

Beginning:

लक्ष्मीरात्यन्तकी यस्य निरवद्यावभासते ।
देवनन्दितपूजेशे-नमस्तस्मै स्वयम्भुवे ॥

सिद्धिरनेकान्तात् ॥ अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषस अं अः ᳲक ᳳप र् । हल् । सात्मेतादिः ॥ १ ॥ स्वस्याभाव्योत्परोऽणुदित् ॥ २ ॥ स्वस्थानक्रियं स्वम् ॥ ३ ॥ आकालोऽच्प्रदीपः ॥ ४ ॥

Colophon:

इति जैनेन्द्रव्याकरणे प्रथमोऽध्यायः ॥

End:

हलो यमां यमि खम् । झरो झरि स्वे । चतुष्टयं समन्तभद्रस्य ॥ १६७ ॥

Colophon:

इति जैनेन्द्रव्याकरणे पञ्चमस्याध्यायस्य चतुर्थः पादः ॥.

इन्द्रश्चन्द्रश्शकटतनयः पाणिनिः पूज्यपादो
यः प्रोवाचापिशलिरमरः काशकृत्स्नस्तथान्यः ।
कृत्स्नन्यायव्यवहितपदं लक्षणं शब्दराशेः
सूत्रोपात्तं तदिह निखिलं शब्दपारायणेऽस्ति ॥
विकार्यब्दे सुतिष्ये श्रीपञ्चम्यां सौम्यवासरे ।
स्वां वैजयणुना सूच्यां लिखितं चै(वै)गतं मये(यि) ॥
जैनेन्द्रं पूज्यपादेन भाषितं शब्दवारिधेः ।
तीरोल्लङ्घनमर्त्यानां नाव्यं हतमलं मुदा ॥ ३५६८ ॥

No. 1544. जैनेन्द्रधातुपाठः.

JAINĒNDRADHĀTUPĀṬHAḤ.

Pages, 16. Lines, 12 on a page.

Begins on fol 124*a* of the MS. described under No. 1543.

Complete.

The list of Sanskrit roots according to Jainēndra.

Beginning:

प्रप्रणम्य जिनं भक्त्या संसंश्रित्याभिदागमम् ।
उपोपपाद्यते धूनामुदुत्कृष्टा मया स्थितिः ॥

भू सत्तायाम् । एधै वृद्धौ । स्पर्धै सङ्घर्षे । गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । बाधृङ् प्रतिघाते । नाधृङ् नाथृङ् याच्ञाशीरुपतापैश्वर्येषु ।

End:

वृपै तिथि(ति)क्षायाम् । तपै दाहे । वदै भाषणे । अर्चै पूजायाम् । अर्दै हिंसायाम् । शुन्धै शोधने । ऐदितः । वृञ् वरणे । धुञ् कम्पने । प्रीञ् तर्पणे । ञितः ॥

इति चुरादयो धवः समाप्ताः ॥

पाठप्रयोजनमनिण्विमनिड्विकल्प-
ड्वेडप्रवृत्तिरवचोऽनिडवागनैप ।
दो नत्वमिड्विकलता च यथाक्रमेण
धूनां सुधीभिरधिगम्य मितां स्वराणाम् ॥
पादाम्भोजानमन्मानवपतिमकुटानर्घ्य(र्घ)माणिक्यतारा-
नीकासंसेवितोद्यद्द्युतिललितनखानीतशीतांशुबिम्बः ।
दुर्वारानङ्गबाणाम्बुरुहहिमकरो ध्वस्तमिथ्यान्धकारः
शब्दब्रह्मा स जीयाद्गुणनिधिगुणनन्दिव्रतीशस्सुसौख्यः ॥

No. 1545. प्रक्रियावतारः

PRAKRIYĀVATĀRAḤ.

Pages, 206. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 1543.

Complete.

A grammatical treatise of the Jainēndra school: the Sutras are herein arranged synthetically and explained in 6 chapters. The author is probably Nēmicandra The contents of the chapters are: (1) Sandhi, (2) Nāmanirṇaya, (3) Savṛtta, (4) Prādvidhi, (5) Mijvidhi, and (6) Kṛdvidhi.

Beginning:

सर्वज्ञाय नमस्तस्मै वीतक्लेशाय शान्तये ।
येन भव्यात्मनश्चेतस्तमस्स्तोमश्चिकित्सितः ॥

अथ प्रत्याहारक्रमोऽनुवर्ण्यते । अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलण् । ञमङणनम् । झभञ् । घढधष् ।

जबगडदश् । खफछठथचटतव् । कपय् । शषस अं अः ≍क≍पर् । हल् ॥ इति प्रत्याहारसूत्राणि ॥

उक्तं च—

" स्युस्त्रयोदश सूत्राणि तावन्तश्चानुबन्धकाः ।
षट्चत्वारिंशतो वर्णाः प्रत्याहारस्य सङ्ग्रहे ॥ " इति ॥

सर्वो वर्णः अलित्युच्यते । तत्कथम् ?

सात्मेतादिः ॥ १ ॥ इता सहोच्चार्यमाणो वर्णस्समुदायो वादिभूतस्तन्मध्यपतितानां संज्ञो(ज्ञा)भवत्यात्मना सह ।

End:

पादाभ्यां ह्रियते इति पादहारकः । गलेन चुप्यते गलचोपकः अत्र कर्मणि ण्वुः । चरोड्डुक्तः । मनसि ह्नोऽपि । मनो हरतीति मनोहरी । मनोहर्यस्तनयोरतिबलस्य च ॥

Colophon:

इति प्रक्रियावतारे कृद्विधिष्षष्ठस्समाप्तः ॥

* * *

किं वाणी चतुराननः किमथ वा वाचस्पतिः किन्वसौ
विद्यानां विभवस्सहस्रवदनस्साक्षादनन्तः किमु ।
इत्थं संसदि साधवः समुदितास्संसे(शे)रते सादरं
विद्वत्पुङ्गवनेमिचन्द्र भवति व्याख्यानमातन्वति ॥

अरिकुठारावासविद्यानन्दोपाध्यायप्रपौत्रदेवरसभिषजा लिखितमिदं भवति ॥

विपूर्वकार्यब्दसुफाल्गुनस्य प्रपक्षसि ज्यारुहनाम्नि वारे ।
पूज्यक्रमेणोदितशब्दशास्त्रं समाप्ति(पि)त देवरसेन लिख्य ॥
जैनेन्द्रव्याकरण(णं) समाप्त(म्) ॥

No. 1546. सारस्वतप्रक्रिया.

SĀRASVATAPRAKRIYĀ

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 159. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Pūrvārdha, complete ; Uttarardha breaks off in Kit.

This is a work like the Siddhāntakaumudī but belonging to the grammatical school of Sārasvatas. The I. O. Library Catalogue attributes the work to Anubhūtisvarūpācārya.

Beginning :

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥
इन्द्रादयोऽपि यस्यान्तं न ययुश्शब्दवारिधेः ।
प्रक्रियान्तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥

तत्र तावत्संज्ञा संव्यवहाराय संगृह्यते । अ, इ, उ, ऋ, ऌ, समानाः। अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते ; तेषां समानसंज्ञा च विधीयते । नैतेषु सूत्रेषु सन्धिरनुसन्धेयोऽविवक्षितत्वात् । विवक्षितस्तु सन्धिर्भवतीति नियमात्, लौकिकप्रयोगनिष्पत्तये समयमात्रत्वाच्च । ह्रस्वदीर्घप्लुतभेदाः सवर्णाः । एतेषां ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा गण्यन्ते । लोकाच्छेषस्य सिद्धिरिति वक्ष्यति ; ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्या । एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः । व्यञ्जनञ्चार्धमात्रकम् । एषामन्येऽप्युदात्तादिभेदास्सन्ति । उच्चैरुपलभ्यमान उदात्तः । नीचैरनुदात्तः । समवृत्त्या स्वरितः ॥

* * * *

इति तद्धितप्रक्रिया॥ इति सारस्वतव्याकरणं पूर्वार्धं समाप्तम् ॥

अथाख्यातप्रक्रिया निरूप्यते—धातोः । वक्ष्यमाणा(:) प्रत्ययाः धातोर्ज्ञेयाः । भ्वादिः । भूसत्तायामित्यादिशब्दो धातुसंज्ञो भवति । स

च त्रिविधः । आत्मनेपदी परस्मैपद्युभयपदी चेति। आदनुदात्त[।]ङितः। अनुदात्तेतो ङितश्च धातोरादित्यात्मनेपदं भवति॥

* * * *

इत्याख्यातप्रक्रिया संपूर्णा ॥

अथ कृदन्तप्रक्रिया निरूप्यते—कृत्कर्तरि च । वक्ष्यमाणः प्रत्ययः कृत्संज्ञकः, स च कर्तरि, चाद्भावकर्मणोरपि.

End :

क्तिः । धातोः क्तिप्रत्ययो भवति स्त्रियां भावे। पचि विस्तारे । पाङ्क्तिः। पक्तिः । ऊढिः । रतिः । श्रान्तिः । ग्लानिः। संविक्तिः। संशीतिः। बुद्धिः । अनुभूतिः । कर्तरि च । कर्तर्यर्थे धा-

---

No. 1547. मुग्धबोधटीका.

MUGDHABŌDHAṬĪKĀ.

Substance, paper. Size, 12⅛ × 4½ inches. Pages, 99. Lines, 13 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete

This is a commentary on the Mugdhabōdha of Vōpadēva by Rāmatarkavāgīśa.

Beginning :

अथेति—अथशब्दो मङ्गलार्थ उक्तः न त्वानन्तर्यवचनः सित्यादिरित्यनेन त्यादिविधानात् । धोः । धोरिति सामान्यधोर्ग्रहणं तेन भ्वादिर्धुकमऋतोगुपधूपपणपनोञिङ्डीयाङायाधुः । सनन्याद्िः । धुरिति त्रयाणामेव, न तु स्त्री भ्रूर्धुरिति अस्यातिदिष्टत्वात् । साशीतिशतसंख्याकानीति न्य(अ)शीतया सह वर्तमानं साशीतिशतं संख्या येषान्तानि, अनिर्दिष्टार्थत्वात् स्वार्थ एव भवन्ति । कीखि। की च-खी च-गी च-घी च-टी च-ठी च-डी च-ढी च-ती च-थी च-ताः। अष्टादशश इति । संख्यैकार्थात् वीप्सायामिति च शस्। तदेव विवृणोति—अष्टादशाष्टादश इति क्यादिदशभ्यो नदादित्वादीय ।

* * * *

Colophon:

इति महामहोपाध्यायश्रीरामतर्कवागीशभट्टाचार्यविरचिता दिवादिपादस्य टिप्पणी संपूर्णा ॥

सुनोतीति दिवसुतुतेति श्न श इत् पिति णुः। श्नौ न णुः। अभिषुणोतीति गीकि इति षः। षुस इति णः। सुनुत इति तस् ङित्वान्न णुः ॥

End:

अत्र संभावनं प्रसञ्जनमित्याहुः।

"काकुत्स्थदयितां साध्वीं त्वमाशङ्किष्यथाः कथम्।" इत्यत्र न हेतुहेतुमद्भावौ किन्तु गर्हा कथंशब्देन गम्य . . . ध्वीयमिति कालसामान्ये भूते कि (विक)ल्पः, भविष्यति नित्यम्। एवं कतरोऽनिन्ददीश्वरम् दुर्जनः प्रतिष्ठामलप्स्यत नाहं क्षमे न श्रद्धे जातु जना मामनिन्दिष्यन् अप्यहनिष्यत् शम्भुरुताजेष्यत् सुखं सर्वत्र खीथ्योः समानविषयता। इति संक्षेपः ॥

इति आख्यातपादस्य टिप्पणी समाप्ता ॥

No. **1548.** वाल्मीकिसूत्रम्.

VĀLMĪKISŪTRAM.

Pages 41 Lines, 18 on a page Character, Dēvanāgari.

Begins on fol. 17*a* of the MS. described under No. 943.

Complete.

This treatise gives the Sūtras on Prākṛta grammar; the author is a certain Vālmīki who is, however, taken here to be the same as the famous author of the Rāmāyana.

Beginning:

येन श्रीरामचरितमधिगम्य सुरर्षितः।
श्रीमद्रामायणं प्रोक्तं तस्मै वाल्मीकये नमः ॥

येन निर्मलिता ना(गा)वष्षड्भाषाकृतयो नृणाम् ।
विमलैस्सूक्तकतकैस्तस्मै वाल्मीकये नमः ॥
स्वान्तस्य काव्येन गिराश्च षण्णां सूत्रैर्नराणां कलुषं प्रपत्त्या ।
पराकरोद्यः प्रथमः कवीनां वाल्मीकिमेनं मुनिमानतोऽस्मि ॥

संज्ञा

सिद्धिर्लोकाच्च ।
अनुक्तमन्यशब्दानुशासनवत् ।
संज्ञा प्रत्याहारमयी वा ।
सुप्स्वादिरन्त्यहला ।

End:

कसेखाग्वासः ।
न्यसोणिमणिमौ ॥

गृहेर्निरुवारमेराहबलहरपग्गाहिपच्चुआः ।

इति वाल्मीकीयेषु सूत्रेषु द्वितीयस्याध्यायस्य पादश्चतुर्थः । अध्यायश्च समाप्तः । प्राकृतव्याकरणशास्त्रमपि समाप्तम् ॥

गजोदये क्रैष्टुशके दशमे मासि विंशके ।
अलिखद्देशिकाचार्य इदं शब्दानुशासनम् ॥
टीका सर्वस्ववेदानुक्रमण्येकावलीरिदम् ।
अन्यच्च देशिकाचार्योऽलिखत्कैरविणीतटे ॥

No. **1549.** वाल्मीकिसूत्रम्—सवृत्ति.

VĀLMĪKISŪTRAM WITH VṚTTI.

Substance, paper. Size, $13\frac{1}{3} \times 8\frac{1}{4}$ inches. Pages, 175. Lines, 30 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete

There are many omissions in this MS.

Contains the Sūtras of Valmīki on Prākṛta grammar and the Vṛtti of Trivikrama thereon. Trivikrama is said to have

been the son of Mallinātha and Lakṣmī and to have been the brother of Bhāma named Vṛttividya and to have belonged to the family of Bāṇa.

Beginning:

श्रीवीरप्राच्याचलसमुदितमखिलप्रकाशनं वन्दे ।
दिव्यध्वनिपटुदीधितिमहमक्षरपद्धतिप्राप्त्यै ॥
श्रुतभर्तुरर्हनन्दित्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीबाणसुकुलकमलद्युमणेरादित्यवर्मणः पु(पौ)त्रः ॥
श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृताम्बुधिसुधांशुः ।
भामस्य वृत्तिविद्याना(धा)म्नो भ्राता त्रिविक्रमस्सुकविः ॥
श्रीवीरवीरसे(नजि)ना[न्य]श्रीय(र्यादि)वचःपयोनिधे कतिचित् ।
प्राकृतपदरत्नानि प्रतिकृतिसुकृतिभूषणाय चिनोति ॥
अनल्पार्थस्सुखोच्चारश्शाब्दस्साहित्यजीवितम् ।
वचः(सच)प्राकृतमेवेति मतं सूत्रानुवर्तिनाम् ॥
प्राकृतन्तत्समन्देश्यं तद्भवञ्चेत्यतस्त्रिधा ।
तत्समं संस्कृतसमं ज्ञेयं संस्कृतलक्षणात् ॥
देश्यमार्षञ्च रूढत्वात्स्वतन्त्रत्वाच्च भूयसा ।
[वचः(स च) प्राकृतमेवेति मतं सूत्रानुवर्तिनाम् ।]
लक्षणं(क्ष्मना) वक्ष्य(पेक्ष्य)ते तस्य संप्रदायो प(हि)बोधकै(क)ः ॥
प्रकृतेस्संस्कृतात्साध्यमानात्सिद्धाच्च यद्भवेत् ।
प्राकृतस्यास्य लक्ष्यानुरोधि लक्ष्म प्रचक्ष्महे ॥
प्राकृतपदार्थसार्थप्राप्त्यै निजसूत्रमार्गमनुजिगमिषता(म्) ।
वृत्तिर्यथार्थसिद्ध्यै त्रिविक्रमेणागमक्रमात्क्रियते ॥
तद्भवतत्समदेश्यप्राकृतरूपाणि पश्यतां विदुषाम् ।
दर्पणतयेयमवनौ वृत्तिस्त्रैविक्रमी जयति ॥

प्राकृतरूपाणि यथा प्राच्यैराहेमचन्द्रार्यात् ।
विवृतानि तथा तानि प्रतिबिम्बन्तीह सर्वाणि ॥
सूत्रम्—सिद्धिर्लोकाच्च ।

वृत्तिः — सिद्धिरिह प्रस्तुतप्राकृतशब्दसंबन्धिनी परिगृह्यते; सा च लोकाद्भवति । यस्माद्दलवर्णाभ्या मैकारौकाराभ्यामसंयुक्तङञकाराभ्यां शषाभ्यां द्विवचनादिनाक्षरेण विरहितश्शब्दा(ब्दो)च्चारो लोकव्यवहारादेव लभ्यते ; तस्मात्सिद्धिलो(र्लो) कादिति वेदितव्यम् । चकाराद्लक्ष्यमा(णलक्ष)-णादनेकान्ताच्च ॥

End:

सप्रत्ययप्रकृतिसिद्धमदीर्घसूत्र-
सत्कारकं बहुविभक्तियमासदेश्यम ।
शब्दानुशासनमिदं प्रगुणप्रयोगं
त्रैविक्रमं जपत मन्त्रमिवार्थसिद्ध्यै ॥
विशन्नन्तश्श्रोत्रं पदमधुरिमा मेदुरयति
प्रणेता नूलोऽर्थः प्रतिपदमहो साधुवचनम् ।
रसः पात्रीकुर्याद्भुवनमनुभावादिव कृते-
र्यदि श्राव्यं काव्यं मम रसिकनैयायिकजनैः ॥
वक्तारस्सन्तु सर्वेऽपि स्वाभिप्रायप्रकाशने ।
स्वपा(परा)शयसंवेदिकथास्वेकस्त्रिविक्रमः ॥

No. 1550. प्राकृतप्रकाशः.

PRAKṚTAPRAKĀŚAḤ

Substance, palm-leaf Size, $3\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 9. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Prākṛtaprakāśa with commentary Contains Paricchedas 1 to 6

The fifth and the sixth Paricchēdas as found in Cowell's edition are herein combined to form the 5th Paricchēda ; hence the difference noted also in the work described under the next number.

This consists of the Sūtras on Prākṛta grammar by Vararuci.

Beginning :

आदेरतः । आ समृद्ध्यादिषु वा । ईषत्पकस्वप्नवेतसव्यञ्जनमृदङ्गाङ्गारेषित् । लोपोऽरण्ये ।

* *

Colophons :

इति वाररुचे सूत्रे प्रथमः परिच्छेदः ॥

* * *

इति द्वितीयः परिच्छेदः ॥

* * * *

तृतीयः परिच्छेदः ॥

* * * *

इति वाररुचि(च) सूत्रे चतुर्थः परिच्छेदः ॥

* * * *

इति प्राकृतव्याकरणे पञ्चमः परिच्छेदः ॥

End :

इञ्च बहुषु । क्ते । ए च क्त्वातुमुन्तव्यभविष्यत्सु । तादेशे वा ॥

Colophon :

इति प्राकृतप्रकाशे व्याकरणे तिङ्विधिष्षष्ठः परिच्छेदः ॥

भुवो होहुवौ । क्ते भूः ।

घे क्त्वातुमुन्तव्येषु ॥

No. **1551.** प्राकृतप्रकाशः सव्याख्यः

PRĀKRTAPRAKĀŚAH WITH COMMENTARY.

Pages, 67. Lines, 5 on a page.

Begins on fol 6*a* of the MS described under No. 1550.

Contains Paricchēdas 1 to 8. But the end of the 8th coincides with that of the 9thParicchēda as printed in Cowell's edition.

The commentary does not completely agree with that printed in Cowell's edition ; it, however, appears to be the same

The author of the commentary is said to be Bhāmaha.

Beginning:

आदेरतः । आदेरत इत्यधिकारोऽयमापरिच्छेदपरिसमाप्तेरनुवर्तते । अत इति च यावदाकारविधानम् । यदितः प्राक् ऊर्ध्वं विधीयते तदादेरतस्स्थाने भवतीति वेदितव्यम् । आ समृद्ध्यादिषु वा । समृद्ध्यादिष्वादेरकारस्य स्थाने आत्वं वा भवति । समृद्धिः । सामिद्धी । समिद्धी ॥

* * * *

इति वररुचिसूत्रवृत्तौ प्रथमः परिच्छेदः ॥

End:

शेषस्संस्कृतवत् । अत्र प्रयुक्तादन्यश्शेषः । प्रत्ययसमाससंज्ञाः प्रत्याहारलिङ्गकारादयश्च संस्कृतादेव बोद्धव्याः । इह ग्रन्थविस्तरभयान्न कृतं तद्विधानम् ।

Colophon:

इति प्राकृतप्रकाशे निपातविधिरष्टमः परिच्छेदः ।

इति प्राकृतव्याकरणं संपूर्णम् ॥

श्रीमुखे हायने तैषे मासि श्रीपरमेश्वरः ।

सुप्राकृतप्रकाशं सन्तोषादलिखदुत्तमम् ॥

No 1552. षड्भाषाचन्द्रिका.

ṢAḌBHĀṢĀCANDRIKĀ.

Substance, paper. Size, 13½ × 8½ inches. Pages, 164. Lines, 24 on a page. Character, Telugu Condition, good Appearance, new.

Begins on fol. 1*a*. The other works herein are Svaramēlakalānidhiḥ fol. 83*a*, Caturviṁśatināmastutiḥ fol 95*a*, Abhinayadarpaṇaḥ fol 99*a*.

Incomplete.

A treatise on the six dialects, viz., Prākṛta, Śaurasēnī, Māgadhī, Paiśācī, Cūlikāpaiśācī and Apabhraṁśikā. The author is Lakṣmīdhara, son of Yajñēśvara and Sarvāmbikā of Carakūri family on the banks of the Kṛṣṇa in the Andhra country Yajñēśvara of Kāśyapagōtra belonged to the Bahvṛcaśākhā (Ṛgvēda) and was the son of Timmayasōmayājin. This author mentions Vālmīki as the author of the original aphorisms on the subject, and Trivikrama, Hēmacandra and Bhāmaha as commentators.

Beginning:

श्रीहयग्रीवाय नमश्चन्द्रिकाकान्तकान्तये ।
उपासकजनाज्ञानतमिस्रासप्तसप्तये ॥

ओङ्कारार्थाय विज्ञानदायिने लोकसाक्षिणे ।
करुणामयवीक्षाय दक्षिणामूर्तये नमः ॥

विस्सद्धं कअईसराइहरसाणीसासणुण्णं भिहा-
पुव्वं दिट्ठिमहोक्षजेण सापिअस्सेअब्बुएक(क)ड्ढले
आलोलामलहारकुण्डलपहाकिम्मीरकुप्पासअं
लच्छीऐ धनमड्डलं हवदु दे इड्ढिद्दाणंमुहम् ॥

छाया—

विस्रब्धं कृतविस्रराजिरभसान्निश्वासंनुन्नं स्पृहा-
पूर्वं दृष्टमधोक्षजेन शमितस्वेदाम्बु एकस्थले ।
आलोलामलहारकुण्डलप्रभाकिम्मीरकूर्पासकं
लक्ष्म्यास्स्तनमण्डलं भवतु ते इष्टार्थदानोन्मुखम् ॥

*　　*　　*　　*

अस्त्यन्ध्रदेशे चरकूरवंशः
कृष्णातटे काश्यपगोत्ररूढः ।
यो बह्वृचानां बहुमाननीयो
धत्ते सदा कीर्ति(सु)वैजयन्ती(म्) ॥
यत्र नामादिमशिशोरङ्कितं वेङ्क(टे)शितुः ।
सलक्ष्मीकस्स एवाचो(र्च्यो)भगवान् गृहदेवता ॥
आसप्तपूरुषं यत्र लक्ष्मीवाण्योरवस्थितिः ।
आसीत्कपोतनाथस्य वरात्कदलिवासिनः ॥
तत्रोद्भूत्तिम्मयसोमयाजी
बुधोऽष्टभाषाकविचक्रवर्ती ।
नित्यान्नदाता निजभक्तिलब्ध-
वृषाकपायीरमणप्रसादः ॥
तस्मादुदैद्बह्वृचचक्रवर्ती
यज्ञेश्वरः पण्डितसार्वभौमः ।
सर्वाम्बिका सर्वगुणोपपन्ना
तस्य द्वितीयाभवदम्बिकाभा ॥
ताभ्यामुद्भवन्पुत्रास्सर्वाचारनियामकाः ।
विधिमन्त्रार्थवादज्ञाश्चत्वारो निगमा इव ॥

षड्दर्शनीतत्त्वविवेककर्ता
स्वशिष्यसम्पादितदिग्जयश्रीः ।
तेष्वादिमः पण्डितपट्टभद्रः
श्रीकोण्डुभट्टो जयतीह लोके ॥

लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिङ्करः ।
सर्वविद्वत्कविमतस्सज्जनाप्तो विराजते ॥

तेन लक्ष्मीधरार्येण षड्भाषाचन्द्रिकानवा ।
विद्वत्कविचकोराणां प्रीतये क्रियतेऽधुना ॥

वाग्देवी जननी येषां वाल्मीकिर्मूलसूत्रकृत् ।
भाषाप्रयोगा ज्ञेयास्ते षड्भाषाचन्द्रिकाधुना ॥

वृत्तिं त्रैविक्रमां(मीं) गूढां व्याचिख्यासन्ति ये बुधाः ।
षड्भाषाचन्द्रिका तैस्तद्व्याख्यारूपावलोक्यताम् ॥

यत्नेन गच्छतः क्वापि स्खलनं स्यान्व(न्म)हीयसा ।
हसन्त्यसाधवस्तत्र समादधति साधवः ॥

संप्रदायप्रकाशार्थमपूर्वग्रन्थनिर्मिता(तां) ।
साहसेन प्रवृत्तोऽहं नोपहास्यो बुधोत्तमैः ॥

यदत्रेष्टं न लिखितं यद्विरुद्धमनीप्सितम् ।
त्रितयं तच्च हे सन्तः क्षम्यतां कृपया मयि ॥

रागद्वेषविहीनैरतिसरसैः परंगुणा तवने ।
विद्वत्कविभी रसिकैः षड्भाषाचन्द्रिका सेव्या ।

अपशब्दमहागर्ते षड्भाषाकृष्णरात्रिषु ।
पतन्ति कविशार्दूलाष्षड्भाषाचन्द्रिकां विना ॥

त्रैविक्रमं हैमचन्द्रं गुरोर्ज्ञात्वा च भामहम् ।
कविसौख्याय तत्सर्वमत्र संक्षिप्यते मया ॥

अथ द्रष्टॄणां प्रवृत्तिसौकर्याय रूपकपरिभाषोक्तं भाषाणां स्वरूपं विनियोगश्च कथ्यते—

भाषा द्विधा संस्कृता च प्राकृता(ती) चेति भेदतः ।
कौमारपाणिनीयादिसंस्कृता संस्कृता मता ॥
इयन्तु देवतादीनां मुनीनां नायकस्य च ।
विप्रक्षत्रवणिक्छूद्रमन्त्रिकञ्चुकिनामपि ॥
लिङ्गिनाश्च विटादीनामनीचानां प्रयुज्यते ।
प्रकृतेस्संस्कृतायास्तु विकृतिः प्राकृती मता ॥
षड्विधा सा प्राकृतञ्च(ती च) शौरसेनी च मागधी ।
पैशाची चूळिकापैशाच्यपभ्रंश इति क्रमात् ॥

End:

अर्जेर्भावकर्मणि विडप्प इत्यादेशो वा स्यात्, तत्सन्नियोगे यङ्लुक्च । विडप्पइ, पक्षे—अज्जिज्जइ । सूत्रम्—आरभ आडप्पः । वृ—आरभेर्भावकर्मणि आडप्प इत्यादेशो वा स्यात्, तत्सन्नियोगे यङ्लुक्च । आडप्पइ, पक्षे—आरब्भिज्जइ । सूत्रम्—णव्व(ण)ज्जौ ज्ञः । वृ—जानातेर्भावकर्मणि णव्व णज्ज इत्येतावादेशौ स्यातां, तत्सन्नियोगे यङ्लुक्च । णव्वइ ।

No 1553. षड्भाषाचन्द्रिका.

ṢAḌBHĀṢĀCANDRIKĀ.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 92. Lines, 29 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete. Same as the last.

No 1554. शब्दमञ्जरी.

ŚABDAMAÑJARĪ.

Substance, palm-leaf Size, $15\frac{1}{4} \times 1\frac{1}{8}$ inches Pages, 116 Lines, 4 on a page. Character, Grantha. Condition, much injured. Appearance, old

Complete

Declension of typical nouns.

No 1555. शब्दमञ्जरी.

ŚABDAMAÑJARĪ

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 9 Lines, 5 on a page Character, Kanarese Condition, go Appearance, new.

Incomplete.

Same as the above.

No 1556. शब्दमञ्जरी.

ŚABDAMAÑJARĪ.

Substance, palm-leaf Size. $11\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 64 Lines, 4 on a page. Character, Kanarese. Condition. good. Appearance, new.

Up to Nakārānta.

No. 1557. वृत्तिसिद्धरूपसङ्ग्रहः.

VRTTISIDDHARŪPASANGRAHAH

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 46 Lines. 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

It contains 25 pages of Śabdamañjarī, 14 pages of Tiṅantarūpa (forms of verbs) and 6 pages of Samāsa.

No. 1558. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 12 × 1⅝ inches Pages, 87 Lines, 4 on a page Character, Telugu Condition, injured. Appearance, old

This codex contains 9 pages of Samāsacakra and then 78 pages of Śabdamañjarī (declension of nouns) The arrangement in this Sabdamañjarī is that the masculine, feminine and neuter nouns, whether ending in a vowel or a consonant, are separately grouped together

---

No. 1559. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf Size, 12⅝ × 1¼ inches. Pages, 78. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

This codex contains—

1*a* Dhāturūpa, 10 pages ; 6*a* Śabdamañjarī, 48 pages ; 30*a* Prayōgavivēkasaṅgraha, 10 pages ; 35*a* Samāsacakra, 10 pages.

No. 1560. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 9⅞ × 1⅛ inches Pages, 20. Lines, 9 on a page Character, Grantha Condition, slightly injured Appearance, old.

It contains—

1*a* Samāsacakra, incomplete, 6 pages; 4*a* Kriyārūpa, incomplete, 14 pages

---

No. 1561. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 114. Lines, 6 on a page. Character, Kanarese, Nandināgarī, Telugu and Grantha. Condition, good. Appearance, old.

This codex contains—

1*a* Samāsacakra, 6 pages, incomplete ; 4*a* Dhāturūpa, 4 pages, incomplete ; 6*a* Samāsacakra, 7 pages, incomplete ; 10*a* Samāsacakra, 40 pages, complete ; 15*a* Prayōgavivēkasangraha, 24 pages, 27*a* Samāsacakra, 5 copies, 63 pages

---

No 1562. वृत्तिसिद्धरूपसङ्ग्रहः.

VRTTISIDDHARŪPASAṄGRAHAH

Pages, 111. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1529

It contains—

Samāsa (compounds), 18 pages ; Kriyārūpa (verbs), 5 pages ; Śabda (declension of nouns), 45 pages ; Samāsacakra, 4 pages ; Prayōgavivēkasangraha of Vararuci, 2 pages ; Śabdamañjarī according to Śākatāyana's grammar (beginning on 58*b*), 31 pages ; Kriyārūpa (73*b*), 6 pages.

No. 1563. वृत्तिसिद्धरूपसङ्ग्रहः.

VRTTISIDDHARŪPASAṄGRAHAH.

Substance, palm-leaf Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 44. Lines, 4 on a page. Character, Kanarese Condition, slightly injured Appearance, new.

This contains—

1*a* Śabdamañjarī, incomplete, 16 pages ; 9*a* Kriyārūpa, complete, 28 pages.

No. 1564. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAH.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 96. Lines, 4 on a page Character, Kanarese. Condition, slightly injured. Appearance, old.

This contains—

Śabdamañjarī, incomplete

No 1565. वृत्तिसिद्धरूपसङ्ग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{2}$ and $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 40. Lines, 7 or 6 on a page Character, Telugu Condition, good Appearance, new

The other works herein are Raghuvaṁśavyākhyā 1*a*, Raghuvaṁśam 18*a*, Gaulīpatanaphalam 45*a* This contains 2 copies of Samāsacakra, 18 pages, and Śabdamañjarī, 22 pages (beginning on fol. 47*a*).

No 1566. वृत्तिसिद्धरूपसङ्ग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 24. Lines, 7 on a page Character, Telugu Condition, injured. Appearance, old

Begins on fol 37*a*. The other work herein is Raghuvaṁśam with Telugu meaning.

Śabdamañjarī, incomplete

No. 1567. वृत्तिसिद्धरूपसङ्ग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 28. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

The other work herein is Raghuvaṁśam with Telugu meaning 1*a*

Transcription was completed by Mājēṭi Pāpayyaliṅgam on Monday the 14th bright fortnight of Āsāḍha in the Āṅgīrasa year.

Śabdamañjarī ; complete.

No. 1568. वृत्तिसिद्धरूपसङ्ग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, paper Size, $7\frac{3}{8} \times 8\frac{1}{4}$ inches. Pages, 70. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, old.

This codex contains—

1*a* Śabdamañjarī, 44 pages; 25*a* Samāsacakra, 12 pages; 30*b* Dhāturūpa, 14 pages.

No 1569. सिद्धरूपम्.

SIDDHARŪPAM.

Substance, palm-leaf Size, 15⅞ × 1½ inches Pages, 108 Lines, 3 on a page Character, Kanarese. Condition, injured Appearance, old.

Almost complete.

The words declined in this work and their order are different from those of the ordinary Śabdamañjarī.

No. 1570. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf Size, 17 × 1½ inches Pages, 18. Lines, 10 on a page. Character, Grantha. Condition, injured Appearance, old.

It contains Śabdamañjarī (1*a*), 6 pages, incomplete; Samāsacakra 4*a*), 8 pages; Dhāturūpa (8*a*), 4 pages.

No. 1571. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 14¼ × 1¾ inches. Pages, 9. Lines, 4 on a page. Character, Kanarese Condition, good. Appearance, new.

Samāsacakra, complete.

The date of transcription is given as

नलाब्दे माघवे कृष्णे तृतीयायां कुजे दिने ।

No 1572. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches Pages, 30. Lines, 4 on a page. Character, Telugu Condition, good Appearance, new

Samāsasangraha, 3 copies each of ten pages; the third copy alone is incomplete

The copyist and the date of transcription are both the same here also as in the MS. described under the next number.

No. 1573. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, palm-leaf. Size, 16½ × 1⅝ inches Pages, 7 Lines, 5 on a page Character, Kanarese Condition, good. Appearance, old.

Samāsasangraha, complete

The date of transcription is given thus

नलाब्दे माधवे कृष्णे तृतीयायां कुजे दिने ।
समाससङ्ग्रहं स्पष्टं व्यलिखत् पापयाह्वयः ॥

No. 1574. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches Pages, 12. Lines, 6 on a page. Character, Telugu Condition, injured Appearance, old.

Begins on fol. 8*a*. The other works herein are Agnihōtramantrāḥ 1*a*, Viṣṇumaṅgalāśaṁsanam 14*a*, Cāṭuślōkāḥ 16*a*,

Liṅganirṇayaḥ 18*a*, Kṛṣṇakarṇāmṛtam 19*a*, Rāmāyaṇam 22*a*, Itihāsaḥ 25*a*, Sōmōtpatti 29*a*.

Contains Śabdamañjarī.

No. 1575. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ

Substance, palm-leaf Size, 15⅜ × 1⅛ inches. Pages, 227. Lines, 4 and 6 on a page Character, Telugu. Condition, injured, Appearance, old.

Contains—

Śabdamañjarī, 118 pages; Samāsacakra, 9 pages.

No 1576. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Pages, 20 Lines, 5 on a page

Begins on fol. 23*a* of the MS. described under No. 1282. Samāsavṛtti, complete.

No. 1577. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size. 14⅛ × 1⅜ inches Pages, 23 Lines, 4 on a page. Character, Kanarese and Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a* Kriyārūpa, incomplete, 12 pages; 7*a* Samāsacakra, complete, 11 pages.

No. 1578. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 14 × 1⅛ inches. Pages, 11. Lines, 4 on a page. Character, Telugu. Condition, injured Appearance, old.

Śabdamañjarī, incomplete. There is a single leaf in the beginning giving the Telugu terminations for the various cases of declension.

No 1579. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf. Size, 15½ × 1¾ inches Pages, 174 Lines, 7 a page Character, Grantha and Nandināgarī Condition, slightly injured. Appearance, old.

This codex contains 1*a* Prayōgavivēkasaṅgraha, 56 pages; 29*a* Dhauturūpa 45 pages; 51*a* Siddharūpa, 56 pages; 79*a* Dhātupāṭha, 18 pages.

No 1580. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, palm-leaf Size, 15⅛ × 1½ inches Pages, 30. Lines, 6 on a page Character, Telugu Condition, good. Appearance, new.

This contains 1*a* Dhāturūpa, 22 pages; 12*a* Bhāsāmañjarī, 8 pages.

No 1581. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASANGRAHAḤ

Substance, palm-leaf. Size, 13⅞ × 1⅛ inches Pages, 4 Lines, 5 on a page Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 14*a*. The other works herein are: Sītāparinayam fol. 1*a*, Raghuvaṃśam fol. 20*a*, Raghuvaṁśam 27*a*, Cāṭuślōkāḥ 36*a*, Śiśupālavadham fol. 41*a*.

This contains Samāsacakra, 11 pages and Dhāturūpa (24*a*), 4 pages.

No 1582. वृत्तिसिद्धरूपसङ्ग्रहः.

VṚTTISIDDHARŪPASANGRAHAḤ.

Substance, palm-leaf. Size, 13⅞ × 1⅛ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 71*a*. The other works herein are Raghuvaṁśam 1*a*, Tricakalpaḥ 32*a*, Prātassmaraṇīyaślōkāḥ 52*a*, Kṛṣṇaviṣayakagānam 53*a*, Rāmaviṣayakagānam 60*a*.

This codex contains Samāsacakra, 18 pages and Dhāturūpa 78*b*, 3 pages

---

No 1583. व्याकरणविषयः.

VYĀKARAṆAVIṢAYAḤ

Substance, palm-leaf. Size, 10 × 8 inches. Pages, 475. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, old.

From Samāsa to the end of Dvirukti :

The Sūtras of the Aṣṭādhyāyī are herein explained in the Telugu language and exemplified by means of appropriate Sanskrit words.

CLASS II.

2. LEXICOGRAPHY.

No. 1584. अकारादिपदानि.

AKĀRĀDIPADĀNI.

Substance, paper. Size, 8⅝ × 6½ inches. Pages, 58. Lines, 36 on a page. Character, Telugu Condition, good. Appearance, new

This is a list of words arranged alphabetically. The list breaks off in words beginning with आ. The gender of words is also indicated. This work is called Śabdamañjarī as made out from the heading given on the first page of the MS

Beginning:	**End:**
अ—	आकर्ष—षः
अ अन्	आकर्षक—कः
अनादि	आकर्षण—ण(म्)
अ—अः	आकर्षणी—णी
अंशत्क अंशयति	आकर्षिक—कः, का, कम्
अंश—शः	आकर्षित—तः, ता, तम्
अंशक—कः, कम्	आकर्षिन्—र्षी, र्षिणी, र्षि
	आकलन—नम्

No. 1585. अकारादिपदानि.

AKĀRĀDIPADĀNI.

Substance, paper. Size, 9½ × 7¼ inches. Pages, 570. Lines, 17 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

The words in the Nāmaliṅgānuśāsana are herein arranged alphabetically.

Beginning:	End:
उत्तरासङ्ग	ह्रीत
उत्तरीय	ह्रीवे(बे)र
उत्तरेण	ह्रेषा
उत्तरेद्युस्	ह्लादिनी
उत्तान	ह्लेषा
उत्तानशय	
उत्तुङ्ग	सम्पूर्णम् ॥
उत्थान	

No. **1586.** अक्षरान्तनिघण्टुः.

AKṢARĀNTANIGHAṆṬUH

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 10. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 26*a* The other work herein is Dhīśōdhin —Vṛttaratnākaravyākhyā 1*a*.

Words are herein arranged in the order of their final letters. Begins with words ending in इ, goes on to those in इ्, and is thus finished.

Copying was finished on Tuesday, the 20th of Phālguna in the Dundubhi year.

Beginning:

आदि(:) प्रभृतिरित्यादिरितिप्रभृतिरित्यपि ।
पार्ष्णिः पू(पृ)ष्णिश्चक्रपाणिपाणिवज्रादिपाणयः ॥

जमदग्न्याहिताग्न्यग्निगभस्तिघृणिघृष्टयः ।
वह्निर्ययातिसंपातिज्ञाति[:]पत्तिपदातयः

बिधिर्व्यवधिरन्तर्धिर्निधिसन्निधिसन्धयः ।
अवधिः परिधिर्व्याधिरुप(ा)र्या(ध्या)धिसमाधयः ॥

अभिसन्धिः प्रतिनिधिरुपध्यभिविधी महि(ः) ।
वालधिर्वारिधिर्वारिनिधिरित्येवमादयः ॥

शेवधिस्सारधिः(थिः) शक्तिरत्निमातलिशालयः ।
मौलिश्शशाङ्कमौलिश्च हेलिर्बलिमहाबली ॥

End:

तुराषाट्पृतनासाहौ पुंसि गोधुक् च वल्लवे ।
मधुध्रुट् त्रिपुरध्रुट् चेत्याद्या हरिहरादिषु ॥

मधुलिट् पुष्पलिट् भृङ्गे वृक्षे क्ष्माभूरुडादयः ।
क्लीबे सरोरुडम्भोरुडित्यादि सरसीरुहे ॥

पुंस्यनड्वान् बलीवर्देऽनड्वाह्यनडुही स्त्रियाम् ।
स्त्रियामुष्णिगुपानच्च कामधेनौ च कामधुक् ॥

इष्टधुक् स्वध्रि(र्धि)गंह्मो (ह्मो)दु(ध्रु)ट् द्योलिट्स्थलरुडादयः ।
विशेष्यानुगमे(मा)देव ज्ञेयास्त्रीपुंनपुंसके ॥

Colophon:

इत्यक्षरान्तनिघण्टुस्समाप्तः ॥

No. **1587.** अक्षरान्तनिघण्टुः.

AKṢARĀNTANIGHAṆṬUḤ.

Substance, palm-leaf. Size, 10 × 1½ inches. Pages, 7 Lines, 4 on page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 6*a*. The other work herein is Kriyānighaṇṭu 1*a*.

Complete

This work gives in verse the nouns ending in various letters —words which are generally declined in a book on declension

to represent the varieties thereof. The work is attributed to Bhaṭṭōjidīkṣita in the colophon

At the end there are two pages entitled Pratyayamālānighaṇṭu, which is evidently imperfect It gives in verse the verbal forms which exemplify the various tenses and moods of Sanskrit verbs. This codex gives such forms only for two varieties of the past tense, namely, लुङ् (aorist) and लिट् (perfect)

Beginning:

कृष्णरामादयः शब्दाः कीर्तिता भुवि विश्रुताः ।
तद्विशेषानकारान्तांस्तावदाचक्ष्महे वयम् ॥

सोमपा विश्वपा(:)शङ्खध्मा हाहा. पुंसि विश्रुताः ।
आकारान्तो(न्ता) रमापद्माभाषाभूषादयस्त्रियाम् ॥

End:

तुराषाट्पृतनासाहौ पुंसि गोधुक् च वल्लभे ॥

इति हकारान्ताः ।

Colophon:

इति भट्टोजिदीक्षितविरचिताक्षरान्तनिघण्टुस्समाप्तः ॥

Beginning: of Pratyayamālānighaṇṭu

अभूदकार्षीदगमदचीकरदपीपलत् ।
अनैषीदित्यहौषीच्च लुङ्परस्मैपदे भिदा ॥

End:

पालयामास चेत्येवं पालयाञ्चक्र इत्यपि ।
एवमष्टादशविधा लिट्परस्मैपदे भिदाः ॥

Colophon:

इति प्रत्ययमालानिघण्टुः समाप्तः ॥

No. 1588. अनेकनिघण्टुसङ्ग्रहः.

ANĒKANIGHANṬUSAṄGRAHAḤ.

Substance, palm-leaf Size, 13⅜ × 1¼ inches Pages, 56. Lines, 5 on a page. Character, Telugu Condition, injured. Appearance, old

This gives all the passages quoted from the various lexicons by Mallinātha in his commentary on Mēghasandēśa.

Beginning:

प्रमत्तः—प्रमादोऽनवधानता इत्यमरः) । गुरुणा—गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति शब्दा . . . । कश्चि(त् यक्षः) विद्या (धराप्सरोयक्ष इत्यमरः) । स्निग्ध (ग्धः)स्निग्धन्तु मसृणे सान्द्रे, छायावृक्षो नमेरुः स्यात् इति शब्दार्ण . . . ॥

End:

प्रत्यक्प्रवाहा नदाः, प्राक्स्रोतसो नद्यः नर्मदां विनेत्याहुः । . . . . . . कादम्बः इक्षुः कादम्बः कलहंसेक्ष्वोः इति विश्वः ॥

Colophon:

चतुर्थसर्गे नैघण्टुकस्समाप्तः ॥

No 1589. अनेकार्थध्वनिमञ्जरी.

ANĒKĀRTHADHVANIMAÑJARĪ.

Pages, 12. Lines, 32 on a page.

Begins on fol. 74*a* of the MS. described under No. 27.

Complete.

This is a homonymous lexicon consisting of three chapters which respectively devote the whole, one half and one quarter of a

stanza for the meanings of the several words taken up for interpretation. A similar but slightly different work is noticed on page 290 of Eggeling's Catalogue of the India Office Library

Beginning:

शब्दार्थौ विचितौ येन कृतोऽपि गदितोऽपि वा ।
तानुवाचै (स्वानुभावै)कमानाय तस्मै वागात्मने नमः ॥

सरस्वत्याः प्रसादेन कविभिर्बध्यते पदम् ।
प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधवः (छु च) ॥

शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुत्तमम् ।
कण्ठे कुर्वन्तु विद्वांसः श्रद्दधाना दिवानिशम् ॥

शब्दानां निधयो ग्रन्थास्सर्वशास्त्रार्थदीपिकाम् ।
ये पठन्ति विदुर्ग्रन्थं त्रैलोक्यं पश्यतो(त)ध्रुवम् ॥

पठन्तस्सर्वशास्त्राणि गीतनृत्यकलाविदः ।
अनेकार्थपदान्दृष्ट्वा विमोहं यान्ति बोधने ॥

तस्मादत्र क्रमादर्थान्विविच्य तु यथामति ।
श्लोकार्धपादगदितान् क्रमशः प्रवदामि तान् ॥

श्रीः—श्रीर्वेषरचना शोभा . . . .

अर्जुनः शुक्लवर्णोऽर्जुनो नाम पाण्डवोऽप्यर्जुनो मतः ।
अर्जुनस्तृणजातिस्स्यादर्जुनः ककुभो द्रुमः ॥

अन्तरम्—

रन्ध्रे वस्त्रे विना मध्ये व्यवधानेऽन्तरात्मनि ।
बहिर्योगेऽवकाशे च विशेषे व्यसनेऽन्तरम् ॥

* * * *

इत्यनेकार्थध्वनिमञ्जर्यां श्लोकाधिकारः प्रथमः ॥ शब्दाः ९४ ॥

अथप्रभृत्यनेकार्थशब्दाश्श्लोकार्धगामिनः ।

वेदितव्या बुधैः पश्चात्प्रकृत्या कृतसङ्ग्रहः ॥

अङ्कः—युयुत्सुरङ्कयोरङ्कस्स्वादको लक्षलक्ष्मणोः ॥

अङ्गदः—अङ्गदो(दं) बाहुभूषायामङ्गदो वालिपुत्रकः ॥

* * * *

इत्यनेकार्थध्वनिमञ्जर्यामर्धश्लोकाधिकारः समाप्तः ॥ अत्र नामानि १४१ ॥

अथातः पादगा ह्यर्था अनेका निहिताः क्रमात् ॥

अघम्—अघं पापव्यसनयोः ।

अजः—हरिश्छागायुता अजाः ।

अम्बरम्—अम्बरं व्योमवस्त्रेषु ।

ओदनम्—महद्द्रन्द्वेषु चोदनम् ॥

End:

क्षयः—क्षयं गेहं क्षयो नाशः ।

क्षितिः—क्षितिः पृथ्वी क्षितिः क्षयः ॥

Colophon:

इत्यनेकार्थध्वनिमञ्जर्यां पादाधिकारस्तृतीयः ॥ प्रथमाधिकारे

शब्दाः	९४
द्वितीयाधिकारे	१४०
तृतीयेऽधिकारे	६८
अधिकारत्रयेऽपि शब्दाः	३०२

श्लोकाः १९५ ॥

नानार्थमञ्जरीयं क्रोधनवैशाखशुक्लपात्यम्याम् ।
अक्षरक्रमेण विलिखत् कृष्णाख्यो गणकशेखरस्स्पष्टम् ॥

No. 1590. अनेकार्थध्वनिमञ्जरी.

ANĒKĀRTHADHVANIMAÑJARĪ

Substance, paper. Size, 12½ × 8 inches. Pages, 7 Lines, 21 on a page. Character, Telugu. Condition, good Appearance, new.

Begins on fol. 132*a*. The other work herein is Kāmandakīya-nītisāram, with commentary 1*a*.

Incomplete; contains 50 verses.

This work differs from that described under the last number, but resembles what is published under that name in the Dvādaśa-kōśasaṅgraha as the work of Mahākṣapanaka.

Beginning :

शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुक्तकम् ।
कण्ठे कुर्वन्ति विद्वांसः श्रद्दधाना दिवानिशम् ॥

शब्दाम्भोधिर्यतोऽनन्तः कुतो व्याख्या प्रवर्तते ।
स्वानुभावैकमानाय तस्मै वागात्मने नमः ॥

सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदम् ।
प्रसिद्धमप्रसिद्धं वा तत्प्रमाणश्च साधु च ॥

शिवश्शर्वश्शिवश्शुक्रः शिवः कोलश्शिवो वसुः ।
शिवा गौरी शिवा क्रोष्टा शिवं श्रेष्ठश्शिवा स्नुषा ॥

शिवशब्दनाम.

अर्कमर्कटमण्डूकविष्णुवासववायवः ।
तुरु(र)ङ्गशिं(सिं)हशीतांशुयमाश्च हरयो दश ॥
हर(रि)नाम.

End:

शब्दादिविषयाः पञ्च प्रसिद्धो(द्धा) इन्द्रसंज्ञया ।
श्रेष्ठमिन्द्र इति ख्यातो देवराजे(डि)न्द्र उच्यते ॥
इन्द्रनाम.
अहिर्दैत्यविशेषश्च सूर्योऽहिरहिरध्वगः ।
अहिस्सर्पस्समाख्यातस्सिंहिकासूनुरप्यहिः ॥

No. 1591. अनेकार्थध्वनिमञ्जरी.

ANĒKĀRTHADHVANIMAÑJARĪ.

Substance, paper Size, 9¾ × 3⅞ inches. Pages, 16. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other work herein is Dhanañjaya-vijayavyāyōgaḥ 1*b*

Complete.

This resembles the work of the same name described on page 290 of the Catalogue of Sanskrit MSS. in the Library of the India Office.

No. 1592. अभिधानरत्नमाला.

ABHIDHĀNARATNAMĀLĀ.

Substance, paper. Size, 11⅝ × 4⅝ inches. Pages, 54. Lines, 12 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

Consists of 5 Kāndas ; complete.

This is a synonymous as well as a homonymous lexicon by Halāyudha. Edited by Th. Aufrecht, 1861. See I. O. L. C., page 281.

Copying is dated Samvat. 1895, Śrāvaṇa-śukla 10.

Beginning:

शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानाम् ।
यत्परिणामस्त्रिभुवनमखिलमिदं जयति सा वाणी ॥

इयममरदत्तवररुचिभागुरिवोपालितादिशास्त्रेभ्यः ।
अभिधानरत्नमाला कविकण्ठभूषणार्थमुद्ध्रियते ॥

स्वः स्वर्गस्सुरसद्म त्रिदशावासस्त्रिविष्टपं त्रिदिवम् ।
द्यौर्गौरमर्त्यभुवनं नाकस्स्यादूर्ध्वलोकश्च ॥

आदित्यास्त्रिदशास्सुरास्सुमनसस्स्वर्गौकसो देवता
गीर्वाणा ऋभवोऽमराश्च मरुतो बृन्दारका निर्जराः ।
अस्वप्ना विबुधास्त्रिविष्टपसदो लेखास्सुपर्वाण इ-
त्याख्याता अमृताशना अनिमिषा देवास्तथा दैवतम् ॥

End:

ईषत्किञ्चिन्मनाक् प्रोक्ताः किञ्चन स्तोकवाचकाः ॥

तूष्णीं जोषं भवेन्मौने स्म स्यात्संस्मरणादिषु ।
अङ्गेत्यामन्त्रणे हंहो भो भो इति च कथ्यते ॥
अनेकार्थो भवेन्नाना ननु प्रश्नेऽवधारणे ।
आकस्मिकार्थे सहसा तत्काले च निगद्यते ॥
विस्तारेऽङ्गीकृतावूरी कथ्यते नु(तू)ररी तथा ।
असंशयं भवेदद्धा सहार्थान्तिकयोरमा ॥
अथानन्तरकल्याणसम्प्रश्नादिषु कथ्यते ।
अथो इति तथा प्रोक्तो नामाभ्युपगमादिषु ॥

सदा सना च नित्यार्थे स्वति(स्ति)स्यान्मङ्गलादिषु ।
इतिशब्दः स्मृतो हेतुप्रकारादिसमाप्तिषु ॥

Colophon:

इति श्रीहलायुधभट्टकृतायामभिधानरत्नमालायामनेकार्थकाण्डः पञ्चम-
स्समाप्तः ॥

No. 1593. अभिधानरत्नमाला.

ABHIDHĀNARATNAMĀLĀ.

Substance, palm-leaf Size, 11¼ × 1¼ inches Pages, 110. Lines, 5 on a page Character, Kanarese Condition, injured. Appearance, new.

With Kanarese meanings

Up to the 56th verse in the Vanausadhivarga.

No. 1594. अभिधानरत्नमाला.

ABHIDHĀNARATNAMĀLĀ.

Substance, palm-leaf. Size, 18 × 1¾ inches Pages, 84. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete

No. 1595. अमरखण्डनम्.

AMARAKHAṆḌANAM.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 11. Lines, 7 on a page. Character, Telugu Condition, good. Appearance, new.

Begins on fol. 157*a*. The other works herein are: Paryāya-śabdaratnam 1*a*, Śabdaliṅgārthacandrikā 45*a*, Śabdaliṅgārtha-candrikāvyākhyānam, Dṛṣṭāntasiddhāñjanam 81*a*, Dṛṣṭānta-siddhāñjanavyākhyā, Śarat 120*a*, Sarasvatīvilāsa 148*a*, Viśēsā-mṛtam 153*a*, Viśvamēdinī, 163*a*.

Complete.

This is a depreciative criticism of the Nāmaliṅgānuśāsana of Amarasiṁha by Śrīharṣa.

Beginning :

अतिचित्रमिदं हि चिन्त्यतां विबुधैरप्यबुधातिजल्पितम् ।
रसवन्ति भवन्ति तद्यथामरसिंहस्य कृतिप्रकाशनम् ॥
तदिहैव विविच्यतेऽखिलं शतशस्त्वेवमिति प्रचोदयन् ।
रसिकास्सरस[का]न्त(प्र)मालसङ्कृदयास्ते सदयं पिबन्तु भोः ॥

यथा समाहृत्येत्यादावयमाशयः । विपुलसङ्कुलप्राचीनग्रन्थशब्दवर्गैः रूपभेदादिपूर्वकं बहुलनामयावल्लिङ्गविशिष्टत्वेन ग्रन्थरचना क्रियत इति । एतद्रीत्यात्र न प्रतिमितीदं(पादितं), न सम्यक्.

End :

रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यसत् जाम्बूनदशब्दस्यापि पुंलिङ्गस्य सत्त्वात् । यथाह जयः—

लोहजोऽष्टापदो हेम जाम्बूनदमयानुकाः ।
क्लीबेऽप्येते च शब्दास्स्युरिति शास्त्रविदो विदुः ॥ इति शब्दमीमांसायाम् ।

अत एव शब्दशब्दार्थमञ्जूषायां च हेम जाम्बूनदपदे पुंसि चाहुर्बिशेषका इति । एवमश्मसारमधूच्छिष्टकादीनां यथायोगं योजनीयं सूक्ष्मधीभिरित्युपरम्यते । एवममरनिबन्धनस्याशास्त्रीयत्वमिति सिद्धान्तितम् ॥

Colophon :

इत्थं विपक्षविबुधमस्तकन्यस्तसत्पदा ।
श्रीहर्षेण कृतं सन्तः पठन्त्वमरखण्डनम् ॥

No. **1596.** अव्ययार्णवः.

AVYAYĀRṆAVAH.

Pages, 10. Lines, 26 on a page.

Begins on fol 1*a* of the MS. described under No 1515.
Complete.

A homonymous lexicon, in three Taraṅgas, of the indeclinables in Sanskrit by Jayabhaṭṭāraka. These indeclinables are here said to be given as found in the Śabdārṇava.

Beginning:

महेश्वरपदाम्भोजविलसद्भृङ्गमानसः ।
जयभट्टारकः श्रीमान् स करोत्यव्ययार्णवम् ॥

ये त्वव्ययपरीक्षार्थमनोवृत्तिविचित्रिताः ।
एतत्परीक्षकास्ते स्युस्तरङ्गत्रयसम्मितम् ॥

शब्दार्णवान्तरासक्ता येऽव्ययास्स्युर्मनोहराः ।
नानार्थकास्तानेवाद्य कुर्वेऽत्र बहुविस्फुटम् ॥

आरन्त्वग्रे च धारायां शिखायां मण्डलेऽपि च ।
आरं परसमूहे स्यात् परमार्थस्वरूपयोः ॥

End:

गडखट्टं विलोके स्या(त्)स्वान्तत्वे संव्वतावपि(?) ।
गामानयेति संज्ञायां गाने गङ्गासरिज्जले ॥

शतबाडन्तु शाकुन्ते चातुर्ये शङ्करेऽप्यहो ।
वाचालेऽपि च वाचाटे कुत्सिते पापचिन्तके ॥

Colophon:

इति श्रीमत्समस्त शब्दान्तरङ्ग विद्विचित्र भाषानाथभूषणभूपालाखिल-संसेव्यमानपादारविन्दजगद्विजयप्रभावविराजितजयभट्टकविराजविरचिते अ-व्ययार्णवे तृतीयस्तरङ्गः समाप्तः ॥

No. 1597. अव्ययार्णवः.

AVYAYĀRṆAVAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 1516.

Complete.

Same as the last.

No. **1598.** क्रियानिघण्टुः.

KRIYĀNIGHANṬUḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. *7a* of the MS. described under No. 1513.

Incomplete.

A synonymous lexicon of verbal roots, the third-person-singular-present-tense-forms of which are given as types. The MS. described under the next number ascribes the work to Bhaṭṭōjidīksita.

Beginning:

भवत्यध्ये(त्यास्ते) भवत्यस्ति ज्या(जा)यते विद्यते तथा ।
सम्पद्यते निष्य(ष्प)तति निष्पद्यत उद्श्वति ॥

उत्पद्यतेऽप्युदयति खि(उ)देत्युदयतीति च ।
अङ्करत्यङ्करति चोद्भिद्यते कन्दर(य)त्यपि ॥

End:

रुणद्धि रुन्धे च भिनत्ति भिन्ते युनक्ति युङ्क्ते च भुनक्ति भुङ्क्ते ।
. . . . विद्धिनत्ति ॥

No. **1599.** क्रियानिघण्टुः.

KRIYĀNIGHANṬUḤ

Pages, 9. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 1587.

Wants beginning.

Note the Colophon.

End:

शेते स्वपित्यथोत्तिष्ठत्युज्जिहीते प्रबुध्यते ।
कुप्यति क्रुध्यति तथा रुष्यतीर्ष्यत्यसूयति ॥

Colophon:

इति भट्टोजिदीक्षितकृतः क्रियानिघण्टुः समाप्तः ॥

No. **1600.** त्रिकाण्डशेषः.

TRIKĀṆḌAŚĒṢAḤ.

Substance, paper. Size, 12 × 6 inches. Pages, 70. Lines, 12 on a page Character, Dēvanāgarī. Condition, good. Appearance, old.

Also called Amaraśēsa.

Complete in 3 Kāṇḍas.

This lexicon is intended to be a supplement to Amarasiṁha's Nāmaliṅgānuśāsana, and was composed by Purusōttama

The work was printed at Calcutta, 1807; in the Saṁskritakōśa-catustaya, Bombay, in 1854; and in the Dvādaśakōśasaṅgraha, Benares, in 1865.

Beginning:

जयन्ति सन्तः कुशलं प्रजानां
नमो मुनीन्द्राय सुराः स्मृताः स्थ ।
स्तुतासि वाग्देवि दयस्व मातः
विधेहि विघ्नाधिप मङ्गलानि ॥

अलौकिकत्वादमरः स्वकोषे(शे)
न यानि नामानि समुल्लिलेख ।
विलोक्य वैरूप्य(तेषाम)धुना प्रचार-
मयं प्रयत्नः पुरुषोत्तमस्य ॥

वर्गक्रमस्तथा नामलिङ्गयोस्तूपदेशता ।
परिभाषादिकं सर्वमत्राप्यमरकोश(श)वत् ॥
स्वर्लोको देवलोकस्स्यादवरोहः फलोदयः ।
मन्दरस्सैरिभश्शक्रभवनं खं दिवं नभः ॥

End:

करणे ल्युट् त्रिषु यथा तत्र व्याख्यानमित्यदः ।
सूत्रकृद्भाष्यकृत्कोशा(ऽसा)वनुमान इतीच्छति ॥
इति लिङ्गादिसङ्ग्रहवर्गः ॥
दृष्टप्रयोगा ये शब्दाः प्रायस्त इह कीर्तिताः ।
अप्रयुक्तास्तु पाणिन्यादिषु दृष्टाप्युपेक्षिताः ॥

Colophon:

इति श्रीपुरुषोत्तमदेवविरचितत्रिकाण्डशेषाभिधानकोषः(शः) समाप्तः ॥

No. 1601. त्रिकाण्डशेषः.

TRIKĀṆḌAŚĒṢAḤ.

Substance, paper. Size, $11\frac{1}{4} \times 6\frac{7}{8}$ inches. Pages, 117. Lines, 17 on a page Character, Telugu. Condition, injured. Appearance, old

Complete.

Same as the above.

No. 1602. त्रिकाण्डशेषः.

TRIKĀṆḌAŚĒṢAḤ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 36*a*. The other works herein are Mēdinīkōśa 1*a*, Agaṇitacārah 28*a*, Nāmaliṅgānuśāsanavyākhyā 45*a*, Tīkāsarvasvam.

III Kāṇḍa, incomplete. Breaks off in Ṭhānta in the Nānārthavarga.

Same as the above.

No. 1603. त्रिकाण्डशेषः.

TRIKĀNDAŚĒṢAH.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 95. Lines, 7 on a page. Character, Grantha. Condition, injured Appearance, new.

Complete. Same work as the above.

No. 1604. त्रिकाण्डशेषः.

ṬRIKĀNDAŚĒṢAH.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 57. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains the third Kāṇḍa; incomplete.

Same work as the above.

No. 1605. दृष्टान्तसिद्धाञ्जनव्याख्यानम्—शरत्.

DṚSTĀNTASIDDHĀÑJANAVYĀKHYĀNAM: ŚARAT.

Pages, 20. Lines, 28 on a page.

Begins on fol. 222*a* of the MS, described under No. 1515.

Complete.

This is a commentary on Dṛṣṭāntasiddhāñjana of Vidvatkallōlabhattācārya by his grandson, Vidvaccakōrabhattācārya, son of Mukundanārāyanabhattācārya. The Drstantasiddhāñjana itself is here pointed out to be a commentary on Sabdaliṅgārthacandrikā, which, as its name implies, is a work intended to throw light on the gender and meaning of words.

Beginning :

श्रीजगज्जननीं गौरीमम्बामम्बुजलोचनाम् ।
चन्द्रार्धशेखरां बालां नमामि गुरुपूजिताम् ॥ १ ॥

सर्वसहायां गीस्सर्वसहं(हां) कूटस्थमार्ऽकम् ।
सुजनं सुजनाधारं वन्दे वन्दारुनन्दकम् ॥ २ ॥

श्रीमत्पण्डितकेसरीश्वरमतिप्राबल्यपाण्डित्यकं
तत्पुत्रं सकलागमान्तगमिताम्बामन्त्रमाहात्म्यकम् ।
श्रीसाम्बापरमूर्तिमन्तमधुना विद्वद्विलोलाख्यकं
वन्दे मत्प्रपितामहं कुलधनं मद्विद्यया तोषितम् ॥ ३ ॥

पुनः पुनस्तं पितरं सुपूजितं
समस्तविद्याखिलसारसङ्ग्रहम् ।
कविप्रकाशं करुणारसाकरं
मुकुन्दनारायणभट्टमीळे ॥ ४ ॥

विद्वच्चकोरवरनाम विधाय मोदा-
द्विद्यानिधिं सकलसुन्दरवाक्यजालम् ।
दृष्ट्वैव मां मुदमवाप पितामहो यो
वन्दे तमेव पुनरेव महानुभावम् ॥ ५ ॥

तेनैव चोदित इह प्रकटं करिष्ये
सिद्धाङ्गनार्चितपदावळिमूलकन्दे ।
मूले समस्तवरनाममतानुसारं
कुर्वे शरत्सकलकोशपदाभिरामम् ॥ ६ ॥

उभयानन्दसन्धानशरदानन्दभाग्भवेत् ।
कश्चकोरकवीन्द्रेण विना भूखण्डमण्डले ॥ ७ ॥

पितामहेन ये शब्दा लील[ा]या परिशीलिताः ।
तत्तदन्यपदाकाशं कुर्वेऽहं तदनुज्ञया ॥ ८ ॥

ननु सङ्कर इत्यत्र प्रथमतोऽर्थप्रकटनं किमिति न कृतवानिति शङ्कयामिति चेन्न; उत्तरकोशाविवरणात्तदर्थ स्फूर्तेर्द्वितीयार्थप्रतिपादनाभावाच्चेति भावः । मेघे पुष्कलाख्यपुत्रे । तदुक्तं शब्दचिन्तामणौ :—

End:

कोकिले—"परभृत् कोकिलः कण्वस्ताम्राक्षो मधुरध्वनिः" इति पर्यायार्णवे । दैत्ये वा सामान्ये । "आसुरा दानवा दैत्याः ताम्राक्ष(ा)-रिंशशुपा(:)शुपा" इति पर्यायचिन्तामणौ । पिप्पला नदी । तदुक्तं भागवतपुराणे नदीगणनाप्रस्तावे :—

"चर्मण्वती च वैदेही कोकिला जम्बुकर्णिका" इत्यादिना । "पिप्पलो(ला) नाम नद्यां स्याद्वैदेहि(ही)शम्बरा पुरा" इति पर्यायार्णवे । लिङ्गादित्यादिशब्देन शब्दविकारादय इति यथायोगं मन्तव्यम् । इत्येवम्प्रकारेणेति सम्बन्धः ॥

Colophon:

इति श्रीमदनन्तसान्तसरस्वतीसारविलासापरशिवावतारसरसाग्रेसरसर्वाखर्वदुर्गर्वपूरितसूरिवरप्रण तिभासमानचरणयुगळविराजितसमस्तविद्याप्रविलसच्चतुरवचनमनोहरश्रीमद्विद्वत्कल्लोलभट्टाचार्यपौत्रेण श्रीमन्मुकुन्दनारायणभट्टाचार्यपुत्रेण विद्वच्चकोरभट्टाचार्येण विरचितायां शब्दलिङ्गार्थचन्द्रिकाव्याख्यानदृष्टान्तासिद्धाञ्जनव्याख्यायां शरदाख्यायां तृतीयकाण्ड(:) समाप्तः ॥

Copied by Śeṣayya from the copy of Cettu Rāmācāryalu on 10-8-1831

No. 1606. दृष्टान्तसिद्धाञ्जनव्याख्यानम्—शरत्.

DṚṢṬĀNTASIDDHĀÑJANAVYĀKHYĀNAM: ŚARAT.

Pages, 37. Lines, 6 on a page

Begins on fol. 129*a* of the MS. described under No. 1597.

Complete.

Same as the above.

No 1607. द्विरूपकोशः.

DVIRŪPAKŌŚAḤ.

Pages, 24. Lines, 21 on a page

Begins on fol 283*a* of the MS. described under No. 1515.

Complete.

This is a lexicon giving two forms slightly different from one another in relation to certain words. It was composed by Śrīharṣa, the author of Naiṣadhīyacarita.

Though this work is called Dvirūpakōśa, it contains what may be called Trirūpakōśa, Caturūpakōśa and Pañcarūpakōśa as well.

Beginning:

प्रयोगमाधातुमशाब्दिकानां
कृपामवाप्तुं च सतां कवीनाम् ।
द्विरूपकोशो रचितो विचार्य
बहुप्रबन्धस्थितशब्दभेदान् ॥ १ ॥

ज्ञात्वा च पूर्वप्रचुरप्रयोगान्
प्रामाणिकोदाहरणानि मत्वा ।
रूपादिभेदेषु विच(ल)क्षणेषु
विचक्षणो निश्चिनुयात्सुशब्दान् ॥ २ ॥

द्विलिङ्गताच्प्रत्ययहल्कृतां भिदां
सपञ्चकद्वित्रिचतुःप्रकाराम् ।

भूमैकवाचित्वमपीह वाचां
श्रीहर्षसूरिर्वितनोति कोशे ॥ ३ ॥
क्वचिन्मात्राकृतो भेदः क्वचिद्वर्णकृतोऽत्र च ।
क्वचिद्विभक्तिभेदैश्च शब्दानां रूढितः क्वचित् ॥ ४ ॥
विद्यादगारमागारमापगामपगामपि ।
अरातिमारातिमथ श्रमश्श्रामः प्रकीर्तितः ॥ ५ ॥
भवेदमर्ष आमर्षोऽप्यङ्कुरोऽङ्कूर एव च ।
अन्तरिक्षं चान्तरि(री)क्षमगस्त्योऽगस्तिरित्यपि ॥ ६ ॥

End:

युगळं युगळी युग्मं युगश्च परिकीर्तितम् ॥ २३४ ॥
जागरो जागरा जागर्या जागरणमित्यपि ॥
कण्डूयनं (च)कण्डूया कण्डुः कण्डूश्च कण्डुतिः ॥ २३५ ॥

Colophon:

इत्थं सत्कविराजराजिमकुटी(टा)लङ्कारहीराज(यि)त-
श्रीहीरात्मभवेन नैषधमहाकाव्योज्ज्वलत्कीर्तिना ।
उद्दृ(द्वृ)त्तप्रतिवादिमस्तकतटीविन्यस्तवामाङ्घ्रिणा
श्रीहर्षेण कृतो द्विरूपविलसत्कोशस्सतां श्रेयसे ॥ २३६ ॥

No. 1608. द्विरूपकोशः
DVIRŪPAKŌŚAḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 13. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 48*a*. The other works herein are Kirātārjunīyavyākhya 1*a* and Brahmasūtram 39*a*.

Same as the last.

No. 1609. द्विरूपकोशः.
DVIRŪPAKŌŚAH.

Substance, palm-leaf. Size, 14⅛ × 1½ inches. Pages, 22. Lines. 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete. Same as the above.

The scribe's name is given in the following stanza.

श्रीमत्पल्लकुलोत्फुल्लमहोत्पलविवस्वता ।
द्विरूपसङ्ग्रहं रामचन्द्रेण लिखितं त्विदम् ॥

In the beginning the following stanza is found in addition :

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवः ।
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः
विघ्नाविघ्नघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

No. 1610. द्विरूपकोशः.
DVIRŪPAKŌŚAḤ.

Substance, palm-leaf. Size, 16¾ × 1⅜ inches. Pages, 17. Lines, 7 on a page Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 48*a* The other works herein are Nāmaliṅgānuśāsanavyākhyā 1*a*, Śiśupālavadham 43*a*.

Complete.

No. 1611. धात्वर्थमञ्जरी.
DHĀTVARTHAMAÑJARĪ.

Substance, paper. Size, 17⅛×11 inches. Pages, 171. Lines, 24 on a page. Character, Dēvanāgarī and English Condition, good Appearance, old.

Complete.

A dictionary giving the Sanskrit verbal roots with their meanings in Sanskrit and English with indicative letters for each root,

to denote the various grammatical peculiarities of the roots in accordance with the system adopted in Kavikalpadruma.

At the end an addendum is to be found.

Beginning :

अक. १. कुटिलायां गतौ go crookedly, move tortuously; अकति he moves tortuously ; म.

अक. १. लक्षणे mark : अङ्कते वृषम् he marks the bull: अङ्कः M. mark in इ ङ.

End :

हिस. ७. हिंसायाम् injure, kill. हिनस्ति रिपुम्--he kills an enemy ; हिंसा f. injury, slaughter. घ. इ.

No. **1612.** नाममाला

NĀMAMĀLĀ.

Substance, paper. Size, $12\frac{3}{4} \times 4\frac{1}{4}$ inches. Pages, 19. Lines, 11 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old.

Complete.

This is a lexicon of synonymous words composed by Dhanañjaya, who refers to Akalaṅka and Pūjyapāda (Dēvanandin).

Beginning :

तन्ता(न्त्वा)मामि परं ज्योतिरवाङ्मनसगोचरम् ।
उन्मूलयत्यविद्यां यद्विद्यामुन्मीय(ल)यत्यपि ॥

युग्मनाम—

द्वयं द्वितयमुभयं यमलं युगलं युगम् ।
युग्मं द्वन्द्वं यम(मं)द्वैतं पादयोः पातु जैनयोः ॥

ऋषिनाम—

ऋषिर्मुनिर्यतिर्भिक्षुस्तापसस्संयतो व्रती ।
तपस्वी संयमी योगी वर्णी साधुश्च पातु वः ॥

शिष्यनाम—

दीक्षितं मौढयं(ण्डं)(खं) शिष्यं च तमन्तेवाशि(सि)नं विदुः ।

End:

कल्याणनाम—

क्षेम(मं)कल्याणमभयं श्रेयो भद्रं च मङ्गलम् ।
भावुकं भविकं भव्यं शो(श्वो)वसीयं शिवं तथा ॥

वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ ।
शब्दपारायणस्यान्तं न गतौ तत्र के वयम् ॥

तथापि किञ्चित्कर्ष्मै(स्मै)चित्प्रतिबोधाय सूचितम् ।
बोधयेत्कियदुक्तिं त्वं मार्गज्ञस्सह याति किम्? ॥

प्रमाणमकलङ्कस्य पूज्यपादस्य लक्षणम् ।
द्विस्सन्धानफलेः(नं कवेः) काव्यं रत्नत्रयमपश्चित(म)म् (?) ॥

कवेर्धनञ्जयस्येयं सत्कवीनां शिरोमणेः ।
प्रमाणं नाममालेति श्लोकानाञ्च शतद्वयम् ॥ २०७ ॥

ब्रह्माणं समुपेत्य वेदनिनदव्याजात्तुषाराचल-
(स्थान)स्थावरमीश्वरं सुरनदीव्याजात्तथा केश(व)म् ।
अप्यम्भोनिधिशायितं(नं) जलनिधिध्वानो(ना) पदेशादहो
पूकु(फूत्कु)र्वन्ति धनञ्जयस्य च भिया शब्दास्समुत्पी(डि)ताः ॥

इति धनञ्जयकृता नाममाला.

यावत्सूतं न शुद्धं न च मृतमनु तन्मूर्छितं गन्धव(द्धा)
नो वज्रं मारितं वा न च गगनमथो नोपसूताश्च बुद्धाः ।
स्वर्णाद्यं सर्वलोहं विषमपि न मृतं तैलपाको न बुद्ध-
स्तावद्वैद्यः क्व सिद्धो भवति च सुमतीमण्डले श्लाघयोग्यः (नीयः) ॥

Colophon:

इति श्रीधनञ्जयकोशः सम्पूर्णम्(ः).
मिति वैशाखवदी २ भौमवार संमत् १९०९.

No 1613. नाममाला.

NĀMAMĀLĀ.

Substance, palm-leaf (Śrītāla). Size, $9\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 92 Lines, 5 on a page Character, Kanarese. Condition, injured. Appearance, old.

With Kanarese Tīkā. Incomplete.

Same as the above.

No. 1614. नाममाला.

NĀMAMĀLA.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{5}{8}$ inches Pages, 37. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol 1*a*. The other work herein is Nānārthakāṇḍa padya in Kanarese language, 19*a*.

Incomplete. Same as the above.

No. 1615. नाममाला.

NĀMAMĀLA.

Substance, palm-leaf (Śrītāla). Size, $11\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 84. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

This contains also the Kanarese Ṭikā. There are two copies of the work in this codex, the second of which begins on fol. 83*a*.

No. 1616. निघण्टुसमयः.
NIGHAṆṬUSAMAYAḤ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches Pages, 24. Lines, 5 on a page Character, Telugu Condition, good Appearance, old.

Begins on fol. 1*a*. The other work herein is Vṛttaratnākarah 26*a*.

Complete.

Noticed on page 285 of I O. L Catalogue.

This work consists of two chapters (Paricchēdas), on synonyms and homonyms respectively, by Dhanañjaya. The first Paricchēda is the same as his work Nāmamālā; but the colophon here runs as follows :

इति धनञ्जयकृतौ निघण्टुसमयशब्दसङ्कीर्णसहफणितिः प्रथमः परिच्छेदः ।

The second Paricchēda begins :—

गम्भीररुचिमच्चित्रं विस्तीर्णार्थप्रसादकम् ।
शब्दं मनाक् प्रवक्ष्यामि कवीनां हितकाम्यया ॥
अर्हत्पिनाकिनौ शम्भू जिनार्हच(न्तौ) तथागतौ ।
वेधस्सूर्यौ विवस्वन्तौ विष्णुरुद्रौ वृषाकपी ॥

End :

प्रज्ञानि(न)धारयाक्रम्य चिरं नामार्थधारिणि ।
शब्दास्सुखं वसन्त्वद्य यशश्शेषे धनञ्जये ॥

Colophon :

इति धनञ्जयस्य कृतौ निघण्टुसमये समयशब्दसङ्कीर्णप्ररूपणे द्वितीयपरिच्छेदः ।

No 1617. निघण्टुसमयः.
NIGHANTUSAMAYAH.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 66. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

The work herein consists of 2 Paricchēdas of 202 and 49 verses respectively

The book is said to have belonged to Mallikārjunabhūdhara.

Same as the above.

No. 1618. निघण्टुसमयः.
NIGHAṆṬUSAMAYAH.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{5}{8}$ inches Pages, 10. Lines, 10 on a page. Character, Telugu Condition, injured Appearance, old.

Begins on fol. 1*a* The other work herein is Nāmalingānuśāsana, 6*a*.

Complete. Same work as the above.

No. 1619. निघण्टुसमयः.
NIGHANTUSAMAYAH.

Substance, palm-leaf Size, $13\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 26. Lines, 6 on a page. Character, Kanarese Condition, good. Appearance, old.

Complete. Same as the above

No. 1620. नामलिङ्गानुशासनम्.
NĀMALINGĀNUŚĀSANAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 119. Lines. 9 on a page. Character, Telugu Condition, very good. Appearance, new.

Complete.

This is the famous lexicon of synonyms by Amarasimha.

Beginning:

अह दंशने । रह त्यागे । वह निवासे । हृङ्(ञ्) हरणे । एभ्यः अदो इच् । रोहिः । प्रहिः । अहिः । रहः । वहः । गै शब्दे–निपूर्वात् ऊहः प्रत्ययः । निगु(गू)हः । सिङ् शातने–सिंहः । पा पाने उकारलोपः । . . . क्षः पक्षः । वृङ् वरणे–वक्षः । चङ् याचने । आपूर्वादाचक्षा ॥

Colophon:

इति श्रीमन्महाराजशिरोमणिश्रीभोजमहाराजप्रबोधितनिचुलकवियोगिचन्द्राविनिर्मितायां महाकविकालिदासकृतनानार्थशब्दरत्नकोशरत्नदीपिकायां तरलाख्यायां सर्वे तृतीयं निबन्धनम् ॥

No 1732. नानार्थशब्दरत्नव्याख्या—तरला.

NĀNĀRTHAŚABDARATNAVYĀKHYĀ: TARALĀ.

Pages, 36 Lines, 6 on a page

Begins on fol. 190*a* of the MS. described under No. 1514.

Complete. Same as the last.

No 1733. पर्यायपदमञ्जरी.

PARYĀYAPADAMAÑJARĪ.

Pages, 33. Lines, 24 on a page.

Begins on fol. 53*b* of the MS. described under No.1515.

Complete

This is a synonymous lexicon composed by Vidyā Hamvīra-miśra of the Pēlu family.

Beginning :

श्रीवाणिवन्द्यपादां सिद्धां कामाक्षिनामकलितां ताम् ।
हृद्यां समस्तविद्यां विद्यानिधिकलितदेहविशदाम्बाम् ॥

या मे समस्तजगदन्तरचिन्त्यमान-
विद्यारहस्यपरमाशु विधाय यत्नात् ।
विद्वज्जि(ज्ज)याय च मया [स]सह या चरन्ति(न्ती)
तामेवि(व) मातरमहं प्रणमामि मूर्ध्ना ॥

सोऽहं पुङ्खानुपुङ्खप्रकटितविजयप्रापितानन्दवार्धि-
श्शब्दब्रह्मानुसन्धानितपदहृदयश्शत्रु(त्रु)मस्ताङ्घ्रिपद्मः ।
विद्याहंवीरमिश्रः प्रबलितमहिमा चन्द्रचूडावतारः
कामं काव्यं करोमि प्रचुरितगमकं काविकल्याणदक्षम् ॥

प्रायः प्रकरणपदगतिविज्ञानं प्रज्ञमनुजप्रतिभालम् ।
व्यवहारगतिविहीने तदुपरि किं किमपि नास्ति सुमतीनाम ॥

अज्ञानमूढहृदयाः प्रज्ञातिशया इतिप(तीव) प्रलपन्ति ।
यद्वा तद्वाभवति(दि)ति तद्वारणवदनहरेण हरिरास्ते ॥

ये नित्यव्यवहाराः येऽपि च पुरुषार्थयोगसुसमर्थाः ।
तानेव वच्मि रम्यं पदपूगान् परमशास्त्रपदगर्भान् ॥

तत्र प्रथमे पुरगतिमपरस्मिन्मनुजपठनमपरत्र ।
तत्संसारमशेषं कथयामि व गुच्छभेदकलितेऽस्मिन् ॥

ये दुर्गर्वप्रशान्तान्ता ये विशेषार्थभावनाः ।
त एव सम्यग्गृह्णन्तु पर्यायपदमञ्जरीम् ॥

पुरं ग्रामश्च पल्ली च प्रथमं त्रिविधं मतम् ।
तद्विवेचनमद्यैव करिष्यामि स्फुटार्थकम् ॥

लोके तु मनुजाः प्रोक्ता भिन्नाश्च बहुधापि च ।
बहुजातिय्यो(तीय)भेदाश्च सङ्कराश्च द्विजादयः ॥

ब्राह्मणा(:)क्षत्रिया वैश्याश्शूद्राश्चेति चतुर्विधा(:) ।
प्रथमं ब्रह्मसम्भूतास्ततस्ते सङ्करा यथा ॥

तक्षकः कुङ्कुमकरः पत्रकश्चित्रकारकः ।

गोपालः काचकश्चैव निषादस्तिलघातकः ॥

तन्तुवायः कुलालश्च रजको नापितोऽपि च ।
सू(सौ)चिकश्च सुराकश्च(कूच) तूलको म्लेच्छ एव च ॥

सानिकश्च किरातश्च चण्डालः पुष्कलस्तथा ।
इत्यादिजातिभेदाश्च समुन्नेया मनीषिभिः ॥

तथा चैतद्विशिष्टे तु पुरशब्दोऽभिधीयते ।
किञ्चिन्न्यूनाद्विजात्यादिसंयुक्ते ग्राम ईरितः ॥

चातुर्वर्ण्यविहीनादौ पल्लीशब्दोऽभिधीयते ।

End:

पुष्कले षष्ठमोमन्धिचर्मि(र्म)ग्राहिविरोधकाः ।
चर्मभेदकलौहे स्यादर्भी राढा च विन्नका ॥

एवमन्यप्रपञ्चस्य विशेषाश्च यथाविधि[:] ।
उन्नेया मन्नियोगाश्च शब्दतन्त्रे यथाक्रमम् ।

Colophon:

इति श्रीमदनन्तब्रह्माण्डपीलुपरम्पराभिघटितपीठाभिरामजगदेकस्वतन्त्रश्रीमज्जगज्जननिपरमकरुणाकटाक्षसम्पादितसर्वद्विषत्कविकिरीटमणिकान्तिमञ्जरीपिञ्जनि(रि)तपदाम्बुजविराजमानजगदेकपण्डितविद्याहंवीरमिश्र विरचितायां पर्यायपदमञ्जर्यां सर्वे तृतीयगुच्छस्समाप्तः ॥

No 1734. पर्यायपदमञ्जरी.

PARYĀYAPADAMAÑJARĪ.

Pages, 33. Lines, 6 on a page

Begins on fol. 60*a* of the MS. described under No. 1514.

Complete.

No. 1735. पर्यायरत्नमाला.

PARYĀYARATNAMĀLĀ.

Substance, palm-leaf Size, 16⅝ and 17¾ × 1½ inches. Pages, 54. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol 177*a*. The other works herein are Viśvanighaṇṭu 1*a*, Viśvaprakāśa 51*a*, Paryāyārṇava 120*a*, Śabdaśabdārthamañjūsā 152*a*.

Complete.

This is a synonymous lexicon in three Paricchēdas by Mahēśvara.

Beginning:

श्रीकरनरहरिसुरपतिमहितं मायाविनोदचतुरं तम् ।
अतुलितपदकजसुललितललितं ललिताविलासमजमीळे ॥

यन्मायालवमायया हरिहरब्रह्मादयो मोहिताः
यल्लीलासु विहार . . . . . चनासङ्कल्पमाकल्पकम् ।

यत्तत्त्वाम्बुधिकोटिकोटितरगप्रच्छादिता ज्ञानिनः
तां मायामखिलाम्बिकाममलभामार्यामहं भावये ॥

अधुना कविकल्याणकलनाकल्पवल्लिका ।
कविता . . . . ताजद्वलिता जनिता मया ॥

दिव्यभूजतलोद्भूतजन्तुपर्यायमौक्तिकैः ।
रचिता पर्यायरत्नमाला विद्वद्गलेऽर्पिता ॥

तत्र सर्वत्र ये मुख्यास्तेषां लोकादि . . .
पर्यायशब्दरूपेण रचयामि शिवाज्ञया ॥

गगनं पुष्करं स्वर्मं खमभ्रं व्योमनं ह्रम् ।
व्योम नीरं विहायं च विहायश्च विहायसम् ॥

End:

वने मन्दालयं मश्वं नद्यां पुण्या च पुष्करी ।
गिरौ स्वेतश्च मारी च शक्तौ कुन्ती पुरंजरी ॥

मुनिर्गार्ग्यः प्रियं वक्ता शिवाय प्रिय इत्यपि ।
अनुक्तं गृहपीठादि यथायोगं समुन्नयेत् ॥

ग्रन्थान्तरैर्विस्तृतैस्तैस्तस्मान्नोक्तं विचिन्तयेत् ॥

राजदेवादिभेदश्च वर्तते मतभेदतः ।
युगादिभेदतो वापि तत्र मानं महेश्वराः ॥

Colophon:

इति श्रीमन्महेश्वरमहिमाविनोदचरणकमलनिरन्तरानुसन्धानसञ्जातसकलविद्यासारसर्वज्ञमहेश्वरमिश्रविरचितायां पर्यायरत्नमालायां सर्वं तलोद्भूतवस्तुनिरूपण नाम तृतीयपरिच्छेदस्समाप्तः ॥

No 1736. पर्यायशब्दरत्नम्.

PARYĀYAŚABDARATNAM.

Pages, 74 Lines, 25 on a page

Begins on fol. 119*a* of the MS. described under No. 1515.

Complete.

This is a synonymous lexicon in three Sargas by Dhanañjaya-bhaṭṭācārya, who refers in his introduction to Śabdēnduśēkhara

Beginning:

कैलासे शैलाटी करुणारसपूर्णाचित्तकमनीयम् ।
प्रणमामि मूलकन्दं गौरीयुतवामभागमरुणाङ्कम् ॥
श्रीमद्धनञ्जयकविर्विबुधाग्रगण्य-
स्संस्तुत्य(स्तूय)मानबुधपुङ्गवमङ्गळार्यैः ।
सब्देन्दुशेखरकृतिप्रविलासमान-
कीर्तिर्विपक्षपरमस्तकदत्तपादः ॥
सोऽयं समस्तजगदन्तरचिन्त्यमान-
शब्दानुशासनविचित्रपदाभिरामम् ।
सर्गत्रयानुरचितं सरसानुमोद्यं
निर्मोति दुर्मतिविमोहकशब्दरत्नम् ॥
यच्छब्दश्रवणादेव विद्वानपि विमुह्यति ।
तैरेव कुर्वे पर्यायशब्दरत्नं मनोहरम् ॥
आस्सन्तस्सर्वशब्दानुशासनैर्निर्विशेषकैः ।
सुखेनैतच्छब्दरत्नं कंण्ठे कुर्वन्तु कामतः ॥
ऊर्ध्वमध्यमपाताळवस्तुपर्यायभासुराः ।
प्राचुर्येणात्र पण्यन्ते तिस्रस्सर्गा मितामिताः ॥
ऊर्ध्वं लेखगमानन्दमनन्तं सर्वगं पृथु ।
पुष्करं दुष्करं निष्कं नभः खं नभसं नभम् ॥

भगं नित्यश्च नीरूपं मूलस्थानश्च शाश्वतम् ।
ब्राङ्गी(ह्मी)रन्ध्रं च सम्पूर्णं वियद्भिः खगमङ्गणम् ॥

End:

पद्मपत्रे तु निश्शङ्कं ब्राह्मचां वैधश्च वर्तुलम् ।
इत्यादिजलनाथत्वादप्पतित्वं समुन्नयेत् ॥
वक्ष्यमाणे विशेषाणामन्तः कुत्र प्रदृश्यते ।

Colophon:

इति श्रीमज्जगदेकपण्डितसार्वभौमद्विषत्कविराजशिरोमणिसंराजितपादपीठाग्रसमस्तविद्याधनञ्जयेन धनञ्जयभट्टाचार्येण विरचिते पर्यायशब्दरत्ने पाताळलोकसर्गस्तृतीयस्समाप्तः ॥

No. 1737. पर्यायशब्दरत्नम्.

PARYĀYAŚABDARATNAM.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 20 Lines, 6 on a page Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śabdaliṅgārthacandrikā fol. 11*a*.

Contains only the first chapter.

No. 1738. पर्यायशब्दरत्नम्.

PARYĀYAŚABDARATNAM.

Pages, 88. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1595.

Complete.

No. 1739. पर्यायार्णवः.

PARYĀYĀRṆAVAḤ.

Pages, 64. Lines, 5 on a page.

Begins on fol. 120*a* of the MS. described under No. 1735

This is a collection of synonyms in 5 Tarangas by Nīlakaṇṭha-miśra.

Beginning:

श्रीमहितमाधुरीवरसिद्धश्रीपूर्णहृदयशय्याङ्कम् ।
अरुणारुणाधराम्बरबिम्बारसचुम्बनातिरसमीळे ॥

यस्सर्वागमशास्त्रतन्त्रमहिमा संराजितश्रीधरो
यस्सर्वेश्वरचन्द्रशेखरदयासंवर्धितप्राभवः ।
यश्शत्रुप्रबलोत्तमोत्तमसुधीमिश्रार्चिताङ्घ्रिद्वयो
यस्साम्बावरादिव्यमूर्तिकलितश्रीनीलकण्ठ[ा]स्सुधीः ॥

सकलग्रन्थसन्दर्भविमर्दविमलीकृतम् ।
यस्य चेतस्सरस्वत्या विलासमुकुरायते ॥

सोऽयं सर्वसहावासपण्डितख्यातिदुःखितैः ।
सुजनैरभ्यर्थितस्सन् करोति ग्रन्थमादरात् ॥

धन्वन्तरिमरीच्यत्रिप्रमुखैर्यत् कृतं पुरा ।
भूजशोधनमत्यन्तं तत्करिष्यति कौतुकात् ॥

तस्मादत्रोपयोगा ये तैरेव विशदार्थकम् ।
पर्यायपदसंयोगात्पर्यायार्णव इष्यते ॥

निबन्धभूजसङ्कीर्णतरङ्गवरपञ्चकम् ।
मच्चित्तभूमण्डलात्तत्पर्यायार्णवहव(वार्ब)भौ ॥

भूजो वृक्षलतागुल्मसस्यभेदाच्चतुर्विधः ।
तत्र वृक्षश्चतुर्धा स्यात्तद्रीतिरभिधीयते ॥

वृक्षः पत्रो(त्राः)फलः पुष्पो दारुरित्यभिविश्रुतः ।
पत्रवृक्षस्तत्र भिन्नश्चतुर्धा शास्त्रवेदिभिः ॥
केचिद्भक्ष्याभक्ष्ययोग्याः केचिच्छायोपयोगिनः ।
केचिल्लेखनयोग्याश्च इति भेदश्चतुर्विधः ॥

*   *   *   *

इति श्रीमत्समस्त . . . . . पर्यायार्णवे निबन्धनतरङ्गः प्रथमस्समाप्तः ॥

*   *   *   *

इति श्रीमत्समस्तविद्यानिदान . . . . पत्रफलवृक्षप्रशंसा नाम द्वितीयस्तरङ्गस्समाप्तः ॥

*   *   *   *

इति श्रीमत्समस्त . . . . . पुष्पदारुवृक्षकसंसारलतागुल्मसस्याविशेषपरिशीलनविचारो नाम तृतीयस्तरङ्गस्समाप्तः ॥ . . . .

इति श्रीमत्समस्त . . . . सङ्करप्रकरणे देवतिर्यग्जन्तुविचारो नाम चतुर्थस्तरङ्गस्समाप्तः ॥

End:

जीवनं भुवनं नम्भ्रं(?) तोयं घनरसं सुखम् ।
सालो मत्स्यो जलस्नाविजलगेहोऽनिमीषकः ॥
चन्द्राकृतिकमत्स्ये तु गुडकस्तु प्रयुज्यते ।
ये(ए)वमादिकमन्यश्च(च्च) तत्र तत्र विनिर्दिशेत् ॥

Colophon:

इति श्रीमत्समस्तविद्यानिदानश्रीमत्परमशिवकरुणाकटाक्षपरिलब्धसर्वविद्यासारसर्वस्वाखिलविद्वद्द्विषत्कविराजाकिरीटतटपटलघटनकिणीभूतपदार-

विन्दजगदेकपण्डितापरशिवावतारश्रीनीलकण्ठमिश्रविरचिते पर्यायार्णवे सङ्कर-
प्रकरणे मनुष्यादिविचारो नाम सर्वे पञ्चमस्तरङ्गस्समाप्तः ॥

No. 1740. मेदिनीकोशः.

MĒDINĪKŌŚAH.

Substance, paper Size, 12 × 6½ inches. Pages, 159. Lines, 12 on a page Character, Devanāgarī. Condition, injured. Appearance, new

Complete

This is an exhaustive lexicon of homonymous words by Mēdinikara, son of Prāṇakara. For further particulars *vide* pages 42 to 44 of the Report on a Search for Sanskrit and Tamil MSS by M Seshagiri Sastri, No 2

Beginning:

वृषाङ्काय नमस्तस्मै यस्य मौलिविलम्बिनी ।
जटावेष्टनजां शोभां विभावयति जाह्नवी ॥ १ ॥

पूर्वाचार्यकृतीर्वीक्ष्य शब्दशास्त्रं निरूप्य च ।
नानार्थशब्दकोशोऽयं लिङ्गभेदेन कथ्यते ॥ २ ॥

प्रायशो रूपभेदेन विशेषणवशात् क्वचित् ।
स्त्रीपुन्नपुंसकं ज्ञेयं विशेषोक्तेश्च कुत्रचित् ॥ ३ ॥

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥ ४ ॥

रूपाद्यक्तं लिङ्गमुक्तं लिपिभ्रान्तिच्छिदे क्वचित् ।
विशेष्यनिघ्नेऽनुक्तेऽपि विज्ञेया वाच्यलिङ्गता ॥ ५ ॥

गुणे शुक्लादिकट्वाद्याः पुंसि स्युस्तद्वति त्रिषु ।
तीक्ष्णाद्याश्च गुणे क्लीबं गुणिलिङ्गास्तु तद्वति ॥ ६ ॥

क्लीबपुंसोरपि स्त्रीत्वं क्वाप्यल्पत्वविवक्षया ।
जातिवाचकशब्दानामपि तत्स्त्रीविवक्षया ॥ ७ ॥

उद्भिदः प्रसवे क्लीबे हरीतक्यादयः स्त्रियाम् ।
पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ ८ ॥

प्राङ्नानार्थान्न तल्लिङ्गं द्वयोर्द्वन्द्वे न चैकता ।
शब्दावृत्तिर्न लिङ्गैक्ये सप्तमी न विशेषणे ॥ ९ ॥

क्लीबे नपुंसके पुंसि स्त्रियां योषिति च द्वयोः ।
त्रिषु चेत्यादि यद्रूपं तल्लिङ्गस्यैव वाचकम् ॥ १० ॥

नानार्थः प्रथमान्तोऽत्र सर्वत्रादौ प्रदर्शितः ।
सप्तम्यन्ताभिधेयेषु वर्तमानो विनिश्चितः ॥ ११ ॥

एकद्वित्रिचतुःपञ्चषड्वर्णानुक्रमात्कृतः ।
स्वरकाद्यादिकाद्यान्तवर्णैर्नानार्थसङ्ग्रहः ॥ १२ ॥

नानार्थकोषपुस्तकभारार्जनदुःखहानये कृतिनः ।
मेदिनिकरकृतकोषो विशुद्धलिङ्गोऽभिलिख्यतामेकः ॥ १३ ॥

कैकम् —

को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे ।
कामग्रन्थौ चक्रिणि च पतत्रि (त्रौ) पार्थिवे तथा ॥ १४ ॥

मयूरेऽग्नौ च पुंसि स्यात् सुखशीर्षजलेषु कम् ।

कद्वि(:)—

कोऽर्कपर्णे स्फाटिके रवौ ताम्रे दिवस्पतौ ॥ १५ ॥

End :

हे है सम्बोधने हूतौ हो हौ शब्दस्तथैतयोः ॥

हृत्रि :—

अहहेत्यद्भुते खेदे परिक्लेशप्रकर्षयोः ।
सम्बोधनेऽपि चोताहो परिप्रश्नविचारयोः ॥

इत्यव्ययानेकार्थवर्गः ॥

उत्पलिनीशब्दार्णवसंसारावर्तनाममालाख्यान् ।
भागुरिवररुचिशाश्वद्वो(तवो)पालितरन्तिदेवहरकोषान् ॥
अमरशुभाङ्कहलायुधगोवर्धनरभसपालकृतकोषान् ।
रुद्रामरदत्ताजयगङ्गाधरधरणिकोषांश्च ॥
हारावल्यभिधानं त्रिकाण्डशेषं च रत्नमालां च ।
अपि बहुदोषं विश्वप्रकाशकोषं च सुविचार्य ॥
वाग्भटमाधववाचस्पतिधर्मव्याडितारपालाख्यान् ।
अपि विश्वरूपविक्रमादित्यनामलिङ्गानि सुविचार्य ॥
कात्यायनवामनचन्द्रगोमिरचितानि लिङ्गशास्त्राणि ।
पाणिनिपदानुशासनपुराणकाव्यादिकं च सुनिरूप्य ॥
षट्शतगाथाकोषप्रणयनविख्यातकौशलेनायम् ॥
मेदिनिकरेण कोषः प्राणकरसूनुना रचितः ॥

Colophon :

इति मेदिनिकरकृतानेकार्थकोषस्समाप्तः ॥

No. **1741.** मेदिनीकोशः

MĒDINĪKŌŚAḤ.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 195. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new. Complete.

Same as the above.

Begins on fol. 20*a*. The other work herein is Hārāvalī 1*a*. A table of contents is found in the beginning.

No. 1742. मेदिनीकोशः.

MEDINĪKŌŚAH.

Pages, 54. Lines, 6 on a page

Begins on fol. 1*a* of the MS. described under No. 1691.

To the end of Nānta.

No. 1743. वररुचिकोशः—सव्याख्यः.

VARARUCIKŌŚAH WITH COMMENTARY.

Substance, paper. Size, 9¼ × 4½ inches. Pages, 44. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

This is a work on the gender of Sanskrit nouns. The author of the commentary refers in the introduction to Jaimini, Kātyāyana, Vyāsa, Saṅkara the poet, Ānanda the poet, Daṇḍin, Vātsyāyana and Śāśvata.

Beginning:

पाशाङ्कुशप्रभृतिभूषणभूषिताङ्गीं
सर्वाङ्गरम्यरमणीयविचित्रवेषाम् ।
ब्रह्मादिसेवितपदां कमनीयरूपां
दुर्गां भजामि सततं त्रिपुरारिसेव्याम् ॥ १ ॥
शब्दा बहुविधा लोके सन्ति यद्यपि विस्तरात् ।
तथापि केचिद्रुद्यन्ते छात्रा भावत्कहेतवे ॥ २ ॥
जातिशब्दाः क्रियाशब्दा गुणशब्दास्तथापरे ।
संज्ञाभेदा भवन्त्यत्र सङ्क्षेपादुच्यते विधिः ॥ ३ ॥

गौरश्वः पुरुषो हस्ती शकुनिर्ब्राह्मणस्त्विति ।
एधते धयते शेते भवतीत्येवमादयः ॥ ४ ॥

रक्तः श्वेतोऽर्बुदः कृष्ण एवं डित्थकपित्थवत् ।
पुंसि केचित् स्त्रियामन्ये क्लीबे केचिदुदीरिताः ॥ ५ ॥

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषस्स्मृतः ।
अनयोरन्तरं यच्च तद्वै प्रोक्तं नपुंसकम् ॥ ६ ॥

दृष्ट्वा जैमिनिकोषसूत्ररचनां कात्यायनीयं मतं
व्यासीयं कविशङ्करप्रभृतिभिर्यद्भाषितं निश्चयात् ।
यश्चानन्दकविप्रवीररचितं बद्धं च यद्दण्डिना
यद्वात्स्यायनशाश्वतादिकथितं कुर्वेऽभिधानाद्भुतम् ॥ ७ ॥

मा कुर्वेतु(र्वन्तु)भयं करालकलितः प्रायः श्रुतेनी(र्नो)शनात्
सर्वभ्रान्तजनादनेककविताहीनप्रगल्भाश्रयात् ।
उद्गा(द्गा)रं भवतां विधाय हृदये भो भ्रातरोऽयं मया
कर्तव्यः परमोद्यमः श्रमविधेः शब्दात्कुतस्सीदथ ॥ ८ ॥

किं पद्यभाररचनाभिरनेकवारं
किं वल्गनैः किमिह दर्पपरीतवाक्यैः ।
यल्लभ्यते किल समाधिविधेर्विधानात्
किं तत्र विस्तरविवेचनवाग्भिरर्थैः॥ ९ ॥

को वेद शब्दजलधेरखिलस्य पारं
सारं विधाय विधिना मनसो विचारात् ।
शम्बूकम(क)र्कटझषादिभिरेव सङ्गः
प्रायो भवेदिह न रत्नमिलिः कदापि ॥ १० ॥

यावान् कश्चित् त्रान्तः शब्दोऽत्र नपुंसके हि बोद्धव्यः ।
वर्जं हि पुत्रमन्त्रश्चित्रानेवं गरित्रं च ॥ १ ॥

यावानिति समुच्चये । कश्चिद्यस्त्रान्तश्शब्दः स नपुंसके बोद्धव्यः । पुत्रमन्त्रश्चित्रशब्दान्वर्जयित्वेत्यर्थः । यथा—

"सूत्रं शस्त्रं शास्त्रं मित्रं पत्रं पवित्रं च ।
गात्रं पोत्रं पात्रं दात्रं सत्रं व(च)रित्रं च ॥" इत्यादि ।

अयं पुत्रः सुतः । अयं मन्त्रो होमवाच्यो वेदश्च । हिशब्दोऽनुक्तसमुच्चयार्थः । तेन छत्रछात्रविष्णुमित्रादीनां पुंस्त्वप्राप्तेस्सिद्धिः । अयं छत्रो नर्तकः । आतपवारणवाचकस्य छत्रशब्दस्य नपुंसकतैव इदं छत्रं वर्षातपवारणम् । अयं श(छा)त्रोऽध्येता । अयं विष्णुमित्रः कश्चित्पुरुषः ॥ १ ॥

यात्रा मात्रा भस्त्रा दंष्ट्रा विद्या(त्) स्त्रियां वरत्रा च ।
ईदूदन्तं यच्चैकाच् शरद्दरदृषत्प्रावृषश्चैव ॥ २ ॥

* * * *

स्थूणोर्णे स्त्रीयोगे स्तो गृहशशपूर्व[क]योर्नपुंसकता ।
सर्वस्याक्षिनाम्नो जलनाम्नश्चैव मुक्त्वापः ॥ ३ ॥

* * * *

जलकुसुमनाम सर्वं नपुंसकं स्यात्पद्मस्तु विभाषया ।
अभ्रादृतेऽम्बुदाख्या हि केशनखदन्तसंज्ञाश्च ॥ ४ ॥

End:

व्रजशूलौ पुंसि नपुंसके च मृधम् ।
कम्बलतोमरमुकुलकण्टु(न्दु)काः पुंसि भ[ा]स्त्रा स्त्री ॥ ८८ ॥

* * * *

आकारान्तमीकारान्तं यत्स्थावरं जङ्गमं तत्सर्वं स्त्रीगं भवति । आकारान्तं स्थावरं यथा—इयं गङ्गा, यमुना, नर्मदा । ईकारान्तम्—

शरावती, सरस्वती, इत्यादि । आकारान्तं जङ्गमं यथा—इयं देवता, यज्ञदत्ता, वलाका, अम्बिका, के[ति]त्यादि । ईकारान्तम्—कुमारी, गौरी, ब्राह्मणी, हस्तिनी । (ऊकारान्तं यथा—)श्वश्रूः, वधूः । क्वचिदिति किम्? कटप्रूः, धान्यलूः । अयं योनिः, इयं योनिः ॥ ८९ ॥

वाग्विषयस्य च महतस्सङ्क्षेपत एष विधिरुक्तः ।
यन्नोक्तमत्र सद्भिः तल्लोकत एव बोद्धव्यः ॥ ९० ॥

Colophon :

इति श्रीमदखिलवाग्विलासमण्डितसरस्वतीकण्ठाभरणानेककविशरणश्री- नरपति[सेवि]सेवितविक्रमादित्यकिरीटकोटिनिघृष्टचरणारविन्दाचार्यवररुचि - विरचितो लिङ्गविशेषविधिस्समाप्तः ॥

समाप्तोऽयं वररुचिकोशः ॥

संवत् १८७२ माघकृष्णप्रतिपदा ग्रन्थसङ्ख्या ॥ ४८० ॥

No. 1744. विश्वनिघण्टुः.
VIŚVANIGHAṆṬUH.

Pages, 99. Lines, 6 on a page.

Complete.

Begins on fol 1*a* of the MS. described under No. 1735.

This is a homonymous lexicon by Viśvakavi

Beginning :

श्रीवाणीपरमानन्दनिदानं पदपङ्कजम् ।
अज्ञानान्धनिमग्नानां प्रकाशनमुपास्महे ॥
मातामहमहाशैलं महस्तदपितामहम् ।
जगतः कारणं वन्दे कण्ठादुपरि वारणम् ॥
कारणं चादिजगतां मारणार्थमनागसम् ।
वारणाननमात्मानमद्वयं समुपास्महे ॥

सर्वव्याकरणाम्भोधिं सर्वकोशमहोदधिम् ।
विलोड्य वाणीजनितकवितानन्दनिर्भरः ॥

कविराण्मस्तकारोहकौतूहलसमन्वितः ।
वीरो विश्वकविर्विश्वकोशं पूर्णं करोति सः ॥

सारङ्गश्चन्द्रहंसाब्जचातके गजभृङ्गिषु ।
वीणावारिदकन्दर्पशङ्करार्यमवारिषु ॥

End:

नानार्थप्रथमान्तोऽत्र सर्वत्रादौ प्रदर्शितः ।
सप्तम्यन्तेषु सिद्ध्यर्थं व्याकर्णपदवेदिना ॥
श्रीमद्विश्वकविर्विरिञ्चिवदनश्रेष्ठासनाधिष्ठिता-
वाणीवाणिजसर्वसूत्रजनितव्याकर्णमाकर्ण्य तम् ।
आलोड्यालोड्य कोशं सकलबुधजनारञ्जनानन्दकन्दं
चक्रे चक्रगदाधराङ्घ्रिकृपया विश्वैकविश्वाभिधम् ॥

इति विश्वकोशस्संपूर्णः ॥

No. **1745.** विश्वप्रकाशः

VIŚVAPRAKĀŚAH.

Substance, palm-leaf Size, $15\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 136. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

This is a homonymous lexicon by Mahēśvara. For remarks and extracts see pages 44 and 192 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri, No 2.

No. **1746.** विश्वप्रकाशः.

VIŚVAPRAKĀŚAḤ.

Pages, 138. Lines, 8 on a page.

Begins on fol. 51*a* of the MS. described under No. 1735.

Same as the last.

Beginning :

स्तुतिर्म(वीम)हे महामोहक्लेशातङ्कभिषग्वरम् ।
त्रैधातुकविधानज्ञं सर्वज्ञं दुःखहानये ॥

कलाविलासान्मकरन्दबिन्दुमुद्रां विनिद्रे हृदयारविन्दे ।
या कल्पयन्ती रमते कवीनां देवी नमस्यामि सरस्वतीन्ताम् ॥

कवीन्द्रकुमुदानन्दकन्दोद्यमसुधाकरम् ।
वाचस्पतिमतिस्पर्धिशेमुषे(षी)चन्द्रिकोज्ज्वलम् ॥

क्षुभ्यत्क्षु(त्सु)धाब्धिकल्लोलमालोल्लासियशःप्रियम् ।
गुरुं वन्दे जगद्वन्द्यं गुणरत्नैकरोहणम् ॥

श्रीसाहसाङ्कनृपतेनर(रन)वद्यविद्या-
वै(वे)द्यान्तरङ्गपदमद्वयमेव बिभ्रत् ।

No. 1747. विश्वप्रकाशः.

VIŚVAPRAKĀŚAḤ.

Substance, paper. Size, 11½ × 7 inches. Pages, 304. Lines, 19 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*b*. The other work herein is Purāṇasūcī 305*b*.
Breaks off in Yānta.
Same as the last.

No. 1748. विश्वप्रकाशः.

VIŚVAPRAKĀŚAḤ

Substance, palm-leaf (Śrītāla). Size, 11¾ × 2¼ inches. Pages, 215. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śēṣāmara 109*a*.
Same as the last.

No. 1749. विश्वप्रकाशः

VIŚVAPRAKĀŚAḤ.

Pages, 44. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 1696

Up to Dhānta.

Same as the last.

No. 1750. विश्वमेदिनी.

VIŚVAMĒDINĪ.

Pages, 57. Lines, 6 on a page.

Begins on fol. 163a of the MS. described under No. 1595.

Complete in 3 Kāṇḍas, dealing with Nānārtha (homonyms), Paryāya (synonyms) and Avyaya (indeclinables). This is a homonymous and synonymous lexicon by Sārasvatamiśra, son of Mahādēva; and he refers herein to a work of his own called Hēmamēdinī.

Beginning:

श्रितानन्ताण्डसम्भूतताण्डवाचातिसङ्ख्यकम् ।
अप्रतिद्वन्द्वदाम्पत्यमुमानाथमहं भजे ॥

यद्दिव्यातिकटाक्षलेशविभवाद्ब्रह्मादयो मोहिता
यद्वाक्यामृतवार्धिराशिपटले शेषादयो विस्मृताः ।
यल्लीलाविभवाम्बुधौ मधुरिपुः कान्ताकृतिस्सस्पृहं
सोऽयं चन्द्रकलावतंसकलितो मां पातु माहेश्वरः ॥

एवंकृतमहादेवतनुजात्मकभास्वता ।
अमेयानन्दसंराजन्मानसेन मयाधुना ॥
क्रियते पूर्वमर्यादप्रतिभाव्यपदास्पदम् ।
शब्दानुशासनं चारुशब्दार्थातिविजृम्भितम् ॥

सम्यङ्नानार्थपर्यायाव्ययकाण्डत्रयान्विता ।
मद्बुद्धिक्षीरधेरद्य राजते विश्वमेदिनी ॥
समष्टिभिन्नशब्दार्थाभिन्नभिन्नप्रभेदतः ।
नानार्थश्चापि पर्यायोऽप्यव्ययोऽपि च तादृशः ॥
नित्यवाच्यगलिङ्गादिग्रहणेच्छा भवेद्यदि ।
मदुक्तहेममेदिन्यामस्ति लिङ्गानुशासनम् ॥
तत्र कादिक्षान्तवर्णनानार्थकपदावळेः ।
मेळनं क्रियते चात्राभिन्नशब्दप्रपञ्चने ॥
व्यक्तायान्तु यथायोगमव्यक्तौ व्यक्तिकल्पनम् ।
सर्वत्रैवं नियमनं पूर्वशास्त्रानुरोधतः ॥
शङ्कुर्वल्मीकभेदे स्याद्रोगे मत्स्ये महेश्वरे ।
वकुले कामदेवेऽपि कीलवल्लीविभूतिषु ॥

End:

अन्तरं मध्यसामीप्यवैराग्यप्रभवादिषु ।
उपांशु स्याद्रहस्येऽपि चाञ्जसा त्वरितेऽपि च ॥
अन्तरेणापि सम्बुद्धौ सन्त[।]तार्थेऽपि साधने ।
समन्ततस्सर्वतोऽर्थे शोभानार्थशुभार्थयोः ॥

Colophon:

इति श्रीमत्सकलेश्वरमहेश्वरीमहेश्वरविलासनिवासमाननिरङ्कुशसर्वविद्यानवद्यसारस्वतमिश्रविरचितायां विश्वमेदिन्यां कादिक्षान्तनानार्थाव्ययशब्दनिरूपणं नाम सर्वं तृतीयः काण्डः समाप्तः ॥

No. 1751. विश्वमेदिनीव्याख्या—सुमनःकान्ता.

VIŚVAMĒDINĪVYĀKHYĀ—SUMANAḤKĀNTĀ.

Substance, palm-leaf. Size, 18 × 1½ inches Pages, 42. Lines, 7 on a page. Character, Telugu. Condition, good Appearance, old. Complete.

This commentary is said to have been composed by Vācaspatimiśra, grandson of Sārasvatamiśra, the author of the text.

Beginning:

निखिलागमपल्लविते निगमशिरस्तन्वशीतलोद्याने ।
मधुरतरमञ्जुवाचः कूजन्नास्ते गिरीशकलकण्ठः ॥
यदनुग्रहसंवळितश्रीविद्यासारघुटिकसिद्धोऽभूत् ।
सारस्वतमिश्रोऽयं सर्वज्ञस्तं सदाहमहमीळे ॥
यत्करुणादृष्टिवशान्न्यक्कृतकविराजबृन्दमखिलेशम् ।
तत्पुत्रं मत्पितरं सततं शिरसा नतोऽस्मि सर्वज्ञम् ॥
यत्सारस्वतमिश्र(ा)द्वाचस्पतिमिश्रनाम समभून्मे ।
तं जनकजनकमार्यं शिरसा वन्दे गृहीतशिवतत्त्वम् ॥
अधुना तत्कृतविलसन्मेदिनिभावार्थवेदिसामर्थ्यम् ।
रम्यं सुमनःकान्तं कलये व्याख्यानदीपविशदार्थम् ॥
तत्र च ये ये गूढाः कोविदराज्यां समस्तनिगमान्ताः ।
तत्रैव बहुविधार्थं द्र(प्र)जयामि ह सर्वशास्त्रसङ्गत्या ॥

अथ महान् कविराजशिरोमणिस्सारस्वतमिश्रः प्रथमं निखिलनिगमागमान्तस्सा (सा) रसंवेदनीयपरतत्त्वनिदानमहेश्वरभजनरूपमङ्गळमाचरति श्रित इति—श्रिताः स्वस्मिन्नाश्रिताः । प्रदेशविशेष इति सूच्यते । ये अनन्ताण्डाः अनन्तब्रह्माण्डाः । तेषु सम्भूताः । एतेन "मायान्त(न्तु) प्रकृति विद्यात् इ"ति श्रुत्या "सत्त्वं रजस्तम इति प्रकृतेस्सम्भवा गुणाः" इति चि[त]दंशभूता इति सूच्यते । यास्ताण्डवार्चाः ताण्डवशीला विग्रहाः ।

End:

सादृश्यषट्के । अतिशय इति यावत् । पालनादिषु व्यापारादौ । माहात्म्यपञ्चके । अवधारणषट्के भिन्नषट्के । मर्याद(ा)पञ्चके । निश्चयषट्के

प्रकाशादिषु । प्रभावादिकृत्यर्थः । मणिकुट्टिमे स्थलविसे(शे)ष इति यावत् । अतिसहाये अत्यन्तचतुष्टये । रणादिषु विहारादौ । सम्भावनादिषु समाचारादौ । कुत्सादिषु वितर्कादौ । अतिशयादिषु मनोहरादौ । कळच्याणपञ्चके प्रळयादिषु प्रकारादौ । साम्यादिके साधारणादिके । प्रबलादिषु प्रयोजनादौ । प्रभवादिषु विचारादौ । अनन्तत्वान्निगदत इतीति ॥

Colophon:

इति श्रीपण्डितसार्वभौमवाचस्पतिमिश्रविरचितायां विश्वमेदिनीव्याख्यायां सुमनःकान्ताख्यायां सर्वं तृतीयकाण्डस्समाप्तः ॥

No. 1752. विशेषामृतम्.

VIŚEṢĀMṚTAM

Pages, 7. Lines, 7 on a page

Complete.

Begins on fol. 153*a* of the MS. described under No. 1595.

This is a lexicon giving the alternative forms of certain words by Tryambakamiśra. The name Visāmṛta found in the Śabdārthakalpataru is either wrong or refers to a different work.

Beginning:

सौरेरासाधारं मौरीविशदाङ्क[धं]कम[मा]नीयम् ।
पौरीषालाधारं गौरीरमणं भजामि कमनीयम् ॥

श्रीमद्द्वात्रिंशभाष्यप्रविगतपदवैचित्र्यविच्चित्रवृत्त्या
संज्ञातं शब्दजातं समरसमनसा किञ्चिदूनं विलोक्य ।
श्रीमद्वाणीविलासे परिगतपदतश्शेषबुद्ध्यातिसूक्ष्मं
कुर्वेऽनिर्वाच्यभाष्यान्तरगतसरसो निर्विशेषामृतौघान् ॥

तन्निबन्धनसारेण करिष्यामि पदावळिम् ।
कलयन्त्वलसद्बुद्ध्या सर्वभाष्यार्थवेदिनः ॥

अनाध्यायमहं कुर्वे तदनाध्यायनात्परम् ।
एतत्स्वाध्यायसरसं तपस्स्वाध्यायनः(ना) त्परम् ॥

विरिञ्चिनो विरिचनो विरिञ्ची च विरिञ्चनः ।
विरिञ्चिश्च विरिञ्चश्च विरिञ्चीरपि कथ्यते ॥

परमं परमेष्ठी च परोरश्चापि कथ्यते ।
पिता पितामहः पीता पैतामहपितामहौ ॥

स्वयम्भूर्भूस्स्वभूस्स्वभूर्विधाता विधता विधा ।
धाता धता च द्रुहिणो(णः) द्रुषणो(णः) प्रोषणोऽपि च ॥

End:

आलोकश्च विलोकोऽपि लोकोऽपि च विलोकनम् ।
मानको मानहश्चापि वटहो वटवोऽपि च ॥

एतच्छब्दपरम्परार्थकलने द्वात्रिंशभाष्यावळी-
प्रोद्यत्सारविलासभासुरलसत्स्वान्तो विना भूतले ।

को वेत्त्येव विचिन्त्य निर्मलधियाप्यत्रोपरम्यामहो
नो चेदेवमहो महेश्वरसमः को वास्ति सर्वङ्कषः ॥

श्रीमच्चन्द्रकिशोरखेलनलसन्मौलीसमालोकन-
प्रोद्यन्मानसचन्द्रशेखरदयासम्प्राप्तविद्यानिधेः ।

श्रीमत्त्र्यम्बकमिश्रविश्रुततरतस्सम्यक्कृतं सादरं
सम्पूर्णं सकलागमान्तररसास्वादं विशेषामृतम् ॥

इति श्रीमदरुणाकटाक्षवीक्षणसम्पादितानन्दमुकुन्दकरारविन्दनयनारविन्दपूजितपादारविन्दसकुतुकचन्द्रशेखरदयावलम्बनचिरत्रिभावनसामर्थ्यजगदेकपण्डितहंवीरश्रीमत्त्र्यम्बकमिश्रविरचितं वि(शे)षामृतं नाम पाण्डित्यरसायनं सम्पूर्णम् ॥

No. 1753. वैजयन्ती.

VAIJAYANTĪ.

Substance, paper. Size, 13⅜ × 8⅝ inches. Pages, 247 Lines, 22 on a page Character, Telugu Condition, good. Appearance, new. Complete.

This is a synonymous and homonymous lexicon by Yādavaprakāśa.

Copying was finished on the 20th Sept. 1883.

A good edition hereof has been brought out by Dr. G. Oppert.

Beginning:

ओङ्कारार्थाय तत्त्वाय वाच्यवाचकशक्तये ।
ब्रह्मसंज्ञाय पूर्वेषां गुरूणां गुरवे नमः ॥

प्रकाश्याष्टविधं लिङ्गं निर्लिङ्गं वचनानि च ।
वैजयन्तीति विख्यातं क्रियते नामशासनम् ॥

स्त्रीपुन्नपुंसकं लिङ्गं सङ्कीर्णं तच्च पञ्चधा ।
नृस्त्रीनृषण्डषण्डस्त्रीत्रिलिङ्गं वाच्यलिङ्गकम् ॥

समासलिङ्गाद्विधितस्साहचर्यात्पृथक्कृतैः ।
लिङ्गं विद्यात्प्रयोगाच्च क्तिन् सर्वत्रापि च स्त्रियाम् ॥

यत्प्रवृत्तं समासस्य लिङ्गं तत्स्यात्समासिनाम् ।
विशेषविधितः क्वापि लिङ्गं तत्राप्ययं क्रमः ॥

स्त्रीलिङ्गे स्त्रीत्ययं शब्दः पुंलिङ्गे ना पुमानिति ।
षण् क्ली नपुमिति क्लीबे ये च षण्डार्थवाचिनः ॥

त्रिष्वित्युक्तिर्वाच्यलिङ्गे त्रयीशब्दास्त्रिलिङ्गके ।
अस्त्रीत्यादिनिषेधेषु नृषण्डादीतरद्वयम् ॥

ज्ञातैर्लिङ्गैस्साहचर्यात्कचित्स्याल्लिङ्गनिश्चयः ।
एकत्र सर्वे पुंलिङ्गाः स्त्रियोऽन्यत्र इतो नपुम् ॥

इत्येकस्यापि पर्याया लिङ्गायात्र पृथक्कृताः ।
प्रयोगात्प्रायशो लिङ्गमुदन्तस्संशये पुमान् ॥
सन्दिग्धद्विवचोऽन्तं क्ली ना स्याद्बहुवचोऽन्तके ।
समासे स्युः पृथक्सर्वे शब्दं बहुवचोऽन्तके ॥
न पूर्वशब्दभागत्र पुनस्त्वन्तमथादितः ।
इति परिभाषा ॥

स्वर्गो नाकस्सुरावास ऊर्ध्वलोकः फलोदयः ।
सै(सौ)रिको भोगभूमिस्स्त्री दिवि द्यौश्च त्रिविष्टपम् ॥

End:

अनेकमितिशब्दस्य तद्विशेषस्य चैकता ।
सङ्ख्यार्थस्स्याद्बहुव्रीहेर्यथानेका वधूरिति ॥
विरो(धे) पूर्वदौर्बल्यं ला(लो)कतश्शेषमुन्नयेत् ।
इति सामान्यन्यायाः ॥

सर्वे जनास्सहस्रास्या युगपद्वक्तुमुद्यताः ।
न कलामपि भारत्या ब्रूयुर्वर्षशतैरपि ॥

इति यतिजनसङ्घपूजिताङ्घ्रिप्रथितयशा भुवि यादवप्रकाशः ।
व्यरचयदभिधानशास्त्रमेतत् सह वचनैस्सह लिङ्गसङ्ग्रहेण ॥
एतां कृतामष्टभिरुक्तकाण्डैः भूतस्वरूपैरिव नाममालाम् ।
धत्तां विशाले हृदये मुरारिः स्वां वैजयन्तीमिव वैजयन्तीम् ॥
एवं सूक्ष्मन्यायनिर्णीतशब्दैस्सर्वार्थानां व्यञ्जकोऽसौ निबन्धः ।
संवित्तीनां भूषणं सत्कवीनां प्राप्तः पारं वैजयन्तीनिघण्डुः ॥

नानाविद्यावेद्यवाग्रत्नमालमूर्ते(र्तिं) वेदं वेदयन्ती त्रिवेद्याः ।
बो(रो)द्धं बुद्धिध्वंसकध्वान्तचक्र(क्रं)प्राज्ञो ज्ञे(ज्ञैर्ज्ञे)या वैजयन्ती जयन्ती ॥

Colophon:

इति भगवता विदितनिखिलनिगमनिचयरहस्यविद्येन दिनमणिसमतेजसा सकलतत्त्वप्रकाशेन यादवप्रकाशेन विरचितायां वैजयन्त्यां शेषकाण्डे लिङ्गसङ्ग्रहाध्यायः ॥

अक्षरं यत्परिभ्रष्टं मात्राहीनन्तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः प्रियपुत्रापराधवत् ॥

आदर्शदोषान्मतिविभ्रमाद्वा
श्रुत्यर्थहीनं पुरुषं मया यत् ।
तत्सर्वमार्यैः परिशोधनीयं
प्राणे(ये)ण मुह्यन्ति च ये लिखन्ति ॥

No 1754. वैजयन्ती.

VAIJAYANTĪ.

Substance, paper. Size, 14 × 8½ inches. Pages, 434. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same as the above work

No. 1755. वैजयन्ती.

VAIJAYANTĪ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 30. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Paribhāṣākāṇḍa, the Dvyakṣarakāṇḍa, and the Tryakṣarakāṇḍa to the end of Arthavalliṅgādhyāya.

No **1756.** वैभाषिककोशः सव्याख्यः

VAIBHĀSIKAKŌŚAH WITH COMMENTARY.

Substance, paper Size, 12¼ × 9⅜ inches. Pages, 363. Lines, 20 on a page. Character, Dēvanāgarī Condition, good. Appearance, new

This lexicon gives the alternative forms of certain words. It is commented upon by the author himself who is Krsnakavi, son of king Laksana and Mallikā. The date of the composition of the work is given as Kali 4869, Sarvadhāri, and of the commentary as Kali 4882.

Beginning :

वैभाषिकस्य कोशस्य व्याख्यानं क्रियते मया ।
कोशकारेण च कवौ विरलाः पण्डिता इति ॥

व्यक्तिद्वयं जगति येन समानमर्थं
प्राप्नोति तं कमलकोशकुरङ्गपाणिम् ।

लक्ष्मीसमेतपुरुषोत्तमदेहशोभा-
दस्यो(स्वो)त्तमाङ्गरुहमर्धसतिं प्रपद्ये ॥

व्यक्तिद्वयमिति। येन साम्बेन परमेश्वरेण व्यक्तिद्वयं स्त्रीपुरुषयुगलं जगति सर्वलोक इत्यर्थः। समानमेकम्(अर्थम्) लक्ष्मीं(क्ष्यं) विषयाणि शब्दादीनि प्राप्नोति नेत्रद्वयदृष्टरूपद्रव्यवदेकत्वेन गृह्णाति। कमलकोशश्च तु(कु)रङ्गश्च वामदक्षिणपाण्योर्यस्य सः, लक्ष्मीसमेतपुरुषोत्तमदेहशोभादस्यो(स्वो)त्तमाङ्गरुहं तटिद्गौर्या लक्ष्म्या सह विवाहमण्टपभद्रासने क्षुमाकुसुमसमानकोमलकायेन तां संश्लिष्य सुखासीनस्य नारायणस्य शोभां क्रमेणापहरन्तः पिङ्गलजटानीलालकाः नम् अर्धसतिम् अर्धशरीरलग्नसतिं साम्बशिवम्। गोस्त्रियोरुपसर्जनस्येति ह्रस्वः। प्रपद्ये सेवे पद गतौ। सूच्यार्थसूचनं मुद्रा प्रश्र(स्तु)ताथ(र्थै)परैः दैरिति लक्षणानुगत्या मुद्रालङ्कारोऽयं वक्ष्य-

माणानां द्विरूपाणां शब्दानामेकार्थप्रतिपादकत्वं सूच्यते। अयं(त्र) वसन्ततिलकावृत्तम्। त्भौ जौ गाविति छन्दस्सूत्रात्॥

End:

एवमन्येऽपि बोद्धव्याः स्त(तत्त)त्संब(न्ध)मात्रतः।
भूरिप्रयोगादेतेषां परिज्ञानं यथाक्रमम्॥

शब्दस्वरूपं जानाति कः पुमान् शङ्कराद्दते।
यथामति यथाशास्त्रं यथाशक्ति कृतं मया॥

द्विरूपशब्दजालानां क्वचिदेकबहुत्वयोः।
दिङ्मात्रं दर्शितं रूपं तत्र तत्र समीक्ष्य च॥

पण्डिता दोषमुत्सृज्य सारमादाय सादरम्।
काव्यश्चेद्रक्ष्यमत्रायं श्रमो युष्माभिरीक्षितः॥

कृतः फलं किमिति चेदत्र किञ्चिद्विशिष्यते।
अनुप्रासानुरोधश्च तथैव पद[ा]स(सं)हिता॥

छन्दोनिर्बन्धरहिता वर्ण्यस्वरसपोषणम्।
सूत्रवार्तिकभाष्यप्राचीनवाक्यप्रमाणता॥

संभवन्ति कथं श्लोका हृदयालुमनोरमाः।
विरूपमन्तरेणास्मात्कोशो वैभाषिकस्स्मृतः॥

कविकृष्ण इति ख्यातो लक्षणनृपतेश्च मल्लिकादेव्याः।
तनयो विनयग्राही रा . . . स्मिन्नाथिकृतो ग्रन्थे॥

न्यधायि वैभाषिककोशमालिका सदार्थनारीश्वरवक्षसि स्फुटम्।
विलक्षणं व्यक्तिरहो न या स्फुरेत्किमस्ति भेदार्थवतीशितुर्मया॥

* *

त्रिंशत्प्रथमसर्गे स्युः श्लोका वैभाषिकाभिधे।
कोशे द्वितीयसर्गे च सप्ताशीतिस्ततः परे॥

नवसप्ततिरेव स्युः तृतीये च चतुर्थके ।
पञ्चाशीतिः पञ्चमे स्युरष्टषष्ट(ष्टि)स्ततः परे ॥

पञ्चसप्ततिकाष्षष्ठे पञ्चपञ्चाशदुत्तरे(रम्) ।
शतं सप्तमसर्गेऽस्मिन् अष्टमे संप्रकीर्तिताः ॥

स्युरष्टपञ्चाशदुत्तरशतं नवमे तथा ।
अष्टपञ्चाशच्छिरस्कद्विशतं दशमे ततः ॥

चतुष्षष्टिस्तथैकादशे सर्गे विबुधैस्स्मृताः ।
द्विपञ्चाशदिति स्युस्ते सर्वे चन्द्रचतुष्टये ॥

निमित्तस्सर्वधार्य्यब्धे कोशो वैभाषिकाभिधः ।
रन्ध्रारिमदवेथा(दा)ब्दैर्यदा निर्गलितः कलिः ॥

निर्मितं कविनैवास्य व्याख्यानं प्लववत्सरे ।
वैभाषिकाभिधे कोशे प्रथमसर्गे त्रिंशच्छ्लोकाः ॥ ३० ॥

द्वितीयसर्गे सप्ताशीतिश्लोकाः ॥ ८७ ॥
तृतीयसर्गे नवसप्ततिश्लोकाः ॥ ७९ ॥
चतुर्थस्सर्गे पञ्चाशीतिश्लोकाः ॥ ८५ ॥
पञ्चमसर्गे अष्टषष्टिश्लोकाः ॥ ६८ ॥
षष्ठ[ः]सर्गे पञ्चसप्तका(ति)ःश्लोकाः ॥ ७५ ॥
सप्तमसर्गे पञ्चपञ्चाशदुत्तरशतं श्लोकाः ॥ १५५ ॥
अष्टमसर्गे अष्टपञ्चाशदुत्तरशतं श्लोकाः ॥ १५८ ॥
नवमसर्गे अष्टपञ्चाशच्छिरस्कद्विशतं श्लोकाः ॥ २५८ ॥
दशमसर्गे तु चतुष्षष्टिः श्लोकाः ॥ ६४ ॥
एकादशे सर्गे द्विपञ्चाशच्छ्लोकाः ॥ ५२ ॥

अस्मिन् कोशे ते(स)र्वे मिलिताः श्लोकाः चन्द्रचतुष्टये १११९ रन्ध्राग्निदवेदाब्दैः ४८६९ यदा निर्गलितः कलिः । तदा सर्वधार्य्यब्दे वैभाषिकाभिधः कोशो निर्मितः नेत्रनागमदाम्नायैरब्दैः ४८८२ यदा गलितः कलिः तदा अस्य वैभाषिककोशस्य व्याख्यानं निर्मितं केनेत्याकाङ्क्षायां कविनैवेति कोशकारेणैवेति स्पष्टमुक्तम् ॥

Colophon:

इति श्रीमद्वैभाषिककोशे सव्याख्याने पर्यायशब्दबहुत्वाधिकारे एकादशसर्गस्समाप्तः ॥ २६–१०–९४ ने जयसं० ॥ आश्वयुजकृष्ण १३ त्रयोदश्यां भार्गववारे समाप्तोऽयं श्रीरस्तु ॥

No. 1757. शब्दभेदप्रकाशः.

SABDABHĒDAPRAKĀŚAH.

Substance, paper. Size, 10⅜ × 4⅝ inches. Pages, 17. Lines, 16 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

Copying finished on Thursday the third of Āsāḍha-śuddha in the year Khara

This is a lexicon giving the alternative forms of certain words. The work is attributed in the colophon of the MS. described under the next number to Bhaṭṭōjidīkṣita

Beginning:

प्रबोधमाधातुमशाब्दिकानां कृपामुपेत्यापि सतां कवीनाम् ।
कृतो मया रूपमवाप्य शब्दभेदप्रकाशोऽखिलवाक्पयोधेः ॥

प्रायो भवेद्यः प्रचुरः प्रयोगः प्राणंशो(माणिको)दाहरण[ः]प्रती(णी)ति(त): ।
रूपादिभेदेषु विलक्षणेषु विचक्षणो निश्चिनुयात्तमेव ॥

क्वचिन्मात्राकृतो भेदः क्वचिद्वर्णकृतोऽत्र च ।
क्वचिदर्थान्तरोल्लेखाछ(च्छ)ब्दानां रूढितः क्वचित् ॥
जागर्ति यस्यैष मनस्सरोजे स एष शब्दार्थविवर्त्तनेशः ।
निजप्रयोगार्पितकामचारः परप्रयोगप्रसरार्गलश्च ॥

विद्यादगारमागारमपगामापगामपि ।
अरातिमारातिमथो अम आमश्च कीर्तितः ॥

भवेदमर्ष आमर्षोऽप्यङ्कुरोऽङ्कूर एव च ।
अन्तरिक्षमन्तरीक्षमगस्त्योऽगस्तिरित्यपि ॥

अटरूष(प)आ(श्वा)टरूषो(पोऽ)वश्योऽवश्याय इत्यपि ।
प्रतिश्यायः प्रतिश्यावो भाल्लको भल्लुकोऽपि च ॥

End:

नपुंसकत्वेऽप्येतच्च मालावत्परिकीर्तितम् ।
षष्ठ्यापरासुराशाल . . . . .

स्त्रीत्वेऽपि वनवच्चैतत्स्यान्नदीवदथोच्यते ।
आस्थानं नगरं स्थानं स्थालञ्च पटलं पुरम् ॥

इति अङ्गरूप . . . . करचितप्रमुखासु गद्यपद्यप्रबन्धरचनासु वितन्वतैव(?) ।

व्युत्पत्तिमुज्ज्वलतमां परमाञ्च शक्ति-
मु .. . . सरस्वतीयम् ।
निश्शेषवैद्यकमताम्बुधिपारदृश्वा
शब्दागमाम्बुरुहखण्डरविः कवीन्द्रः ॥

य . . . . मां निरमात्प्रकाम-
मालोच्यतां सुकृतिनस्तदसावनर्घा ।
नामपारायणोणादिनिरुक्ति . . . .
शब्दवर्णविधिश्चान्तस्सद(न्द)र्भो ह्येष साधुभिः ॥

कर्तुं चेतश्चमत्कार सतां हर्तुं विपर्यं . . ।
. . . च निराकर्तुमयमसत्परिश्रय(म): ॥
छन्दोऽनुप्रासयमकश्लेषचित्रेषु निर्णयः ।
एष्वेवा . . . श्च कवितुर्ज्ञातुरेव च ॥

Colophon:

इति श्रीखरनामसंवत्सर आषाढमासशुक्लपक्षे तृतीयायां गुरुवासरे वेङ्कटेश्वरसन्निधौ रवक्षीशेतुरा(घ)वपुत्रेण वेङ्कटेशेन लिखितम् इदं विश्वकोशपुस्तकम् ॥

No **1758.** शब्दभेदप्रकाशः.

ŚABDABHEDAPRAKĀŚAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 70 *a* of the MS. described under No. 1724.

Complete.

Same as the last.

End:

कौतुककुतुकाभिन्नाभिन्नौ कन्दं दन्त्यखरादिवत् ।
वान्मिवात्मिकमित्राको नत्वभत्रवतात्रिकाः ॥
सत्कलेत्यासंयोगी शब्देष्वनुपयोगिषु ।
इदन्तु . . . चित्
यकादावपि . . . त्येषा
चिन्तास्माभिरपेक्षिता
तथाह्यावश्यदद्राक्षीदित्यत्रार्थे क्रियाविदा ।

अवयस्तोऽन्यत्र पद्यद्वयम् ॥

इति शब्दभेदनिर्देशः ॥

भट्टोजिदीक्षितो वाग्मिजनानां सुखबुद्धये ।
द्विरूपकोशनामानं निघण्टुं समकारयत् ॥

Colophon :

इति श्रीभट्टोजिदीक्षितविरचितश्शब्दभेदनिर्देशः समाप्तः ॥

No. 1759. शब्दलिङ्गार्थचन्द्रिका.

ŚABDALIṄGĀRTHACANDRIKĀ.

Pages, 57 Lines, 24 on a page.

Begins on fol. 156 *a* of the MS. described under No 1515.

Complete in 3 Kāṇḍas.

This is a homonymous lexicon specifying the gender in relation to each of the meanings of the homonymous words dealt with therein. The author is Sujana.

Beginning :

देदीप्यमानदेव्यास्तु देयास्तौ(स्तां) चरणौ शुभम् ।
कञ्जकिञ्जल्कपुञ्जाभमञ्जुमञ्जीरराजितौ ॥

सरस्वतीरसे तृप्तस्सोऽहं सत्संविचार्य च ।
सरस्वतीविलासाय संसृजद्यत्सुमानसम् ॥

सोऽयं श्रीसुजनस्तस्या लास्यमभ्यासइ(यि)ष्यति ।
पश्यन्तु लास्यसर्वस्वसारसङ्ग्रहणेच्छवः ॥

सोऽयं करोति सद्ग्रन्थानालोच्याबुधचेतसाम् ।
अज्ञानग्रन्थिभेदार्थं शब्दलिङ्गार्थचन्द्रिकाम् ॥

एकलिङ्गैर्द्विलिङ्गैश्च त्रिलिङ्गैश्च करोत्ययम् ।
शब्दैः काण्डैस्त्रिभिः पूर्णां शब्दलिङ्गार्थचन्द्रिकाम् ॥

केचिन्नानार्थकानाहुः केचिल्लिङ्गविनिश्चितान् ।
सोऽयमारभते तादृकृश(छ)ब्दलिङ्गार्थचन्द्रिकाम् ॥

यद्यप्युक्ता विचित्रोक्तिस्सकलानामपि प्रिया ।
तेनैव लीलया चोक्ता नानार्थपदपेटिका ॥

तथापि शब्दलिङ्गार्थचन्द्रिका शब्दवारिधौ ।
मग्नालिङ्गार्थमत्स्यार्थं मज्जतां महतां मुदे ॥

शङ्कस्तु शङ्करे शैवभेदे जलचरान्तरे ।
ध्रुवे पत्रशिलाजाले सङ्ख्याभेदे च कीलके ॥

End :

ताम्राक्षः कोकिले दैत्ये लोहिताक्षे त्रिलिङ्गकः ।
तुम्बिभेदे गवाक्षस्स्याद्गवाक्षा तु स्त्रियां स्मृता ॥

वातायने गवाक्षोऽस्त्री वानरे पुंसि कथ्यते ।
वैदेही पिप्पला सीता विदेहीयस्त्रिलिङ्गकः ॥

Colophon :

इति श्रीमदनवद्यविद्याहृद्याखण्डपाण्डित्यमण्डितपण्डितमण्डलविकट-पटुतरकिरीटपटलतटपटुघटितमरकतमुखमणिगणघटनसन्दीप्यमानारुणारुण-चरणनखेन, शश्वदमन्दानन्दसन्दोहकन्दळीकृतहृदयारविन्दसखेन, समस्त-विपक्षपक्षदक्षप्रशस्तमस्तकविन्यस्तवामपादेन, सकलदर्शनाप्रतिद्वन्द्वभूतवा-देन, सर्वदानन्दितस्वजनेन श्रीसुजनेन विरचितायां निखिलकोशसाररूप-विरचितायाम् अखिलसरसरसान्द्रिकायां शब्दलिङ्गार्थचन्द्रिकायां सर्वः त्रि-लिङ्गकाण्डस्सम्पूर्णः ॥

सुजनेन कृतः श्रीमत्तृतीयः काण्ड ईदृशः ।
समर्पितश्शङ्कराय भक्तहृत्पद्मभानवे ॥

No 1760. शब्दलिङ्गार्थचन्द्रिका.

ŚABDALIṄGĀRTHACANDRIKĀ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 45 Lines 8 on a page. Character, Telugu Condition, good. Appearance, old Complete.

No. 1761. शब्दलिङ्गार्थचन्द्रिका.

SABDALIṄGĀRTHACANDRIKĀ

Pages, 72. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 1595

Complete.

No. 1762. शब्दलिङ्गार्थचन्द्रिकाव्याख्यानम्—दृष्टान्तसिद्धाञ्जनम्.

ŚABDALIṄGĀRTHACANDRIKĀVYĀKHYĀNAM: DṚṢṬĀNTASIDDHĀÑJANAM.

Pages, 67. Lines, 28 on a page

Begins on fol. 185*a* of the MS. described under No 1515.

Complete.

This is a commentary on the last described work by Vidvatkallōlabhaṭṭācārya, son of Kēsaribhaṭṭa and grandson of Sujanabhaṭṭa, the author of the original of the lexicon.

Beginning:

श्रीसर्वमङ्गळां देवीं श्रितपालनतत्पराम् ।
आश्रये वाक्सहायार्थमरुणीं कुलदेवताम् ॥

समस्तविद्यासारज्ञं साधुपण्डितपूजितम् ।
सन्नम्रशिरसा वन्दे सुजनं मत्पितामहम् ॥

सर्वविद्यासु सारस्यं ज्ञात्वा तन्मुखपङ्कजात् ।
तदाज्ञाकज्जलेनाहं सम्यक् पश्यामि चन्द्रिकाम् ॥

करिष्ये शब्दलिङ्गार्थचन्द्रिकातत्त्वशोधि(ध)नम् ।
दृष्टान्तसिद्धाञ्जनं सद्व्याख्यानं विशदार्थकम् ॥

ये प्राचुर्यान्न विज्ञातारशब्दार्थाश्शतशस्त्विह ।
तेषामेव करिष्यामि शोधनं विदुषां मुदे ॥

पुराणादिकदृष्टान्तपूर्वकं रचयाम्यहम् ।
तथैव तत्कवेर्ग्रन्थे ग्रथनाद्विदुषां पतेः ॥

अथ भगवान् श्रीमत्सुजनभट्टकविर्मङ्गळादीनि मङ्गळमध्यानि मङ्गळान्तानि शास्त्राणि प्रथन्त इति शासनानुसारादिष्टदेवतानमस्काररूपमङ्गळमादौ निबध्नाति देदीप्यमानमिति । देव्याः महाशक्तेः पार्वत्याः रञ्जितौ । प्रकाशितौ । सरस्वत्यादिषु नद्यादिकमालोचनीयम् ।

* * * * *

शैवभेदे —शङ्कुरिति कश्चिद्गन्धर्वः शिवभक्ताग्रणीः । तदुक्तं स्कान्दे—

"पुष्पदन्तश्शङ्कुकर्णो विकर्णश्शङ्कुरित्यपि ।
गन्धर्वाः शिवभक्तानां श्रेष्ठा इति समीरिताः ॥" इति ॥

जलचरान्तरे मत्स्यविशेष इत्यर्थः । ध्रुवे अनेकशाखावृतवृक्षमूले । पत्रशिलाजाले पत्राणां पर्णानां शिलानां च जाले बृन्दे । कीलके पश्वादिबन्धनदारुविशेषे । "शङ्कुः पत्रशिलाजाले सङ्ख्याकीलकशम्भुषु । यादोभेदे ध्रुवे चापि" इति हैमः ॥

End:

धृतराष्ट्रसुतं—"धृतराष्ट्रसुते मोलहे समाः पुंसि" इति धनञ्जयः तीर्थभेदे । तदुक्तं तीर्थयात्रायाम्—

वाराहं नाम तीर्थं तु निर्मितं विश्वकर्मणा" इति।
वृक्षे, दैत्ये तत्सामान्ये, तुम्भिभेदे, स्त्रियां कुल[य]ाक्ष्यामित्यर्थः।
"कम्बुाक्ष्यां तु गवाक्षा च गागवा गा च कथ्यते" इति पर्यायार्णवे।
श्रीमति लिङ्गादिवैचित्र्येण चमत्कारकारिणीति यावत् ॥

Colophon:

इति श्रीमच्छरदिन्दुसुन्दरेन्दुशेखरारविन्दासनमुकुन्दपुरन्दरादिबृन्दारकबृन्दवन्दितचरणारविन्दामन्दस्यन्दमानमरन्दबिन्दुसन्दोहपरिपूर्णहृदयारविन्देन सकलविद्यानिदानजगदेकपण्डितश्रीमत्सुजनभट्टाचार्यपौत्रेण पण्डितकेसरिभट्टाचार्यपुत्रेण विद्वत्कल्लोलभट्टाचार्येण विरचितायां शब्दलिङ्गार्थचन्द्रिकाव्याख्यायां दृष्टान्तसिद्धाञ्जनाख्यायां तृतीयः काण्डः समाप्तः ॥

No 1763. शब्दलिङ्गार्थचन्द्रिकाव्याख्यानम्—दृष्टान्तसिद्धाञ्जनम्.

ŚABDALIṄGĀRTHACANDRIKĀVYĀKHYĀNAM:
DṚṢṬĀNTASIDDĀÑJANAM.

Pages, 96. Lines, 6 on a page

Begins on fol. 81*a* of the MS described under No. 1595.

Complete.

No. 1764. शब्दशब्दार्थमञ्जूषा.

ŚABDAŚABDĀRTHAMAÑJŪṢĀ.

Pages, 50. Lines, 6 on a page.

Begins on fol. 152*a* of the MS. described under No. 1735.

Complete in 3 chapters.

This is a homonymous and synonymous lexicon composed by king Hamvīramiśra.

Beginning:

यन्मायामहिमाभासादिदं जगदभात्यलम् ।
तमादिपुरुषं वन्दे सर्वातीतं मनोहरम् ॥

अधुना देवमानुष्यतिर्यक्छब्दार्थजृम्भिताम् ।
रम्यापवरकप्राप्तत्रितयातिमनोहराम् ॥

नानार्थसविकारार्यपर्यायपदभासुराम् ।
शब्दशब्दार्थमञ्जूषामपूर्वां रचयाम्यहम् ॥

अनन्तशब्दजलधेः प्रानी (ची)नकविसन्ततेः ।
विना हंवीरमिश्रोक्तिप्लवं किं तारकं भवेत् ॥

तस्मादनन्तशब्दाब्धिविचित्रार्थपदाण्डजान् ।
प्रतिभाजालभेदेन गृह्णामीहातिलीलया ॥

प्रथमं पुरुषाज्जाता ब्रह्मविष्णुमहेश्वराः ।
यक्षरक्ष(क्षो)विभेदेन देवा द्वेधा बभूवतुः ॥

तत्र यक्षा बहुविधा विद्यांधरमुखा यथा ।
विद्याधरो यक्ष इति प्रथमं द्विविधा ततः ॥

सिद्धस्साध्यः किन्नरश्च गन्धर्वो गुह्यकस्तथा ।
अप्सराः पन्नगाद्याश्च बहुभेदा इतीरिताः ॥

End:

त्रिलेशयः कळानाथे मृगेन्द्रे परमात्मनि ॥
पुरन्दरे महादेवे कुत्सिते वाच्यलिङ्गकः ॥
पारावते परिक्षीणे माणिक्याधारकेऽपि च ॥
अनन्तत्वात्पदार्थानां पर्यायाणामसङ्ख्यया ।
उक्ता एवालमित्यूह्य(ह्यं)शाम्यते शब्दवारिधौ ॥

Colophon :

इति श्रीमदनेकाखण्डजगदण्डमण्डलपीलुहृदयप्रदेशविशेषाशेषमहिम-महानुभावविलासमानप्रभावविकासकैलासविकासपरमशिवसकलयोगिशरण्य-चरणकमलसंस्मरणानुसरणमात्रसञ्जातजगदेक निरङ्कुशनिस्सहायसमस्तविद्या-विलासनिवासमानसभासमानकविहंवीरमिश्रराजविरचितायां शब्दशब्दार्थ-मञ्जूषायां तिर्यग्जन्तुविचारो नाम सर्वं तृतीयापवरकस्समाप्तः ॥

No. 1765. शब्दशब्दार्थमञ्जूषाव्याख्या—ढौका.

ŚABDAŚABDĀRTHAMAÑJŪṢĀVYĀKHYĀ : DHAUKĀ.

Pages, 45 Lines, 26 on a page.

Begins on fol. 70*a* of the MS. described under No. 1515 Complete.

This is a commentary on the last described work by Murārimiśra, pupil of Manimiśra

Beginning :

भजे भगवतीभावभावुकाम्लानभावकम् ।
शृङ्गारपीठकं मौनिं दक्षिणामूर्तिमुल्बणम् ॥
अचिन्त्यविभवानन्दकल्लोलायत्तविश्रमम् ।
मद्गुरुं मणिमिश्राख्यं प्रणमामि जगद्गुरुम् ॥
यस्समस्तकळाराशिमन्थनामृतविभ्रमः ।
मुरारिमिश्रनामायं कविराड्य लीलया ॥
शब्दशब्दार्थमञ्जूषां बन्दितार्थगलन्तिकाम् ।
ढौकाभिधानव्याख्यानाद्विशदार्थां करोति ह ॥

अथ कविरादौ मङ्गलमावहरति यदिति । यस्य जगदीश्वरस्य माया-महिमाभासात् अविद्याप्रज्ञाविशेषप्रतिभानादिदं परिदृश्यमानं जगदलम-भाति । एवं च यदनुग्रहाद्यदिदं विभातीति निगर्भितार्थः ।

अत एव सर्वातीतं व्यापकं मनोहरं तमादिपुरुषं वन्द इति योजना ॥

प्रस्तुत्य नटयति अधुनेति :—

End :

व्याळति व्याप्नोतीति कुण्डलवच्छेत इति । फणसाहित्यात् । दर्वी मूर्तिं करोतीति । "दर्वी पात्रान्तरे वित्ते मृते मत्स्यान्तरेऽपि च" इति शाश्वतः । जिह्मं कुटिलं गच्छतीति वक्रतया वा । पन्ने रात्रौ गच्छतीति । "महानसे मणिखिले रात्रौ पन्न इतीष्यते" इति विश्वमेदिनी । बिले शेत इति । अनन्तत्वान्निगदति अनन्तत्वादिति । उपरमते इतीति ॥

Colophon :

इति श्रीमज्जगदीश्वरमहाप्रभावसम्भावितसमस्तविद्याविनोदप्रवीणप्रणताशेषविरुद्धकविप्रचारसर्वतन्त्रनिस्सहायसाहितीविहारमुरारिमिश्रविरचितायां शब्दशब्दार्थमञ्जूषाप्रकाशिकायां ढौकाख्यायां सर्वं तृतीयापवरकनिरूपणम् ॥

No. 1766. शब्दशब्दार्थमञ्जूषाव्याख्या—ढौका.

ŚABDAŚABDĀRTHAMAÑJŪSĀVYĀKHYĀ : DHAUKĀ.

Pages, 65. Lines, 6 on a page

Begins on fol. 157*a* of the MS, described under No. 1514.

Same as the last.

No. 1767. शब्दार्थकल्पतरुः.

SABDĀRTHAKALPATARUḤ.

Substance, paper. Size, 16¾ × 10¾ inches. Pages, 326. Lines, 44 on a page. Character, Telugu. Condition, good. Appearance, new.

First Volume, complete

This is a dictionary which gives against each word the meanings given to it by various lexicographers, quoting the authorities in many cases. The words are arranged in alphabetical order in relation to their final letters. Words having the same final letters are arranged according to the number of syllables found in them; and among them the order is determined by the initial letters. This seems to be a compilation by the Pandits of the College of Fort Saint George. It is dated 1821. It consists of 3 Vols The first ends with Nānta or words ending in ण; the second with Mānta; and the third with Hānta. A list of the lexicons, which are referred to, or quoted in the work, is given in the first page. This list is said to have been composed by Māmidi Vēnkaṭārya, son of Vēnkatarāyā For extracts see under the next number

---

No. 1768. शब्दार्थकल्पतरुः.

ŚABDĀRTHAKALPATARUḤ.

Substance, paper Size, 15 × 9¾ inches. Pages, 720 Lines, 40 on a page. Character, Telugu Condition, good. Appearance, new.

This is a complete copy of the work containing all the three parts separately written in three different MSS.

Beginning:

श्रीविश्वेशो विश्वमयो विश्वातीतो निरामयः ।
व्योमातीतो निर्गुणोऽपि सृष्टिस्थित्यन्तकृद्भवेत् ॥
यो मानसागोचरोऽपि योगिहृद्ध्यानसंम्मितः ।
श्रुतिवाचामविषयस्सर्वशब्दैर्निबोधितः ॥
अमूर्तश्च निराकारो ब्रह्मविष्ण्वीशमूर्तिमान् ।
निष्कलो निर्विकल्पश्च सच्चिदानन्दरूपकः ॥

* * * *

तमानन्दमयं देवं शान्तरूपं त्रिलोचनम् ।
समाश्रयेऽहमीशानमानन्दायामृताय च ॥

* *

अहं वैश्यकुलाम्भोधिसोमस्सोमपदाश्रितः ।
सम्भूतो मामिडिकुले वेङ्कटार्यसमाह्वयः ॥

सशेषामरकोशश्च तस्य नानार्थकोऽपि च ।
विश्वो विश्वप्रकाशश्च निघण्टुर्विश्वमेदिनी ॥

नानार्थरत्नमाला च पर्यायार्णव एव च ।
शब्दशब्दार्थमञ्जूषा शब्दलिङ्गार्थचन्द्रिका ॥

पर्यायरत्नमाला च शब्दरत्नं विषामृतम् ।
सरस्वतीविलासश्च विद्वद्भिस्समुदाहृताः ॥

विचार्यैतान् निघण्टूंश्च शब्दार्थानाकलय्य च ।
शब्दार्थकल्पतर्वाख्या कृतिरद्य विरच्यते ॥

एतद्ग्रन्थस्त्रिभागश्चाच्कतयाद्यन्तभेदतः ।
काण्डास्तु पञ्चत्रिंशश्च(च्च)पदान्त्याक्षरसंज्ञया ॥

एकैककाण्डे वर्गाश्च यावदक्षरमानतः ।
वर्गे वै प्रकरणानि त्वादिवर्णानुसारतः ॥

प्रकरणेषु सर्वत्र गृहीतो गुणितक्रमः ।
नाक्षरक्रमसङ्ख्याभ्यामृते कुत्रापि वर्तते ॥

प्रातिपदिकान्त्यवर्णा गृहीत्वान्तास्स्मृताः पुनः ।
पदान्तास्त्वत्र काण्डेषु शब्दानामादिभागिनाम् ॥

प्रथमैकवचनान्तपदान्त्याच्पूर्वगान् हलः ।
सङ्गृह्य व्यवाह्रियन्ते न पदान्तहलं त्वि[व]तः ॥

अत्राक्षराणां सङ्ख्या तु यावन्तोऽचस्स्थिताः परे।
तावतैव विजानीयान्नान्यहल् गृह्यते क्व च ॥

अक्षरनिर्णये अन्यच्च—

अकाराद्या अचः प्रोक्ताः ककाराद्या हलस्स्मृताः।
सर्वेऽपि वर्णाः पञ्चाशदज्विशिष्टहलोऽक्षराः ॥
अचश्चाप्यक्षरा उक्ता नानातन्त्रविशारदैः।

भगवता भाष्यकारेण वाक्छब्द एकाक्षर इत्युक्तत्वात् अज्विशिष्टहलेवाक्षरः। निघण्टुकारैरर्कशुकापिकादिशब्दाः ककारान्ता द्व्यक्षरा इति। इतरैः पञ्चाक्षरोऽयं मन्त्रः, अष्टाक्षरोऽयं मनुरिति प्रतिपादितत्वाच्च। अत्र ग्रन्थे अज्रहितपदा(क्ष)रेऽन्त्यहल् अक्षरत्वेन च न गृह्यते ॥

पुंलिङ्गशब्दे पुंसीति स्त्रीलिङ्गे तु स्त्रियामिति।
नपुंसके क्लीब इति त्रिलिङ्गे त्रिष्वितीर्यते ॥

स्त्रीपुंलिङ्गे द्वयोश्चैव क्लीबपुंलिङ्गकेऽस्त्रियाम्।
स्त्रीक्लीबलिङ्गे चापुंसीत्येवं सङ्केतितो मया ॥

शब्दान्तानि च लिङ्गान्यप्यर्था वै पूर्वसूरिभिः।
उक्ता एव हि वक्ष्यन्ते सन्तस्तुष्यन्तु मानसे ॥

अस्मिन्ग्रन्थे विशेषोऽयं यश्शब्दः कामितो भवेत्।
शब्दग्रथनचातुर्यात्सुलभेन स लभ्यते ॥

एकाच्काण्डः—

अः अदन्तः पुंसि—अमरः—विष्णौ; नानार्थरत्नमाला—चतुर्मुखे, शङ्करे, बृहस्पतौ, कमठे; क्लीबे—अङ्कणे, रणे, गौरवे, अन्तःपुरे, हेतौ, भूषणे, पादे; स्त्रियाम्—पार्वत्याम् ॥

End:

अजादि क्षाक्षरान्तकाण्डे
एकादशाक्षरवर्गे
अजादिप्रकरणम् ॥

अनुक्तविषयस्वरूपोत्प्रेक्षा { आकारान्तास्स्त्रियाम्—अमरः—अलङ्कार-भेदे ॥

Colophon:

इति श्रीमद्रुद्रेश्वरपदपद्माराधनपारीणेन, तत्करुणाकटाक्षलब्धसरस-साहित्यान्ध्रगीर्वाणकविताचातुरीधुरीणेन, उद्भटाराध्यान्ववायगुरुमल्लिकार्जुन-भक्तिपरायणेन, वैश्यकुलपद्माकरविभाकरेण, मामिडिवंशपाथारोशिसुधा-करेण, व्याळकूलसगोत्रपौ(पवि)त्रेण, विद्वदनुग्रहपात्रेण, भद्रमाम्बासूर्यनारा-यणपौत्रेण, वेङ्कटवर्यतनूभवेन, विजयलक्ष्मीगर्भशुक्तिशुक्तिभवेन, वेङ्कटा-र्येण विरचिते अच्काण्डादिक्षान्तकाण्डपर्यन्तपञ्चत्रिंशत्काण्डगर्भत्रिभागपरि-मिते शब्दार्थकल्पतरौ याद्यन्तभासुरनवकाण्डात्मकस्तृतीयो भागस्सम्पूर्णः ॥

No **1769.** शब्दार्थकल्पतरुः.

ŚABDĀRTHAKALPATARUḤ.

Substance, paper. Size, $17\frac{1}{8} \times 10\frac{7}{8}$ inches. Pages, 388. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance new.

This contains the second volume of the work described above.

No. **1770.** शब्दार्थकल्पतरुः.

ŚABDĀRTHAKALPATARUḤ.

Substance, paper. Size, $14\frac{1}{2} \times 9\frac{1}{2}$ inches. Pages, 212. Lines, 40 on a page. Character, Telugu. Condition, good. Appearance, new.

This is another copy of the second volume.

No. 1771. शब्दार्थकल्पतरुः.

ŚABDĀRTHAKALPATARUḤ.

Substance, paper Size, 14⅘ × 9½ inches. Pages, 234 Lines, 40 on a page. Character, Telugu. Condition, good. Appearance, new

This is the third volume of the work.

No. 1772. शब्दार्थकल्पतरुः.

ŚABDĀRTHAKALPATARUḤ.

Substance, paper Size, 14⅝ × 1½ inches Pages, 250. Lines, 38 on a page. Character, Telugu Condition, good. Appearance, new.

This is a copy of the first volume of the work.

No. 1773. शेषामरः.

ŚĒṢĀMARAḤ.

Pages, 106. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 1654

This is a supplement to the Nāmalingānuśāsana of Amarasiṁha.

Contains chapters II and III.

Beginning:

वसुगर्भा नराधारा चतुरन्ताव्ययी त(तु)भू(भृ)त् ।
गोचरस्सश्वरा(रो) गोष्ठं चरं गोष्ठीनमस्त्रियाम् ॥ १ ॥
वरणस्सङ्क्रमश्चापि सस्याद्यर्थेऽम्बुवारणे ।

End:

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
उणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥

इति परोपलिङ्गप्रकरणम् ॥

षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययाः ।
षड्युष्मदस्मदन्ताश्च तत्प्रधानास्समास्त्रिषु ॥

इत्यलिङ्गप्रकरणम् ॥

पर(रं)विरोधे शेषं तु ज्ञेयं सि(शि)ष्टप्रयोगतः ॥

इति लिङ्गादिसङ्ग्रहवर्गः ॥

Colophon:

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
तृतीयस्सामान्यकाण्डस्साङ्ग एव समर्थितः ॥

No 1774. शेषामरः.

ŚEṢĀMARAḤ.

Pages, 28 Lines, 11 on a page
Begins on fol. 109*a* of the MS. described under No 1748.
Complete.

No 1775. शेषामरः.

ŚEṢĀMARAḤ.

Substance, paper. Size, 8⅝ × 6¾ inches. Pages, 63. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

No. 1776. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ

Pages, 9 Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new

Begins on fol 148*a* of the MS described under No 1595

Copying was finished on Wednesday the 6th of Kārttika-suddha in the year Ānanda.

Complete

This is a Dvirūpa-lexicon in three Adhyāyas by Saridvallabha-miśra said to have been born in the well known family of a certain Śankaramiśra It gives the different alternative forms of certain words.

Beginning:

नत्वा लोकेशानं मत्वा महतां मतं च बहुमानम् ।
धृत्वा हृदि गौरीशं हृत्वा वरशब्दजालमघुनेशम् ॥
श(स)र्वेशमानसोल्लासमसर्वजितमानसम् ।
सरस्वतीविलासं सत्कुर्वे सारसमानसम् ॥
केचिद्भेदनिबन्धान् केचित्केचिद्वदन्ति निर्लज्जाः ।
अन्तादिभिरयमुच्चैरेकानेकार्थशब्दयोस्तुल्यम् ॥
अन्तादिरम्यमाद्यं दीर्घादिविचित्र(त्रि)तं तु परमुच्चैः ।
तदनन्तरमतिरम्यं गणितागणितादिगणननिधनान्तम् ॥
अध्यायत्रयसम्मिश्रस्त्वेवं पूज्यस्त्वयं तनुः ।
तनुरेव कळानाथः पूज्यते विबुधोत्तमैः ॥

विरिञ्चिर्विरिञ्चो मरीचिर्मरीचो बलारिर्बलारो बिडौजो बिडौजाः ।
अगस्तिस्त्वगस्त्यस्सृगाली सृगालः स्वयम्भुस्स्वयम्भूर्जलौकार्जे(को ज)-लौकाः ॥

End:

पट्टणं पत्तनं चैव पाट्टणं पात्तनं तथा ।
विधूरजं विधुरजं वैधूर्यं च विड्रूरजम् ॥

इत्थं शङ्करमिश्रविस्र(श्रु)तलसद्वंशार्यवारां निधौ
श्रीसा(सो)दर्यवरेण्यचन्द्रसदृशस्सोऽयं सरिद्वल्लभः ।
चक्रे शक्रगुरूगु(रु)शब्दरचनाचक्रक्रमानुक्रमा-
द्याकर्णाखिलसारभारभरितं ग्रन्थं बुधानां मुदे ॥

Colophon:

इति श्रीमदनवद्यविद्याहृद्याद्भुतचर्यवर्यधुर्येण सकलकलापकलितकला-धरकुलाचार्येण सरिद्वल्लभमिश्रेण विरचिते सकलमनोविकासके सरस्वती-विलासे गणितागणितादिकथनं नाम तृतीयो(ऽध्या)यः ॥

सरस्वतीविलासस्समाप्तः ॥

No **1777.** हारावलिः

HĀRĀVALIH.

Substance, paper. Size, 12¾ × 6⅛ inches. Pages, 21 Lines, 12 on a page. Character, Dēvanāgarī Condition, slightly injured. Appearance, new.

Complete.

